316.	166	ŚRĪSTUTIVYĀKHYĀ		"	"	15 X 1.4	34	7	54	Inc	Old	Pub	
317.	401	ŚRĪSTUTIVYĀKHYĀ		"	"	15.5 X 1.3	24	7	83	"	"	"	–
*318.	2237	ŚRUTAPRAKĀŚIKĀTŪLIKĀ	Śrīnivāsa (vādhūla)	"	"	16 X 1.2	157	6	73	"	"	UnPub	A commentary on Śrutaprakāśikā.
319.	2306	"	"	"	"	18.2 X 1.7	112	8	46	"	"	"	–
320.	2481	"	"	"	"	19 X 1.5	140	12	76	"	"	"	–
321.	2179	ŚRUTAPRADĪPIKĀ	Sudarśanasūri	"	"	16.8 X 1.5	34	10	57	"	"	Pub	This is a short commentary on the Śribhāṣya.
322.	1225	ŚRUTAPRAKĀŚIKĀBHĀṢYA-STHAVIṢYASŪCIKĀ		"	"	15.5 X 1.2	18	8	55	"	Good	"	Index of the contents in the Śrutaprakāśikā
323.	95	SAṄKALPASŪRYŌDAYA	Vēdāntāchārya	"	"	16.5 X 14	73	6	50	C	Good	"	A drama on Viśiṣṭādvaita Philsophy.
324.	2165	"	"	"	"	17 X 2.2	64	14	65	Inc	Old	"	–
325.	3307 A	"	"	"	"	18 X 1.2	89	9	50	"	"	"	–

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.
CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

1	2	3	4	5	6	7	8	9	10	11	12	13	14
326.	640 C	SANMĀRGA DARPAṆA	Dēvarāja (Vātsya)	PL	Gr	15.2 X 1.3	23	8	44	Inc	Good	Unpub	A manual on daily rituals of Srivaiṣṇavās
327.	2185 B	SAMPRADĀYA CANDRIKĀ	Veṅkaṭanātha(Śrīśaila)	"	"	9.5 X 2.2	15	23	57	C	Old	"	A treatise on Srivaisnava religion.
328.	2422 A	"	"	"	"	16 X 1.3	59	5	38	"	"	"	—
327.	232	SACCARITRAPARITRĀṆA	Vīrarāghavasūri (Vādhūla)	"	"	15.5 X 1.2	95	6	44	Inc	"	"	This work explains some of the religious practices of the Śrīvaiṣṇavās.
328.	112 A	SACCARITRARAKṢĀ	Vēdāntācārya	"	"	14.2 X 2.2	25	18	68	C	"	Pub	This is a treatise on some of the religious practices of the Śrīvaiṣṇavās.
329.	570	SADANUṢṬHĀNADARPAṆA	Varadācārya (Śuddha Satvam) (Shirupuliyur Swamy)	"	Gr & Tel	16 X 1.4	280	8	48	"	Good	"	This is a mirror of Śrīvaiṣṇava Anuṣṭhāna.
330.	2943 A	"	Varadācārya (Śuddha Satvam)	Pm	Gr	8 X 12	216	35	34	Inc	"	"	—
331.	46	SADVIDYĀ VIJAYA	Mahācārya	PL	"	17.5 X 1.4	70	7	100	C	Good	"	This work deals with the Sadvidyā- taught in the sixth chapter of the Chāndōgyōpaniṣad.
332.	1695 C	SAMĀSAVĀDA	Anantārya	"	"	13.5 X 4	2	17	38	Inc	"	"	A treatise explaining the meaning of the compound word Brahmajijñāsā according to the Śrutaprakāśikā.
333.	2202 F	"	"	"	"	13.5 X 1.4	7	7	100	C	"	"	—
334.	2425 C	"	"	"	"	17 X 1.5	7	9	56	"	"	"	—
335.	2540 A	"	"	"	"	15 X 1.5	15	10	50	"	Old	"	—
336.	3113 C	"	"	"	"	16 X 1.4	19	7	45	"	"	"	—
337.	2229	SARVAPRAMĀṆA SAṂGRAHA	"	"	"	18 X 1.5	154	10	70	Inc	"	Unpub	A collection of Pramaṇās from Śruti, Smṛti and Purāṇās.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

1	2	3	4	5	6	7	8	9	10	11	12	13	14
338.	276	SĀRAPRAKĀŚIKĀ	Śrīnivāsa(Bharadvāja)	Pl	Gr	16.9 X 1.5	147	10	54	Inc	Old	Pub	A commentary on Rahasyatrayasāra of Vēdāntācārya.
339.	3114	"	"	"	"	15.5 X 1.5	255	8	48	C	"	"	–
340.	3115	"	"	"	"	16 X 1.5	239	8	35	Inc	"	"	–
341.	1063 A	SĀRASAṂGRAHA		"	N.N	11.7 X 1.7	117	4	56	C	"	"	This work deales with the essence of Viśiṣṭādvaita Philosophy.
342.	999 A	SĀRĀSVĀDINĪSAṂGRAHA		"	"	16.5 X 1	66	9	55	Inc	"	Unpub	This is a commentary on Rahasyatrayasāra Ṭikā.
343.	1252	SIDDHADHARMAPRAKĀŚIKĀ	Śrīnivāsa (Śrīśaila)	"	Gr	16.5 X 1.5	45	10	62	C	"	"	In this work the author explains Siddadharma. This Wokk follows Siddhōpaya Sudarshana by the same author.
344.	88	SIDDĀNTACANDRIKĀ	Vēdāntācarya (Paravastu)	"	Tel	15.2 X 1.5	135	6	71	"	"	"	A treatise on Śrīvaiṣṇava religion supporting the practice of having the marks of Śaṅkha and Cakra branded on the arms.
345.	8 F	"	Śrīnivāsācarya (Surapuram)	"	"	18 X 1.3	56	6	76	Inc	Old	"	The work is also called Upādānatva - samarthana. This work proves that Brahman is the material as well as the efficient cause of the Univers.
346.	2215	सिद्धान्तचिन्तामणिः SIDDĀNTA CINTĀMANI	Śrīnivāsācarya (Surapuram)	"	Gr	16.5 X 1.2	65	7	54	C	"	"	–

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection. Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

1	2	3	4	5	6	7	8	9	10	11	12	13	14
347.	1719 B	SIDDHĀANTATŪLIKĀ	Śrīnivāsadāsa (Śrīśaila)	Pm	Tel	6.5 X 8.2	20	21	16	C	Good	Pub	An original treatise explaining the principles of Viśiṣṭādvaita school
348.	114	SIDDHĀNTANYĀYACANDRIKĀ	Dēvarāja	Pl	"	1.5 X 1.4	119	7	54	Inc	Good	Unpub	This is the same as Siddhānta chintāmani. This work is known as Candrikā Khaṇḍana.
349.	2417 A	"	"	"	Gr	17.5 X 1.5	50	10	62	Inc	Old	Unpub	–
350.	1719 C	SIDDHĀNTAPARIBHĀṢĀ	Śrīnivāsadāsa (Śrīśaila)	Pm	Tel	6.5 X 8.2	6	22	17	Inc	Good	Unpub	A summary of the main principles of Viśiṣṭādvaita.
351.	2584	SIDDHĀNTASIDDHĀÑJANA	Anantārya	Pl	"	16.5 X 1.5	38	14	70	C	Old	Pub	An important Viśiṣṭādvaita logical treatise. This work deals with Pramāṇa and pramēya of the Rāmānuja Philosophy.
352	4556	"	"	"	Gr	43.7 X 3	37	8	60	[illegible]		"	
352	1034 A	SUNDARABĀHUSTAVA VYĀKHYĀ	Vēnkaṭanivāsadāsa	"	Gr	16.4 X 1.4	79	6	49	C	Old	Pub	In Sundarabāhustava the author expounds the greatness of incarnation in the form of Icons (Archāvatāra) and the basic tenets of philosophy as contained in the Upaniṣads.
353.	318 B	STŌTRARATNA	Yāmunācārya	"	"	8.4 X 1.2	14	5	22	"	Good	"	This is a beautiful devotional lyric. All the auspicious qualities of Lord Nārāyaṇa are depicted here.
354.	566 A	"	"	"	"	6.2 X 1.9	6	12	27	"	"	"	
355.	1444 A	"	"	"	"	9 X 1	26	5	23	"	Old	"	
356.	1529 B	"	"	"	"	15.5 X 1.2	11	6	50	"	Good	"	
357.	28	STŌTRARATNABHĀṢYA	Vēdāntācārya	"	Tel	14.5 X 1.5	124	6	55	"	Old	"	A commentary on Stōtraratna or Āḷavandār Stōtra.
358.	112 D	"	"	"	Gr	14 X 2.3	35	22	87	"	"	"	–

Funding: Tattva Heritage Foundation, Kolkata. Digitization: eGangotri.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रीः

श्रीमते रामानुजाय नमः

3106 - अतिमानुषस्तवः

Beginning:

अतिमानुषशीलवृत्तवेषैः अतिवृत्तामरविक्रमप्रतापैः ।
अतिलंघितसर्वलोकसाम्यं वरये वैष्णव-वैभवावतारम् ।।
श्रेयः किरन्तु किरणाश्चरणारविन्द
निष्यन्दमानमकरन्दरसौघदेश्याः ।
लज्जाश्रुतेर्मधुन उत्स इति प्रतीताः
मांगल्यरंगनिलयस्य परस्य धाम्नः ।।

End:

विस्रम्भणं त्वयि न यद्यपि मेस्ति नापि
श्रद्धायथोक्तवचनार्थगता तथापि ।
वाचंत्विमां सकृदथाप्यसकृन्मयोक्तां
सत्यां कुरुष्व दययैव दयैकसिन्धो ।।
पापीयसोऽपि शरणागति शब्दभाजो
नोपेक्षणं मम तवोचितमीश्वरस्य ।
त्वदज्ञानशक्तिकरुणासु सतीषु नेह
पापं पराक्रमितुमर्हसि मामकीनम् ।।

Colophon:

अतिमानुषस्तवः परिसमाप्तः ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

1055 b - अतिमानुषस्तवव्याख्या

Beginning:

एवं श्रीवैकुण्ठनाथविषयं श्रीवैकुण्ठस्तवं परिसमाप्य व्यूहावतारस्यापि तत्समानयोगक्षेमतया तमुपेक्ष्य अनन्तरं विभवावतारं तुष्टुवन्तः श्रीवत्सांकमिश्राः अतिमानुषावहचित्रचरित्रासवतभगवद्वाल्मीकि-पराशर-पाराशर्य-शुकप्रमुखपरमर्षिभिः भट्टनाथपरांकुशपरकालप्रभृतिभिः परमाचार्यैश्चआविष्कृतम् अतिरहस्यम् अतिमानुषचरित्रवैचित्र्यमेव माद्दृशां प्रकाशयितुं प्रथमतो नमस्क्रियारूपं मंगलं निबध्नन्ति। "अतिमानुषशीलवृत्तवेषैः" इति।

End:

यथातथावापि शरणागत इत्युक्तिमतां प्रतिबन्धकपापनिरसनद्वारा-भवच्चरणारविन्दनिरन्तरदास्यप्रदानदीक्षितासु त्वद्ज्ञानशक्तिकरुणासु सतीषु मदीयं पापं फलप्रतिबन्धकाय नालमिति भवता अहमवश्यं रक्षणीय इति भावः। त्वद्ज्ञानशक्तिकरुणासु इत्यत्र दयायाः पात्रं दययैवेति प्रकरणानुगुण्येन दयायाः प्रधानसाधनत्वं ज्ञानशक्त्योः तदंगत्वमिति संप्रदायः ।।

Colophon:

इति श्रीमदात्रेयगोत्रभूषायमाणशेषाचलाचार्यपौत्रेण श्रीरामानुजगुरुवरसूनुना श्रीवेंकटनिवासदासेन विरचिता अतिमानुषस्तवव्याख्या परिसमाप्ता ।।

312 - अथर्वशिखाविलासविस्तरः

Beginning:

ततश्च विष्णुपुराणे -

'सर्वशक्तिमयो विष्णुः स्वरूपं ब्रह्मणोपरम् ।
मूर्तं यद्योगिभिःपूर्वं योगारम्भेषु चिन्त्यते ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

स परः सर्वशक्तीनां ब्रह्मणः समनन्तरम् । इति ।।

तद्वदेव सोऽपि शिखोपसर्जन एवेति प्रत्यवस्थानमपि गर्भस्थितसमीचीनन्यायोपबृंहणसचियभगवत्परभावप्रतिपादनेदं परोदाहृत महोपनिषदाद्यनेकोपनिषत्कदम्बकविरुद्धतया लैंगादिवचनानां परोदाहृतानां लिंगाभासानां च विद्वद्भिः ज्ञेयत्वात्। तस्मात् त्रिमूर्त्युत्तीर्णपरवासुदेवमूर्तिविशिष्टं विष्णववतारमूर्त्युपलक्षितं च दिव्यात्मस्वरूपं तुरीयार्थमात्रोपलक्षितचतुर्मात्रप्रणवप्रतिपाद्यं तुरीयं तत्वमिति स्थितम् ।

End

मुद्गलोपनिषदि - वामदेवः आंगीरसस्सन् पूर्वपूजासमारब्धोऽत्रिपत्न्या अनसूयया गर्भ एव शयाना ब्रह्मवेदयांचक्रे । स हि गर्भं पुरा भित्वा ब्रह्मलोकमुपचक्राम । मध्येऽध्वानमुपनिषद्य उवाच भगवांस्तु गर्भपंजरमेवाभिनिविशमाने विज्ञानतोपायः अकस्मात् किंचिद्गीतासंगः सर्वैर्धन्यमानोऽध्वनः परामुपागच्छसि। तदेतदिहाश्चर्यम्, --------------- ।

2282 – अधिकरणसारावली

Beginning

[अन्तरधिकरणम्]

भूयिष्ठानन्तपुण्योपचयबलसमुद्बुद्धपूर्वोक्तभूम्नां
शक्रादिन्यायतस्स्यात् त्रिगुणतनुभृतामीश्वराणां प्रवाहः ।
तन्नाकर्मोत्थदिव्याकृतिजनितमहिमा शासिता सर्वपुंसां
नित्यश्रीर्ब्रध्नबिम्बे श्रुत इति स य इत्युक्त एवैष एकः ।।
सर्वेभ्यः कल्मषेभ्यो ह्युदित इति वदत्यन्तरादित्यविद्या
तस्माच्छेषाभ्यनुज्ञानयत इति विभोः पुण्ययोगोस्तु मैवम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

आम्नातोऽनन्यशास्यस्ववशपरमफलस्साधुना नैष भूयान्
स्यात्पुण्ये लक्ष्मयोगादपि न सुकृतमित्यादिना पाप्मशब्दः ।।
प्रख्यातं शुद्धसत्त्वं किमपि तदनघं द्रव्यमव्यक्ततोऽन्यत्
तद्रूपं रूपमैशं दिवि कनति तथा शेषशेषाशनादेः ।
नित्यं तत्सूरिसेव्यं परतरमजहत्स्वस्वभावस्स देवः
पुंसां संसारशान्त्यै विपरिणमयति व्यूहपूर्वैर्विभागैः ।।

End:

पाराशर्यः प्रभूतादुपनिषदमृतोदन्वतस्सारभूतं
निर्मथ्यादत्त सूत्रैरवितथनिगमाचार्यनामा मुनीन्द्रः ।
यत्तन्निष्कृष्टमित्थं यतिपतिहृदयारूढमारूढतार्क्ष्य
स्तद्व्यक्तावाजिवक्त्रः सह मम गुरुभिर्वादिहंसांबुवाहैः ।

Colophon:

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेंकटनाथस्य वेदान्ताचार्यस्य कृतिषु अधिकरणसारावल्यां चतुर्थाध्यायस्य चतुर्थःपादः ।।

रचिताधिकृतेस्सारावलिर्येनमहात्मना ।
तं वन्दे निगमाचार्यं सर्ववेदान्तपारगम् ।।

Scribe:

यामुनाह्वयता -------------- हितैषिणा ।
लिखिताधिकृतेस्सारावलिस्तत् पाठवांछया ।।

159 - अधिकरणचिन्तामणिः

Beginning:

[तृतीयाध्याय प्रथमपादः । तदन्तरप्रतिपत्त्यधिकरणम्]
साध्या मुक्तिर्नचेत् स्यात् प्रसजति विफला साधनाध्यायक्लृप्तिः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

साध्याचेन्नश्वरी स्यात् कथमिहपुनरावृत्तिशून्योऽपवर्गः ।
मैवं ब्रह्मानुभूतिः परभजनवता प्रागसिद्धैव साध्या
धीसंकोचप्रणाशस्त्वियमिति च भवत्युत्तरावध्यतीता ।।

एवं सिद्धविषयनिरूपणपरपूर्वद्विकचिन्ता कृता । अथ साध्यविषयनिरूपणपरोत्तरद्विकचिन्तायामुत्पत्तिक्रमेण चतुर्थाध्यायनिरूपणीयसाध्यांशात्पूर्वं साधनचिन्ता तृतीये क्रियत इति द्विकसंगतिः, अध्यायसंगतिश्च । एतत्सर्वं 'अतिक्रान्त' इत्यादिना सविस्तरं भाष्यएवोक्तमिति तत्रैव द्रष्टव्यम् । तृतीयाध्यायपादद्वन्द्वसंगतिरपि तत्रैव भाष्ये सुव्यक्तमुक्ता । उपासनारम्भाभ्यर्हितोपायश्च प्राप्यवस्तुव्यतिरिक्तवैतृष्ण्यं, प्राप्यतृष्णा चेति । तत्सिध्यर्थं जीवस्य लोकान्तरेषु संचरतो जाग्रतस्स्वपतःसुषुप्तस्य मूर्छतश्च दोषाः, परस्य च ब्रह्मणस्तद्रहितता कल्याणगुणाकरत्वं च प्रथमद्वितीययोः पादयोः प्रतिपाद्यते इति । अधिकरणसंगतिरुत्तरत्र भविष्यति ।

End:

अयमत्रान्वयः - अवितथनिगमाचार्यनामा मुनीन्द्रो भगवान् पाराशर्यः-प्रभूतादुपनिषदमृतोदन्वतस्सारभूतं यत् तद्वेदान्तसूत्रैः निर्मथ्यादत्त । इत्थम् एवमस्माभिर्निष्कृष्टं भाष्यकारहृदयारूढं तदिदममृतं ममगुरुभिर्वादिहंसांबुवाहैः सह श्रीमान्हयग्रीव एव तद्धक्ता तत्स्वयमेव वक्ता । वक्तेति तृन्प्रत्ययान्तः तेनात्र द्वितीयानिर्देशः । अत्र -

'आविध्यमतिमन्थानं येन वेदमहार्णवात् ।
जगद्धिताय जनितो महाभारतचन्द्रमाः।।' इति श्लोकार्थो भाव्यः ।

जयति यतिराजवाणी प्रतिभटसिद्धान्तकृन्तनकृपाणी ।
श्रुतियुवतीनां वेणी दिव्यपदारोहभव्यनिश्रेणी ।।

आचार्यैर्निर्मितानामखिलगुरुजनग्रन्थसंवादभाजां
पद्यानामुद्यदर्कप्रतिभटमहतामर्थतत्वप्रसिद्धयै ।
व्याख्यामांख्यद्विचित्रां वरदगुरुरयं वेदसिद्धान्तवेदी
वेदान्ताचार्यसूनुर्विमतमतकथावीरसंहारसिंहः ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

Colophon:

इति निखिलतार्किकचूडामणिना सर्वतन्त्रस्वतन्त्रेण श्रीमद्वरदनाथा-परनाम्ना वेदान्ताचार्येण विरचिते शारीरकाधिकरणचिन्तामणौ चतुर्थाध्यायस्य चतुर्थःपादः ।

श्रीमल्लक्ष्मणयोगीन्द्र सिद्धान्तविजयध्वजम् ।
विश्वामित्रकुलोद्भूतं वरदार्यमहं भजे ।।

927 - अधिकरणार्थसंग्रहः

Beginning:

वन्दे वेदान्तकर्पूरवासितस्वान्तमावहम् ।
वाधूलकुलजीवातुं श्रीनिवासमहागुरुम् ।।

श्रियःपतिः परमकारुणिको भगवान् सर्वेषां पुरुषाणाम् उपादित्सित-जिहासितेष्टानिष्टतत्साधनाना त्याज्योपादेयविभागार्थं 'हर्तुं तमस्सदसती च विवेक्तुमीशो मानं प्रदीपमिव कारुणिको ददाति' इत्युक्तप्रकारेण वेदाख्यं प्रमाणं प्रदाय अवतारादिमुखेन तदर्थज्ञानं च उदपादयत् । तच्च ज्ञानं ''नारायणात् समुत्पन्नं ज्ञानं कृतयुगे स्थितमिति' कृतयुगे तथैवावर्तत । अनन्तरं तस्मिन् 'किंचित्तदन्यथाभूतं त्रेतायां द्वापरेखिलम्' इत्युक्तप्रकारेण खिले सति

संकीर्णबुद्धयो देवा ब्रह्मरुद्रपुरस्सराः ।
शरण्यं शरणं जग्मुर्न्नारायणमनामयम् ।
तैः विज्ञापितकार्यस्तु भगवान् पुरुषोत्तमः ।
अवतीर्णो महायोगी सत्यवत्यां पराशरात्।।

End:

------- कर्मकृतशरीरस्यैव दुःखहेतुत्वाच्च सशरीर एवायमिति जैमिनिमतेन प्रतिक्षिप्य सत्यसंकल्पत्वश्रुत्या इच्छानुरोधेन कदाचित्सशरीरः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अशरीरश्चकदाचिदिति स्वमतमुपन्यस्तम् । जगद्व्यापारवर्जाधिकरणे मुक्तस्य भगवता परमसाम्यापत्तिश्च श्रवणाज्जगज्जन्मस्थितिलयनियमनादिकं मुक्तस्यैश्वर्यमित्याशंक्य जगन्नियमनप्रतिपादनेषु परमात्मनः प्रकृतत्वान्मुक्तस्यासन्निहितत्वाच्च 'भोगमात्रसाम्यलिंगाच्च' जगद्व्यापारवर्जमित्युक्तम् । अनावृत्तिश्शब्दादित्यत्र भगवत्स्वातन्त्र्यान्मुक्तस्य आवृत्तिस्संभवतीत्याशंक्य 'इमं मानवमावर्तं नावर्तन्ते' इत्यादि तदनावृत्तिश्रवणादाश्रितव्यामुग्धस्य भगवतः तन्निवर्तन संकल्पासम्भवान्मुक्तस्य पुनरावृत्तिर्नसम्भवति इत्युक्त्वोपसंहृतम् ।।

Colophon:

इति श्रीमहाचार्यकृतिषु अधिकरणमालायां चतुर्थस्याध्यायस्य चतुर्थःपादः ।

773 A - अधिकारसंग्रहः

Beginning

प्रपदनमये विद्याभेदे प्रतिष्ठितचेतसः
प्रतिपदमिह प्रज्ञादायं दिशन्तु दयाधनाः ।
शठरिपुशुकव्यासप्राचेतसादिनिबन्धन
श्रमपरिणतश्रद्धाशुद्धाशया मम देशिकाः ।।

एतेमह्यमपोढमन्मथशरोन्माथायनाथादयः
त्रैय्यन्तप्रतिनन्दनीय विविधोदन्तास्स्वदन्तामिह ।
श्रद्धातव्य शरण्यदम्पतिदया दिव्यापगा व्यापकाः
स्पर्धाविप्लव विप्रलम्भपदवी वैदेशिका देशिकाः ।।

हृद्याहृत्पद्मसिंहासन रसिक हयग्रीव हेषोर्मिघोष
क्षिप्तप्रत्यर्थिदृप्तिर्जयतिबहुगुणा पंक्तिरस्मद्गुरूणाम् ।
दिक्सौधाबद्धजेत्रध्वजपटपवनस्फातिनिर्धूततत्त
त्सिद्धान्तस्तोमतूलस्तबकविगमनव्यक्तसद्वर्तनीका ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

पठत रहस्यत्रयसारादुद्धृतमधिकारसंग्रहं सुधियः ।
जननपदवीगतागतजंघालत्वं जिहासन्तः ।।
मणिवर इव शौरेर्नित्यहृद्योऽपि जीवः
कलुषमतिरविन्दन् किंकरत्वाधिराज्यम् ।
विधिपरिणतिभेदाद्वीक्षितस्तेन काले
गुरुपरिषदुपज्ञं प्राप्य गोपायति स्वम् ।।

End:

निर्विष्टं यतिसार्वभौमवचसामावृत्तिभिर्यौवनं
निर्धूतेतरपारतन्त्र्यनिरया नीताः सुखं वासराः ।
अंगीकृत्य सतां प्रसत्तिमसतां गर्वोऽपि निर्वापितः
शेषायुष्यपि शेषिदंपतिदयादीक्षामुदीक्षामहे ।।
आस्तिक्यवान्निशितबुद्धिरनभ्यसूयुः
सत्संप्रदायपरिशुद्धमनास्सदर्थी ।
संकेतभीतिरहितः सतृणेष्वसक्तः
सद्धर्धनीमनुविधास्यति शाश्वतीं नः।।

Colophon:

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेंकटनाथस्य वेदान्ताचार्यस्य कृतिषु अधिकारसंग्रहं संपूर्णम् ।

647 - अधिकारसंग्रहश्लोकव्याख्या

Beginning:

वेदान्ताचार्यवर्येण वेंकटेश्वरसूरिणा ।
समुद्धृतोऽधिकाराणां संग्रहोऽत्र विविच्यते ।।
श्रुतिमौळिदेशिकगुरुर्मुदे सतामधिकार संग्रहमिमं व्यरीरचत् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तमिह प्रसन्नकठिनं यथाश्रुतं विवृणोमि तस्य करुणावलम्बिनः ।।

इह खलु कवितार्किकसिंहः सर्वतन्त्रस्वतन्त्रः वेदान्ताचार्यवर्य इति श्रीरंगराजदत्तापरनामधेयः श्रीमान्वेंकटनाथार्यः मुमुक्षुजनोज्जीवनाय तदपेक्षित सकलार्थपरिपूर्णरहस्यत्रयसाराख्यदिव्यप्रबन्धं प्रणिनीय तत्रोक्तद्वात्रिंशदधिकाराणामादावन्ते च तत्तदधिकारोक्तसंग्रहार्थं संग्राहकं संस्कृतरूपं पद्यद्वय निरमिमीत। भूयस्तान्यपि पद्यानि समुद्धृत्य रहस्यत्रयसारपठनालसानामुपकाराय अधिकारसंग्रहं नाम प्रबन्धं पृथक्त्वेन चकार । स च इह मुमुक्षुभिः सर्वैः कालक्षेपोपकरणत्वेनाख्यानान्नातिसंकोच विस्तरां वेदान्ताचार्यकृपावलम्बिनोऽहं यथाश्रुतं विलिखामि ।

End:

एवंभूतो यो वर्तते सः सर्वोऽपि शाश्वतीं नाथयामुनयतिवरादिसिद्धान्तानुसारिणामस्माकं सद्वर्तिनीं - सन्मार्गम्, अनुविधास्यति - अनुसरिष्यति, अवश्यं परिग्रहिष्यति । साडम्बरैः किं परैः इति भावः ।

इति यतिराजमहानस परिमळपरिवाह वासितां पिबत ।
विबुध परिषन्निषेव्यां वेदान्तोदयनसंप्रधायसुधाम् ।।
कळकण्ठगणास्वाद्येकामस्यास्ते निजांकुरे ।
निंबवृत्तिभिः उद्गीर्णे न चूतः परितप्यते ।

रहस्यत्रयसारोऽयं वेंकटेशविपश्चिता । शरण्यदंपतिविदां संमतस्समगृह्यत ।

Colophon:

निगमनाधिकारे द्वात्रिंशः ।

इत्थं वेदान्तगुरुभिर्दर्शितस्य यथामति ।
संग्रहस्याधिकाराणां व्याखयोक्ता तत्प्रसादतः ।
श्रीभाष्यश्रीनिवासेन कौशिकान्वयजन्मना ।
संग्रहस्याधिकाराणां व्याखयेयं साधु निर्मिता ।

कवितार्किकसिंहाय कल्याणगुणशालिने । श्रीमतेवेंकटेशाय वेदान्तगुरवे नमः।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

3108 A - अध्यात्मचिन्ता

Beginning :

सुन्दरजामातृमुनेः प्रपद्ये चरणाम्बुजम् ।
संसारार्णवसंमग्नजन्तुसन्तारपोतकम् ॥
अस्मद्विधिपरित्राण प्रेमप्रद्राणमानसम् ।
वादिकेसरिणं वन्दे सौम्यजामातरं मुनिम् ॥
नमोस्त्वस्मस्तद्गुरुभ्यश्च निखिलेभ्यो नमो नमः ।
परमेभ्यो गुरुभ्यश्च निखिलेभ्यो नमो नमः ॥
नमो रामानुजायेदं पूर्णाय महते नमः ।
यामुनाय मुनीन्द्राय नमः सर्वार्थवेदिने ॥
नमोऽस्तुराममिश्राय पुण्डरीकदृशे नमः।
नाथाय मुनयेनित्यं नमः परमयोगिने ॥
आद्याय कुलनाथाय नमोस्तु शठवैरिणे ।
नमस्सेनाधिपतयें ज्ञानयाथात्म्यदायिने ॥
श्रियै श्रीशानपायिन्यैं जगन्मात्रे नमो नमः।
श्रीधरायादिगुरवे नमो भूयो नमो नमः ॥
इत्थं संचिन्त्य मनसा शुभां गुरुपरंपराम् ।
अध्यात्मविषयां चिन्तां करोम्यात्मविशुद्धये ॥
आत्मा न देवो न नरो न तिर्यक्स्थावरो न च ।
न देहो नेन्द्रियं नैव मनः प्राणो न नापि धीः ॥
न जडो न विकारी च ज्ञानमात्रात्मको न च ।
स्वस्मै स्वयंप्रकाशः स्यादेकरूपस्वरूपभाक् ॥
चेतनो व्याप्तिशीलश्च चिदानन्दात्मकस्तथा ।
अहमर्थः प्रतिक्षेत्रं भिन्नो ----- ------ --- ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

End:

आत्मान्तरात्मरूपेण स्थितं चानुभवन् सदा ।
भवन्तमनुवर्तेऽयं स्वश्च -- नुगतात्मकः ।।
गच्छन्नमन् समुत्तिष्ठन् प्रवृद्धप्रणयोऽभवन् ।
स्तुवन्नित्यं प्रमोदेन भवेयं भवदन्तिके ।।
यायदात्मकमानन्दात् साम गायन् सहामरैः ।
आसिषीय श्रिया सार्धं भवन्तमभिनिर्विशन् ।।
इत्थं त्वत्सन्निधौ वाचमुक्तां मम दयानिधे ।
सत्यां कुरुष्व दयया तथा तत्प्रतिपादनात् ।।
सौम्यजामातृमुनिना सम्यग्दृष्टामिमां सदा ।
अध्यात्मविषयांचिन्तां परिचिन्वन् भवेत् सुखी ।।

3018 B - अध्यात्मचिन्तामणिः

Begining:

श्रीमद्रामानुजाचार्यस्वस्रीयकुलजन्मने । वात्स्यश्रीवरदार्याय रहस्यार्थविदे नमः ।।
अध्यात्मचिन्तामणिमात्मतत्वप्रकाशकं तत्वविदां च हृद्यम् ।
अभीष्टभावप्रदमात्मभर्तुः स्वरूपकान्त्यै विदधामि नित्यम् ।।

तत्र तावत् मन्त्रत्रयादिकं व्याख्यातुकामः सौम्यजामातृमुनिः सदुपदेष्टृणा गुरुणा परम्परां श्रुतिस्मृतिशिष्टाचरणप्राप्तां वेदादौ प्रणवमिव मन्त्रादावनुसन्धाय नमस्काररहितानाधुनिकान् श्रीवैष्णवान् स्वानुसन्धान व्याजेन अनुशास्ति 'नम' इति । 'स चाचार्यवंशो ज्ञेयः आचार्याणामसावसवित्या भगवत्तः' इति श्रुतेः । 'परम्परामुपदिशेद्गुरुणां प्रथमं गुरुः' इति स्मृतिः । 'गुरुपरम्परया भगवन्तं परमगुरुं प्रणम्य' इति भाष्यकारैरपि नित्येऽभिहितम् । एवं श्रुत्यादि प्राप्तत्वात् परमरहस्यार्थ-व्यापकत्वरूप महोपकारत्वाच्च ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

End:

मुनिनेति मननशीलत्वोक्त्या श्रुतिस्मृतीतिहासपुराणवैष्णवादिसर्वार्थमननशीलत्वं उक्तम्। सम्यग्दृष्टमित्यनेनअन्यथाज्ञान विप्रलम्भादिदोषराहित्यमुच्यते। अध्यात्म-विषयामिति प्रमेयस्यात्यन्तोपादेयत्वमुच्यते । परिचिन्वन्निति मनोहर विषयत्वात् पुनरावृत्तौ सुखातिशयो भवति इत्यर्थः ।।

112 B - अभयप्रदानसारः

Beginning:

श्रीमान्वेंकटनाथार्यः कवितार्किक केसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ।।
जयत्याश्रितसंत्रासध्वान्तविध्वंसनोदयः ।
प्रभावान् सीतया देव्या परमव्योमभास्करः ।।
प्रायः प्रपदने पुंसां पौनःपुन्यं निवारयन् ।
हस्तःश्रीरंगभर्तुर्मामव्यादभयमुद्रितः।।
नमस्तस्मै कस्मैचन भवतु निष्किंचनजन-
स्वयंरक्षादीक्षासमधिकसमिन्धानयशसे ।
सुराधीशस्वैरक्षणकुपितशापायुधवधू-
दृणत्तादुर्जातप्रशमनपदाम्भोजरजसे ।।
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ।।

इत्युक्तप्रकारेण साधुपरित्राणाद्यर्थं परमपुरुषः सर्वेश्वरस्तावत् त्रेतायुगे चक्रवर्ति पुत्रत्वेन अवतीर्णो बभूव। तस्मिन् काले श्रीवाल्मीकिमुनिः भगवान् ब्रह्मपुत्रात् भगवतो नारदमहर्षेः एतदवतारवृत्तान्तं संक्षेपेण श्रुत्वा -

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

यत्क्रौंच मिथुनादेकमवधीः काममोहितम् ।।

End: ...... करतलांबुं दृष्ट्वा सकृदपि तत्प्रहाणमसहन्निव भ्रमाभिनिवेशेन अनुभूयमानस्सन् निरवधिकदयासौहार्दानुरागनिर्भरैरीक्षणैः श्रीवैकुण्ठनाथो मुक्तात्मानमिव तं पश्यन् निरीक्षमाणः करकपातेनेव शीतभूतो ... इतिवत् कुर्वन्नाबभाषे । इतः परं वक्ष्यमाणमखिलं कार्यं विभीषणाभिलषितकैंकर्याभियुक्तमिति दृष्टव्यम्

राकान्ते रुद्धलंकोऽद्भुतफणिकदनो धूम्रदृग्वज्रदंष्ट्रौ
भंक्त्वा कम्पं प्रहस्तं दशमुखमकुटं कुम्भकर्णातिकायौ ।
ब्रह्मास्त्रच्छिन्नकुम्भादिकमथ मकराक्षं च हत्वेन्द्रशत्रुं
जित्वा घस्त्रैस्त्रिभिस्तं सहबलमवधीद्रावणं रामभद्रः ।।
उपदिश्य वेंकटेश स्वहस्तसंसक्ततूलिकातुल्यम् ।
अभयप्रदानसारं गुरुप्रसादात्स्वयं व्यलिखत् ।।

colophon:

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेंकटनाथस्य वेदान्ताचार्यस्य कृतिषु अभयप्रदानसारस्सम्पूर्णः ।।

773 B अर्थपंचकम्

Beginning :

श्रीहयग्रीवाय नमः । श्रीमते रामानुजायनमः ।

प्रपन्नानां श्रीभागवतानां अर्थपंचकज्ञानमावश्यकम् । अत एवोक्तमभियुक्तैः ।

'अर्थपंचकतत्त्वज्ञाः पंचसंस्कारसंस्कृताः ।
आकारत्रयसम्पन्नाः महाभागवतास्स्मृताः ।।' इति ।

आत्मा, ईश्वरः, उपायः, फलम्, विरोधिस्वरूपमित्यर्थाः पंच । तत्र प्रथमोद्दिष्टस्य आत्मनः स्वरूपमुच्यते । ज्ञानवान् भगवददासभूतः आत्मेति ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

'दासभूताः स्वतस्सर्वे ह्यात्मानः परमात्मनः ।
अतोऽहमपि ते दास इति मुक्त्वा नमाम्यहम्' ।।

इति श्रीविष्णुपुराणवचनात् । स च आत्मा पंचविधः । नित्यः, मुक्तः, केवलः, मुमुक्षुः, बद्ध इति भेदात् । तत्र नित्या नाम सर्वदा संसारेच्छारहिताः । ते च अनन्त, गरुड, विष्वक्सेनादयः । मुक्तो नाम --

'जायमानं हि पुरुषं यं पश्येन्मधुसूदनः ।
सात्विकः स तु विज्ञेयःस वै मोक्षार्थचिन्तकः ।।'

इत्युक्तप्रकारेण जन्मकाले भगवत्कटाक्षप्रसरणादेव स्रक्चन्दनावनिता भोग्यवस्तुष्वाशां परित्यज्य सदाचार्योपदेशात् मन्त्रार्थे ज्ञात्वा केवलभगवद्भागवतपराः । केवलो नाम - जन्मान्तरकृतहेतुकभगवत्कृपया तत्र वर्णाश्रमेषु ज्ञानं लबध्वा वर्णधर्मानुष्ठानेन सकलपातकनिवृत्तिद्वारा संजाततत्त्वज्ञानाः ।।

End:

साधनविरोधिर्नाम - साधनान्तरगौरवप्रीतिः । उपेयगौरवे उपायलाघवप्रतिपत्तिश्च । स दोषबाहुल्यप्रतिपत्तिश्च । पुरुषार्थविरोधिर्नाम - पुरुषार्थान्तरप्रवेशः । स्वेच्छानुकूलकैंकर्यप्रतिपत्तिश्च । प्राप्तिविरोधिर्नाम - प्रारबधदेहसम्बन्धः । अनुतापशून्यता भगवदपचारभागवतापचारादिकं च । एवं च मोक्षाधिकारिणाम् अर्थपंचकज्ञानमावश्यकम् ।।

Colophon:

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेंकटनाथस्य वेदान्ताचार्यस्य कृतिषु अर्थपंचकं सम्पूर्णम् ।

1063 B - अर्थपंचकविवेकः

Beginning:

लक्ष्मीशोऽखिललोकेशः कृपाद्धि वेंकटालयः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तनोतु मंगलं पुंसां श्रीनिवासः परात्परः ।।
श्रीरामाय नमस्कृत्वा वक्ष्ये पूर्वोक्तवर्त्मना ।
संग्रहेणार्थकं पंच मुमुक्षूणां मुदावहम् ।।
मुमुक्षुभिः सदा ज्ञेयं परिज्ञानादिसिद्धये ।
प्रत्येकं पंचधा प्रोक्तं प्रबुद्धैरर्थपंचकम् ।।
क्षेत्रज्ञईश्वरश्चैव तदुपायः फलं तथा ।
तद्विरोधीति पंचार्थं प्रत्येकं पंच पंचधा ।।
तत्र जीवः परिज्ञेयः ज्ञातृत्वादि स्वधर्मकः ।
तत्तत्कर्मानुसारेण पंचधावस्थितः पुमान् ।।
बद्धो मुमुक्षुः कैवल्यो मुक्तो नित्य इति क्रमात् ।
तत्र बद्धो ------ ------ रागो हि सः ।।
अन्यथा ज्ञान जनक दुःखानुभव साधनम् ।
------ताद्याश्रयं गार्ह्य भौतिकं देहमाश्रितः ।।

End:

देहधारणामात्रं तु भगवतो ---- ।
प्रसादप्रतिपत्याश्च भुक्तोजीवनमाचरेत् ।।
गुरोर्भावा ----- ----- श्चापि महाप्रभो ।
कैंकर्यनिरतो भूत्वा तु सहवास -------- ।।
आचार्यसन्निधौ स्वस्य अज्ञानाद्यनुकीर्तनम् ।
ईश्वर ---- --- -- - -- -- ।।
पारतन्त्रस्य सन्धाने तदीयानां च सन्निधौ ।
सर्वज्ञत्वं ---- ------ ----- ।।
प्राप्ये चातित्वरायुक्तः प्रापके दृढनिश्चयः ।
देहस्पृहाविमुक्तिश्च स्वरूपेत्यंत ज्ञानवान् ।।
कृतज्ञतोपकारा------प्रतिपत्तिश्चोत्तारका --- ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

इत्थं संधान संयुक्तः ज्ञानानुष्ठानसंयुतः।
प्रा -- देह -- तमनुष्ठानाय यथासुखम् ।।
देहावसाने पूर्वोक्तरीत्याद्युत्कम्पनिर्भरः ।
गत्वार्चिरादिमार्गेण भगवन्तमुपेत्य च ।।

702 E – अष्टश्लोकी

Beginning :

श्रीपराशरभट्टार्यः श्रीरंगेशपुरोहितः। श्रीवत्सांकसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे ।।
अकारार्थो विष्णुर्जगदुदयरक्षाप्रलयकृ
न्मकारार्थो जीवस्तदुपकरणं वैष्णवमिदम् ।
उकारोऽनन्यार्हं नियमयति सम्बन्धमनयो-
स्त्रयीसारस्त्र्यात्मा प्रणव इममर्थं समदिशत् ।।

End:

निश्चित्य त्वदधीनतां मयि सदा कर्माद्युपायान् हरे
कर्तुं त्यक्तुमपि प्रपत्तुमनलं सीदामि दुःखाकुलः ।
एतज्ज्ञानमुपेयुषो मम पुनः सर्वापराधक्षयं
कर्तासीति दृढोऽस्मि ते तु चरमं वाक्यं स्मरन् सारथेः।।
मूलं मनुं मनुपराशरमुख्यजुष्टं मन्त्रद्वयं विजयसारथि सद्वचश्च ।
श्लोकोत्तमैर्विरचिताष्टभिः इष्टदायी भूयान्ममैष सपराशर भट्टनाथः ।।

378 - अष्टश्लोकीव्याख्या - रहस्यटीका

Beginning:

वीरराघवयोगीन्द्रवरिवस्यैकजीवनम् ।
समाश्रयेमहि श्रीमन्नारायणमुनीश्वरम् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रीपराशरभट्टार्यः श्रीरंगेशपुरोहितः ।
श्रीवत्सांकसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे ।।
स्वयं व्यक्ते रंगधाम्नितल्पे वातूलतूलके ।
प्रादुर्भूतौ प्रपद्येऽहं दंपती जगतां पती ।।
तत्वोपायपुमर्थानां व्यक्त्यै भट्टपराशरैः ।
अष्टश्लोकीं व्यरचितां व्याकरोमि यथामति ।।

परमकारुणिकैः भगवद्भट्टपराशरदेशिकैः शब्दादिमोहमहार्णवनिमग्नानां संसारिणां उज्जीवनार्थे रहस्यत्रयस्य तत्वहितपुरुषार्थप्रतिपादकत्वप्रकारः श्रीमदष्टश्लोक्या प्रदर्शितः । यद्यपि वेदान्ताचार्यैः रहस्यत्रयसारादिषु तत्र तत्र अष्टश्लोकीपदतात्पर्यं विप्रकीर्णं प्रतिपादितमिति तत्र वक्तव्यं नावशिष्यते, तथापि बुद्धिसौकर्यार्थं तदेव तात्पर्यं एकत्र लिख्यते । श्रीमदष्टाक्षरमन्त्रः द्वयं चरमश्लोकश्चेत्येतत् रहस्यत्रयमित्युच्यते। तत्राद्यो मूलमन्त्रः समस्तवेदान्तप्रतिपाद्यानां तत्वोपाय-पुरुषार्थानां संग्रहेण प्रतिपादकः।

ऋचो यजूंषि सामानि तथैवाथर्वणानि च ।
सर्वमष्टाक्षरान्तःस्थं यच्चान्यदपिवाङ्मयम् ।।
ऋचो यजूंषि सामानि योऽधीतेऽसकृदंजसा ।
सकृदष्टाक्षरं जप्त्वा स तस्य फलमश्नुते ।। इत्यादि स्मरणात् ।

तत्र च प्रणवस्तावत् जीवात्मनः शेषतैकरसत्वस्वरूपत्वं प्रतिपादयति ।

End:

अत्र अकारार्थो, ईशानां, जगताम्, मत्प्राप्त्यर्थतया इति त्रिभिः श्लोकैः संग्रहेण प्रदर्शितः ।

इति भट्टपराशररचितां अष्टश्लोकीमुदारगम्भीराम् ।
श्रीवत्सांकमुनीन्द्रस्तान् श्रुत्वाभक्त्या चकारतट्टीकाम् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

यदिह रहस्यं विवृतं यद्वा न्यूनं वचोऽधिकं यद्वा ।
कृपया तदिदं सर्वं देवः क्षमतां तथा महान्तोऽपि ।।

Colophon:

इति सर्वतन्त्रस्वतन्त्रस्य श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीवत्सांकश्रीमन्नारायणमुनीन्द्रस्य कृतिषु रहस्यटीका सम्पूर्णा ।।

428- अष्टश्लोकीव्याख्या

Beginning:

श्रीमल्लक्ष्मणयोगीन्द्रवाधूलवरदार्ययोः ।
कृपासुपात्रं वेदान्तिरामानुजमुनिं भजे ।।

सकलशास्त्रनिपुणाः श्रीमद्भट्टार्याः सर्वशास्त्रतात्पर्यभूतरहस्यत्रयार्थम् अखिलचेतनोज्जिजीविषया श्लोकाष्टकेन सन्जग्रहुः । तस्यार्थो यथाश्रुतं यथा सम्प्रदायं यथामति च प्रकाश्यते । अकारार्थो विष्णुः इत्यादि । प्रथमं स्वरूपयाथात्म्यप्रतिपादनपरमूलमन्त्रार्थः प्रकाश्यते । मूलमन्त्रश्च पदत्रयात्मकः। तत्र प्रथमपदभूतोऽपि प्रणवः पदत्रयात्मकः। एवं पदविभागमभिप्रेत्य प्रणवे प्रथमपदभूताकारस्य अर्थमाह - अकारार्थो विष्णुः इति ।

End:

अथवा श्लोकस्य वाक्यत्रयात्मकत्वात् चरमं वाक्यं 'मा शुचः' इति वाक्यमित्यर्थः । सारथेः इत्यनेन माम् इत्यस्यार्थः । अनेन वात्सल्यादिकम् उच्यते। ते इति मानससान्निध्याभिप्रायेण वा श्रीरंगनाथाभिप्रायेण वा सम्बुद्धिः। दृढोऽस्मीति स्वनिष्ठाप्रदर्शनेन प्रबन्धश्च निगमितः ।

Colophon:

वाधूलशेषवंशेन्धुवरदानन्तसूरिणोः ।
किंकरो व्याक्रिया व्याजात् अष्टश्लोकीमबुद्धचत ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

722 अष्टश्लोकीव्याख्या

Beginning:

श्रियःपतिं पतिं लोकत्रयस्य पुरुषोत्तमम् ।
शरण्यं प्रणमाम्याद्यं सकृतं नः सनातनम् ।।
वरदार्यदयालब्धयतीन्द्रविषयक्रियः ।
भट्टार्यदृष्टां कोप्यष्टश्लोकीं विवृणुते यतिः ।।

सकलशास्त्रनिपुणाः श्रीभट्टाचार्याः सर्वशास्त्रतात्पर्यभूतं रहस्यत्रयार्थम् अखिल-चेतनोज्जिजीविषया श्लोकाष्टकेन संजग्रहुः । तस्यार्थो यथाश्रुतं, यथा सम्प्रदायं, यथामति प्रकाश्यते । 'अकारार्थो विष्णुः' इत्यादि । तत्र प्रथमश्लोक-चतुष्टयेन मूलमन्त्रार्थः प्रकाश्यते । अनन्तरश्लोकद्वयेन द्वयार्थः। तदनन्तर श्लोक-द्वयेन चरमश्लोकार्थः इति विभागः तत्र स्वरूपोपायपुरुषार्थेषु फलेच्छया उपायप्रवृत्तेः स्वरूपज्ञानपूर्वकत्वात् प्रथमं स्वरूपयाथात्म्यप्रतिपादनपरमूलमन्त्रार्थः प्रकाश्यते ।

End:

----- एतच्छब्दसन्निहितपरामर्शत्वात् ज्ञानम् इत्यनेन व्रजेत्यस्य बुद्ध्यत्वं च स्मारितम् । 'एतत् ज्ञान उपेयुषो मम इत्यनेन 'त्वा' इत्यस्यार्थः उक्तः । एतदित्यनेन स्वाभिप्रायेण फल्गुता भूयिष्ठान्त इति प्रक्रियया भगवदभिप्रायेणात्यन्तमहत्ता एतदिति हस्तप्रसारणेन सुखकरत्वादिकं च विवक्षितम् । -------व्यवसाययुक्तम् इत्युक्तत्वात् ।।

2767 - अष्टश्लोकीव्याख्या

Beginning:

वेदान्तदेशिककटाक्ष विवृद्धबोधं कान्तोपयन्तृयमिनः करुणैकपात्रम् ।
वत्साऽन्वयार्यमनवद्यगुणैरुपेतं भक्त्या भजामि परवादिभयंकरार्यम् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रीपराशरभट्टार्यः श्रीरंगेशपुरोहितः ।
श्रीवत्सांकसुतश्श्रीमान् श्रेयसे मेऽस्तु भूयसे ।।
वन्देहं घटिकाद्रीशं श्रीनिधिं करुणानिधिम् ।
वाधूलकुलदैवन्तं सतामनवधिं निधिम् ।।
अखिलचिदचिदीशश्श्रीनिवासो दयालुः
स्वपदकमलयुग्म प्रापकसंश्रितानाम् ।
निगमशिखरगम्यो नित्यमव्याजबन्धुः
विलसतु मम चित्ते वेंकटेशो मुकुन्दः ।।
प्रणम्यदेशिकान्सर्वान् अष्टश्लोक्या यथाश्रुतम् ।
अर्थो वैष्णवदासेन बालबोधाय वर्ण्यते ।।

अथ परमकारुणिको भगवान् श्रीपराशरभट्टार्यः सकलचेतनोज्जीवनाय सर्ववेदसारतया स्वरूपोपायपुरुषार्थप्रतिपादकतया च सदा मुमुक्षुभिरनुसन्धेयस्य रहस्यत्रयस्य संप्रदायपरंपराप्राप्तमर्थं दर्शयितुकामः, स्वरूपज्ञानपूर्वकत्वात् अभीष्टोपायप्रवृत्तेः, स्वरूपप्रतिपादनपरं सकलशास्त्ररुचि परिगृहीतं श्रीमदष्टाक्षरं मन्त्रं आदौ विवृणोति चतुर्भिःश्लोकैः, अथ द्वाभ्यां द्वयं, मूलमन्त्रविवरणरूपं स्वरूपानुरूप उपाय पुरुषार्थप्रतिपादनपरं मन्त्ररत्नम्, ततो द्वाभ्यां द्वयविवरणरूपं चरमश्लोकम् ।

End:

कर्मज्ञानमुपासनं च शरणव्रजेति चावस्थितान्
सन्मार्गानपवर्ग साधनविधौ सद्वारकाऽद्वारकान् ।
एकद्रव्याकृतियोगसम्भृति पृथग्भावाऽनुभावानिमान्
सम्यक्प्रेक्ष्य शरण्यसारथिगिरामन्तरेमन्ते बुधाः ।।
शाखानामुपरिस्थितेन मनुना मूलेन स्तब्धात्मकः
सत्ताहेतुसकृज्जपेन सकलं कालं द्वयेन क्षिपन् ।
वेदोत्तंसविहारसारथिदयागुम्फेन विस्रम्भितः
सारज्ञो यदि कश्चिदस्तिभुवने नाथस्सयूथस्य नः ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

इत्यादिकमत्रानुसन्धेयम् । दृढोऽस्मीति स्वनिष्ठा प्रदर्शनेन प्रबन्धश्च निगमितः।

Colophon:

इत्थं बालप्रबोधार्थमष्टश्लोक्या यथाश्रुतम् ।
वर्णितोऽर्थो महात्मानः क्षन्तुमर्हथ साहसम् ।।
इत्यष्टश्लोकीव्याख्या सम्पूर्णा । भट्टर् तिरुवडिगळे शरणम् ।।

2202 E - आकाशाधिकरणवादः

Beginning:

कलशाब्धिकन्यकायाः पतिं यतीन्द्रं च सादरं नत्वा ।
आकाशनयविचारं तनुते कुतुकादनन्तार्यः ।।

'सदेव सोम्येदमग्र आसीत्' इत्यादिकारणवाक्यप्रतिपाद्यमचेतनभिन्नं, ईक्षणवत्वात्, चैत्रादिवत्, तत् जीवभिन्नम्, आनन्दविशेषवत्वात्, व्यतिरेकेण जीववत् इत्यनुमानाभ्यां कारणस्य चिदचिद्वैलक्षण्यमीक्षत्यधिकरणानन्दमयाधिकरणयोः स्थापितम् । यदि च आन्वयव्यतिरेकिपरामर्शयोः स्वाव्यवहितोत्तरानुमितिं प्रति हेतुत्व-स्वीकारे गौरवात् सर्वत्रान्वयव्याप्तिज्ञानादेव अनुमितिः स्वीक्रियते, पृथिवी इतरेभ्यो भिद्यते । गन्धवत्त्वादित्यादावपि पक्षैकदेशे घटादौ साध्यनिरूपितान्वयग्रहसम्भवात्, गन्धादिलक्षणस्य इतरभेदानुमापकत्वस्वरूपव्यावर्तकत्वसम्भवात् । न्यायमतेपि विशेषणज्ञानाभावेन पृथिव्याम् इतरभेद इति साध्यविशेष्यकानुमितिस्वीकारेण विशेषणविशेष्यभावव्यत्यासावश्यकत्वादिति यामुनादिसिद्धान्तरीतिराद्रियते । तदा जीवो जगत्कारणनिष्ठभेदप्रतियोगि, आनन्दविशेषाभावात् इत्यनुमानमेव आनन्द-मयाधिकरणसिद्धम् । सूचितं चेदं नेतरोऽनुपपत्तेरिति सूत्रेण ।।

End:

न च अस्य मन्त्रस्य सर्वतोमुखादावुत्कर्षप्रतिपादकस्य वा त्रिलक्षणा योगः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वेति वाच्यम्; गुणभूतप्रत्ययानुरोधेन प्रधानभूतप्रातिपदिके त्रिविधाया अपि अन्याय्य-कल्पनाया अनुपपत्तेः इत्याशंक्य, उद्गातृशब्दो यौगिक एव, उत्पूर्वकगाधातोः 'उद्गायतीनामरविन्दलोचनम्' इत्यादौ उत्कृष्टगानमात्रे प्रयोगेण सामविशेषे रूढि-विरहात्, ऋत्विग्विशेषे प्रयोगस्य निरूढलक्षणयाऽप्युपपत्तेः । तस्मादुद्गातृशब्दो योगेन त्रितयपरः इति सिद्धान्तितम् । आकाशपदं च शुद्धयौगिकमेवेति तत्त्वमार्ताण्डे उक्तम् । तथा च योगजन्यबोधस्य सर्वसिद्धत्वात् शाब्दप्रत्यक्षयोः युगपदुत्पत्त्यंगीकारेण एकसामग्र्या अपरबुद्धिप्रतिबन्धकताविरहाच्च योगपक्षे न गौरवमिति दिक् ।।

Colophon:

।। आकाशाधिकरणवादार्थः समाप्तः ।।

8 C - आनन्दतारतम्यखण्डनम्

Beginning

शेषाशेषाय निर्दोषगुणभूषाय शेषिणे ।
निर्मलानन्दनिर्माणधर्मणे ब्रह्मणे नमः ।।

इह केचिदेव मनुष्यादीनां मुक्तानां परस्परानन्दे तारतम्यम् आचक्षते । तद्धि -साधन .... मुक्तिसाधनं हि ज्ञानं तत्तारतम्यं च लोकत एवावगतम् । देवानां ऋषीणां च बहुतरतपश्चर्याप्रतिपादकपुराणाद्यवगतं च प्रयत्नाधिक्यं च फला... प्रसंगात् फलवतानामप्रयत्नेन भवितव्यम् । न च प्रयत्नः फलांद्व्यतिरेच्यः । असत्यपि साधनतारतम्ये भगवतः फलधातु वैषम्यनैर्घृण्य प्रसंगश्च । श्रुतयः च अमुमर्थमनुग्रहन्ति । यथा अक्षण्वन्तः कर्णावन्तः सखायोगवतः मनोजवेष्व-समाबभूवुः इति । अत्र हि मनोजवशब्दिते ज्ञाने साम्याभावप्रतिपादनात् ताव ... त्वमवगम्यते । ते च लघुतारतम्यमर्थसिद्धं तथा 'आनन्दस्य मीमांसा भवती'त्यारभ्य

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

मनुष्यादिचतुर्मुखपर्यन्तानां मुक्तानाम् आनन्दतारतम्यम् प्रतिपाद्य 'श्रोत्रियस्य-चाकामहतस्य' इति तत्तन्मुक्तेष्वपि तत्तदानन्दतारतम्यम् इति दिश्यते ।

End:

चतुर्वेदशिखावचनं तु न मुक्तपरम् । तत्र तद्वाचकपदाभावात् । शान्तानन्द-पदशब्द एव चतुर्मुखप्रसिद्धेश्च तत्परमेव पौराणिकवचनानि तु उक्तयुक्तविरोधात् परमसाम्यश्रुतिविरोधाच्च सालोक्यादिमुक्तिपराणि वा जीवन्मुक्तिपराणि उपासना-दशाकालीनानुभवपराणि वा नयोनीत्यन्यत्र विस्तरः ।।

Colophon:

इति श्रीशठमर्षणकुलतिलक श्रीनिवासताताचार्यनन्दनेन लक्ष्माम्बा गर्भशुक्ति-मुक्ताफलेन कौण्डिन्य श्रीनिवासाध्वरिवरकरुणाकटाक्षलक्षितभाष्यतत्वार्थेन निजा-ग्रजाण्णयाचार्यदीक्षितानुग्रहलब्धबुद्धिना प्रतिदिनप्रबन्धनिर्माणधुरन्धरेण यतीन्द्र-हृदयात् गूढार्थप्रकाशकेन श्री श्रीनिवासेन विरचितमानन्दतारतम्यखण्डनं नामप्रकरणं समाप्तम् ।।

1671 - ईशावास्यभाष्यम्

Beginning:

---- अपि तु ज्ञानयोगद्वारा वा साक्षाद्वा प्रथमं परिशुद्धजीवात्म - विषयकयोगमुत्पाद्य पश्चादभक्तियोगांगभूतं प्रत्यगात्मसाक्षात्कारमेव उत्पादयति इति भावः । यत्तु - 'कुर्वन्नेवेह कर्माणि' इत्ययं विधिः अविद्वद्विषय एव न ब्रह्मविद्विषय इति , तस्य विधिनिषेधशास्त्रवश्यत्वाभावात् तस्यब्रह्मज्ञानाग्निना अधिकारः प्रणष्ट इति शांकरं व्याख्यानं ; तत्प्रकरण विरुद्धम् -

'विद्यां चाऽविद्यां च यस्तद्वेदोभयं सह ।
अविद्ययामृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ।।'

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

इत्युपरितनविध्यन्तरविरुद्धं चेति न वेदविदो बहुमन्यन्ते ।।

End:

'अतस्करकरग्राह्यमराजकवशंवदम् ।
अदायादविभागार्हं धनमार्जय सुस्थिरम् ।।'

'अनन्तं बत मे वित्तम्' इत्यादिषु उक्तमलौकिकधनमिहविवक्षितम् ; विद्याप्रकरणानुगुण्यात् । एक एव मन्त्रः प्रकरणादिभिः विशेषितः तत्तदनुगुणमर्थं बोधयतीति सम्यक् न्यायविद इत्याचार्याः । यद्वा अग्ने ! नय - प्रापय इत्यर्थः । सुपथा - अर्चिरादिपथेन, बृहदारण्यकपाठेऽर्चिरादिपथस्य बुद्धिस्थत्वात् ।

'अर्चिरहस्सितपक्षानुदगयनाब्दमरुदर्केन्दून् ।
अपि वैद्युतवरुणेन्द्रप्रजापतीनातिवाहिकानाहुः ।।'

इत्यभियुक्तसंगृहीतेन मार्गेणेति भावः । अर्चिरादिमार्गविवक्षाप्याचार्याभिप्रेतैव । रायेइत्यत्र ब्रह्मणः प्राप्यत्वोपवर्णनात् । ब्रह्मैव हि सुस्थिरमनंतमलौकिकं च धनम् । अत एव तत्र तत्रैवमुच्यते । 'धनं मदीयं तव पादपंकजम्', 'योनित्यमच्युतपदाम्बुजयुग्मरुक्मव्यामोहतः' दुरीश्वरद्वारबहिर्वितर्दिकादुरासिका--------

2588 B- ईशावास्योपनिषद्व्याख्या

Beginning:

येनावास्यमिदं सर्वं चेतनाचेतनात्मकम् ।
विशुद्धसद्गुणौघं तं वासुदेवमुपास्महे ।।
सर्वेशानास्सहजमहिमा सर्वभूतान्तरात्मा
सर्वान्दोषान्स्वयमतिपतन् सर्वविद्यैकवेद्यः।
कर्माध्यक्षः कलुषशमनः कोऽपि मुक्तोपभोग्यः
सिद्धोपायः स्फुरति पुरुषो वाजिनां संहितान्ते ।।
ईशावास्यमिदं सर्वम् इत्यादि यदनूच्यते ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शिष्यं प्रतिगुरोरेतत् ब्रह्मविद्यानुशासनम् ।।
सम्भूतोदाहृतं सर्वं विनियोगपृथक्त्वतः ।
विद्यार्थं स्यादिति व्यक्तं निबन्धोऽस्य तदन्ततः ।।

तत्र प्रथममधिचिकारयिषितस्य स्वतन्त्रात्मभ्रमादिपरिजिहीर्षया सर्वस्य परमपुरुषायत्तस्वरूपस्थितिप्रवृत्तित्वमभिप्रेत्याह - 'ईशावास्यमिदं सर्वं यत् किं च जगत्यां जगदिति' । इदं - तत्तत् प्रमाणसिद्धमीश्वरव्यतिरिक्तं सर्वं चिदचिदात्मकं ईशा 'ज्ञाज्ञौ द्वावजावीशनीशौ' इत्यादिषु जीवात् अत्यन्त विलक्षणतया प्रख्यातेन सर्वनियन्त्रा पुरुषोत्तमेन वास्यम् - व्याप्यम् इत्यर्थः ।।

End:

अन्यदिति संग्रहेणोक्तं विवृणोति । 'विद्यां च अविद्यां च यस्तद्वेद उभयं सह इति । यः - यथावस्थितोपदेशवान् । विद्यां - परमात्मोपासनरूपां । अविद्यां - तदंग-भूतकर्मात्मिकां चैतदुभयं परस्परविरोधप्रसंगरहितम् । सह वेद - अंगांगिनोरनुष्ठेयत्व-साम्यादुभयं सह वेद इत्यविशेषेण वेदनीयत्वोक्तिः । न पुनः हेयोपादेययोः ज्ञातव्यत्वसाम्यात् । पूर्वमविद्यायाः निन्दनात्तदौचित्यमिति चेत्, तर्हि विद्याया अपि निन्दिततया हेयद्वयसमुच्चयोक्तिप्रसंगः । तथा सति उत्तरवाक्यमपि विघटते । 'अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुत' इति ।

640 D - ऊर्ध्वपुण्ड्रचक्रांकननिर्णयग्रन्थः

Beginning:

उपवीतिनमूर्ध्वपुण्ड्रवन्तं त्रिजगत्पुण्यफलं त्रिदण्डहस्तम् ।
शरणागतसार्थवाहमीडे शिखया शेखरिणं पतिं यतीनाम् ।।
श्रुतिस्मृतीतिहासैश्च पुराणैश्चाभिनन्दितम् ।
ऊर्ध्वपुण्ड्रन्मुदाधार्यं द्विजातीनामिति स्थितिः ।।

तथा हि वाजसनेयके तावत् शतपथब्राह्मणे- 'अथ कात्यायनेति होवाच ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

परंब्रह्मेत्येको देवो विश्वतश्चक्षुः इति विश्वात्मा विश्वतो बाहुः उत स एष पुरुषो-ऽन्तर्यामोऽन्तर्यामस्य 'विश्वतो मुखस्सर्वात्माविश्वतस्पात् इति 'नारायणात् ब्रह्मा जायते नारायणाद्रुद्रो जायते' इति संबाहुभ्यां नमति सम्पतत्रैः द्यावाभूमी जनयन् देव एकः पुरुषोऽन्तर्यामोऽन्तर्यामिः स आदित्यस्तेजो भवति स आदित्यलोको भवति स विष्णुरेव भवति स विष्णुलोको भवति । तप्तं चक्रं द्विभुजेधार्यमित्यग्निहोत्रमेव लोको भवत्यूर्ध्वपुण्ड्रमालिखेत् तस्माद्धिरेकं भवति, भू स्वयंभूः ब्रह्मणस्सायुज्यं सलोकतां जयति य एवं वेद' । अथ कात्यायनेति होवाच - आदित्यः पुरुषः स आदित्यः कस्मिन् प्रतिष्ठितं च अध्यात्मं च प्रतिष्ठितं वेद प्रतितिष्ठति ----- ।

End:

केशवाराधनं हित्वा नैव यान्ति परां गतिम् ।
जन्मान्तरसहस्रेषु यस्य स्यात् बुद्धिरीदृशी ।।
दासोऽहं वासुदेवस्य देवदेवस्य शार्ङ्गिणः ।
स याति विष्णुसालोक्यं पुरुषो नात्र संशयः ।।
किं पुनस्तद्गतप्राणाः पुरुषास्संयतेन्द्रियाः ।
नमोऽस्तु वासुदेवाय पुराणायाति वेधसे ।।
जगदुत्पत्तिसंहारस्थितिमूलाय चक्रिणे ।
त्वमीशस्सर्वभूतानां तथैव च निरीश्वरः ।।
नमस्ते वेदवेदांगविस्तृतायात्मभूतये ।
त्वमेव देवदेवेश शरणं कैटभार्दन ।।
अजरममरमेकध्येयमाद्यन्तशून्यम्
सगुणमगुणमाद्यं स्थूलमत्यन्तसूक्ष्मम् ।
निरुपममुपमेयं योगिविज्ञानगम्यम्
त्रिभुवनगुरुमीशं त्वां प्रपन्नोऽस्मि विष्णो ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

2759 B - ऐतरेयोपनिषत् टीका

Beginning:

आकाशस्येकत्वेऽपि प्रदेशभेदात् बहुत्वमुक्तः पृथिवीमरः । अन्तरिक्षलोकस्याधः- अधस्ताद्विद्यमानः भूलोकः - पृथिवीमर इत्युच्यते । पृथिव्यां विद्यमानानि भूतानि विशेषेण म्रियन्ते इति पृथिवी मरो भूलोकः सृष्टः। अस्याः अधस्तात् अधो भागे विद्यमानाः याः आपः पंचमहाभूतसहिता अपि उदकप्रधानत्वात् ते लोकाः पाताळलोकस्थजनैः आप्यमानत्वात् वा आप्नोतेर्धातोरर्थयोगाच्च ते अधोलोकाः अब्लोका इत्युच्यन्ते ।

End:

---- अतः श्रीमन्नारायण एव सर्व ब्रह्मविद्भिः परमात्मत्वेनोपास्य इति भावः।

Colophon:

इति श्रीमच्छ्रीभाष्यं जगन्नाथाचार्य सूनु श्रीरामानुजाचार्यस्य कृतिषु दशोपनिषदन्तर्गतऐतरेयोपनिषद्वितीयारण्यकेषष्ठाध्यायप्रतिपदार्थदीपिकाव्याख्या अष्टमावतारिका समाप्ता ।।

2759 A - ऐतरेयोपनिषद्विवरणम्

Beginning:

श्रीरस्तु

अभिवन्द्य महोदारामस्मद्गुरुपरम्पराम् ।
किञ्चित्करोमि लोकस्य वाचो विभवतोऽधुना ।।
विशिष्टाद्वैतसिद्धान्त प्रतिष्ठापनदेशिकैः ।
ऐतरेयोपनिषदो भाष्यं पूर्वैर्विनिर्मितम् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

नाद्यावध्युपलब्धं यत् जिज्ञासूनां कृते ततः ।
सिद्धान्तवर्त्मनैतस्याः वृत्तिर्लघ्वी वितन्यते ।।

अथ एतरेयोपनिषदं व्याख्यास्यामः । सेयमितरापुत्रेण एतरेयनाम्ना सन्दृष्ट इत्यतः ऐतरेयोपनिषदिति प्रथते । उपनिषच्चेयमैतरेयारण्यकस्य ऋग्वेदीयस्य भागत्रयपरिकर्मितस्य द्वितीयेभागे तुरीयपंचमषष्ठसप्तमैः चतुर्भिरध्यायैः सम्पूर्णा। अस्मिंश्चारण्यके प्रथमे भागे संवत्सराख्य सत्रविशेषः महाव्रताख्यकर्मविशेषश्च प्रतिपादितौ । द्वितीये भागे त्रिभिरध्यायैः प्राणविद्या प्रपंचिता । ततश्चतुर्भिरध्यायैः ब्रह्मविद्या प्रस्तूयते । तावता सप्तभिरध्यायैः द्वितीयमारण्यकं संविभक्तम् । तृतीये तु भागे संहितोपास्तयः ब्रह्मविद्यांगभूता समुपदिश्यन्ते ।।

End:

तथा वक्तारमाचार्यम् अवतु - बोधकता सामर्थ्यप्रदानेन पालयतु । पुनः कथनं फलविशेषाय । अध्यायारण्यक समाप्तिद्योतनाय अवतु वक्तारमित्यभ्यासः । अनेन मन्त्रपाठेन विद्योत्पत्तेः प्राक् विद्याप्राप्तिप्रतिबन्धकजातविघ्नपरिहारः । अनन्तरं च असंभावना विपरीतसंभावनाजनकीभूतपापरूपविघ्नपरिहारः । शिष्यस्य फलं विद्याप्राप्तिः, आचार्यस्य फलं प्रवचनरूपभगवत्कैंकर्यलाभः इति यथायथं विवेकोऽनुसंधातव्यः । इति सर्वं भद्रम् ।।

Colophon:

इत्यैतरेयोपनिषत् वृत्तिमल्पाक्षरां व्यधात् ।
लक्ष्मीपुरं श्रीनिवासः प्रियतां सश्रियः पतिः ।।
इत्यैतरेयोपनिषद्विवरणे तुरीयोध्यायः ।।

ऐतरेयोपनिषत्समाप्ता ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

1210 C - कूरेशविजयः

Beginning:

श्रीमते रामानुजाय नमः

गायत्रीबोधितत्वाद्दशरथतनयास्थापिताराधितत्वात्
शौरेः कैलासयात्राव्रतमुदिततयाभीष्टसन्तानदानात् ।
नेत्रेण स्वेनसाकं दशशतकमलैर्विष्णुना पूजितत्वात्
तस्मै चक्रप्रदानादपि च पशुपतिस्सर्वदेवप्रकृष्टः ।।
कन्दर्पध्वंसकत्वाद्गरलकबलनात्कालगर्वापहत्वात्
दैतेयावासभूमि त्रिपुरविदलनात् दक्षयागे जयित्वात् ।
पार्थस्य स्वास्त्रदानात् नरहरिविजयान्माधवे स्त्रीशरीरे
शास्तु सम्पादकत्वात् अपि च पशुपतिः सर्वदेवप्रकृष्टः ।।

End:

यद्वास्वांगार्थदानाद्धिमगिरिदुहितुः केशवस्याविशेष
स्वांगार्थस्य प्रदानान्मनसिजविमतस्याशरीरत्व सिद्धेः ।
वैशिष्टस्याप्रसंगाद्भवत उभयतश्चिद्विवर्तापवर्गात्
युक्तत्वादेवशक्तेरपि न पशुपतिर्विष्णुरेव प्रकृष्टः ।।
कूरेन्द्रेणेति स्वार्थैस्सदसिशतविधैर्दूषणैस्सप्तरात्रम्
यादक्षिप्ताविपक्षाः प्रतिवचनजडाविस्मयान्मौनमापुः ।
तदद्दृष्ट्वा चैत्रघोषं व्यतनुत समहापूर्णनामार्यवर्यः
श्रुत्वाचैतत्तदानीं समजनिविमनाश्चोळभूपस्समन्त्री ।।

Colophon:

एवं चोलभूपसभायां कूरेशस्य च अनेकमायावादिना परस्परजयेच्छया विवादं कुर्वाणेषु कूरेशोऽपि अनेकवेदशास्त्रपुराणेतिहास उपनिषद्वाक्यैः उपन्यासं कृत्वा जितवान् तत् कूरेशविजयनामकं ग्रन्थमिदम् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

1210 B - कूरेशविजयव्याख्या

Beginning:

श्रीमते रामानुजाय नमः

प्रथमतः परमतोपात्तं दूषणं 'गायत्री'ति, 'प्रख्याते'ति श्लोकद्वयेन दशदूषणैर्निराचष्टे । गायत्रीति । गायन्तं त्रायन्ते यस्मात् गायत्री, तेन कथ्यते, न गायत्र्याः परमो मन्त्र इति । न मातुः परदेवता, ब्रह्मवर्चसकामस्तु गायत्री वेदमातरं, इत्यादि प्रमाणप्रसिद्धिमत्यां गायत्र्यां कृत्पूर्वायाकृत्याक्रियासन्ध्यारूपा तस्यां च, कृत्याक्रियाादेवतयोरिति नानार्थः । तत्पूर्वाचमने च विधिपुरस्कारेषु स्नानप्रायश्चित्त-प्राणायामादिषु तत्पुरस्कृतसंकल्पकार्येषु च एतादृशेषु वैदिककार्येष्वित्यर्थः । गोविन्दविष्णवाख्यानां नाम्नां तस्य सर्वात्मकत्वेन सर्वशब्दवाच्यत्वेन च अपर्यवसानवृत्त्या वा तादृशविलम्बमसहमानया लोकव्युत्पत्त्या वा प्रवृत्तानां, देवसवितृप्रणवब्रह्मसत्यकेशवनारायणगोविन्दहर्यादीनां प्रयोगात्,

गंगा गीता च गायत्री तुलसीगोपिचन्दनम् ।
एकादशीहरेर्नाम सालग्राम शिलार्चनम् ।।
वैदिकाष्टकमेतानि नियमेन दिने दिने ।
ये भजन्ति कलौ नित्यं तेषामपि नमो नमः ।।

इत्युक्तरीत्या सद्भिः आराध्यदेवतात्वेन प्रसिद्धेः विष्णुरेव सर्वदेवताभ्यः प्रकृष्टः, एवं सर्वत्रान्वयः ।।

End:

प्रालयेति । 'योनिपीठस्य पार्वत्यवयवरूपाल्लिंगपुराणोक्तात्पुंसः' उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः इत्युक्तस्य तत् रूपताया अयोगत्वाच्च, दृश्यमानायाः पृथगवस्थानयोग्यत्वप्रसिद्धेः नित्यं च वैशिष्ट्यरूपस्य अद्वयमतवचन अयुक्तभावाच्च विशिष्टाद्वैतस्य शिवस्य अत्र स्वांगलिंगाविरतयुततया स्वांगं यल्लिंगं तेनानवरतयुक्ततया चक्रिणो युक्तेरयुक्तेश्च प्राणलिंगशैवप्रसिद्धेः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

यद्वेति---वैशिष्टचप्रसंगमेवान्यथा कथयति । पार्वत्याः, स्वांगार्थप्रदानात् - हरिहरनाथावतारे शेषांगार्थस्य केशवाय दानादेव उभयथा वैशिष्टयाभावात्, शम्भोरशरीरत्वप्रसिद्धेश्चपरमरहस्यमाकृष्याहभगवतस्तवमतेउभयथापिशक्तेर्नित्य-शक्तेर्भूतचित्स्वरूपापवर्गायुक्तत्वादेव न पशुपतिः विष्णुरेव प्रकृष्टः इति निश्चयः ।

212 - D गद्यत्रयम्

Beginning:

श्रीमते रामानुजाय नमः

वन्दे वेदान्त कर्पूरचामीकरकरण्डकम् ।

रामानुजार्यमार्याणां चूडामणिमहर्निशम् ।।

ओम् । भगवन्नारायणाभिमतानुरूपस्वरूपगुणविभवैश्वर्यशीलाद्यनवधिकाति-शयासंख्येयकल्याणगुणगणां पद्मवनालयां भगवतीं श्रियं देवीं नित्यानपायिनीं निरवद्यां देवदेवदिव्यमहिषीम् अखिलजगन्मातरम् अस्मन्मातरम् अशरण्यशरण्याम् अनन्यशरणः शरणमहं प्रपद्ये ।

End:

ततश्चानुभूयमानभावविशेषः, निरतिशयप्रीत्या अन्यत् किंचित् कर्तुं द्रष्टुं स्मर्तुमशक्तः, पुनरपि शेषभावमेव याचमानः, भगवन्तमेव अविच्छिन्नस्रोतो-रूपेणावलोकनेनावलोकयन्नासीत ।

ततो भगवता स्वयमेवात्मसंजीवनेनावलोकनेनावलोक्य सस्मितमाहूय समस्त-क्लेशापहं निरतिशयसुखावहमात्मीयं श्रीमत्पादारविन्दयुगलं शिरसि कृतं ध्यात्वा अमृतसागरान्तर्निमग्नस्सर्वावयवः सुखमासीत ।।

Colophon:

इति श्रीभगवद्रामानुजविरचिते गद्यत्रये वैकुण्ठगद्यं समाप्तम् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

300-c गद्यत्रयम्

Beginning:

श्रीमते रामानुजाय नमः ।
श्रीमान्वेंकटनाथार्यःकवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ।।
यो नित्यमच्युतपदाम्बुजयुग्मरुक्म
व्यामोहतस्तदितराणि तृणाय मेने ।
अस्मद्गुरोः भगवतोऽस्य दयैकसिन्धोः
रामानुजस्य चरणौ शरणं प्रपद्ये ।।
वन्दे वेदान्तकर्पूरचामीकरकरण्डकम् ।
रामानुजार्यमार्याणां चूडामणिमहर्निशम् ।।
चिदचित्परतत्त्वानां तत्त्वयाथात्म्यवेदिने ।
रामानुजाय मुनये नमो मम गरीयसे ।।

771-A गद्यत्रयम्

Beginning:

श्रीमते रामानुजाय नमः ।
लक्ष्मीपतेर्यतिपतेश्च दयैकधाम्नो योऽसौ पुरा समजनिष्ठ जगद्धितार्थम् ।
प्राच्यं प्रकाशयतु वः परमं रहस्यं संवाद एष शरणागतिमन्त्रसारः ।।

575-A गद्यत्रयम् (शरणागतिगद्यम्)

Beginning:

यो नित्यमच्युतपदांबुज + रामानुजस्य चरणौ शरणं प्रपद्ये ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वन्दे वेदान्तकर्पूरचामीकरकरण्डकम् ।
रामानुजार्यमार्याणां चूडामणिमहर्निशम् ।।

भगवन्नारायणाभिमतानुरूपस्वरूपरूपगुणविभवैश्वर्यशीलाद्यनवधिकातिशयासंख्येय-कल्याण-गुणगणाम्, पद्मवनालयाम्, भगवतीम्, श्रियम्, देवीम्, नित्यानपायिनीम्, निरवद्याम्, देवदेवदिव्यमहिषीम्, अखिलजगन्मातरम्, अस्मन्मातरम्, अशरण्य-शरण्याम् अनन्यशरणः शरणमहं प्रपद्ये ।

End:

अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन, रामो द्विर्नाभिभाषते-
सकृदेव प्रपन्नाय तवास्मीति च याचते ।
अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ।।
सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ।।

इति मयैव हि उक्तम् । अतस्त्वं तव तत्त्वतो मद्ज्ञानदर्शनप्राप्तिषु निस्संशयस्सुखमास्स्व ।

Colophon:

इति शरणागतिगद्यं समाप्तम् ।।

2323 - A गद्यत्रयम् (शरणागतिगद्यव्याख्या)

Beginning:

उपायोपेयपरं द्वयं विशदीक्रियते । तत्र प्रतापोष्मलपितृत्वदुरासदभगवत्स-माश्रयणं श्रीमच्छब्दविवरणमुखेनाभिधीयते । यद्वा श्रियं प्रपद्य तत्सन्निधौ मूलमन्त्रेण स्वरूपानुरूपपुरुषार्थप्रार्थनं तदुपायप्रार्थनापर्यन्तं कृत्वा, तदनुज्ञया द्वयमनुसन्धीयत इति पूर्वाचार्यानुसन्धानमनुस्मरन् प्रथमं श्रियं प्रपद्यते भगवदिति । भगवन्नारायण-शब्दौ गुणविभूतिपौष्कल्यपरौ द्विषट्काष्टार्णयोरपि तत्साहित्यज्ञानपरौ च ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अनुरूपेऽनभिमतिरननुरूपे चाभिमतिश्च दृश्यत इति तद्व्युदासाय अभिमतानु-रुपशब्दौ ।

End:

अनृतस्यानुक्तत्वमाह अनृतमिति । उक्तस्य दृढत्वमाह रामो द्विरिति । न केवलं तव,अन्येषामपि मयोक्तमित्याह सकृदिति । अवतारद्वयेऽपि वचनद्वयम् । अतः भक्तिसाध्यं प्रपत्त्यैव लभ्यमिति निर्भरेण त्वया भवितव्यमित्याह अतस्त्वमिति । आचार्यतो लब्धं ज्ञानं यथा तत्त्वविषयमिति न संशयः, तथा भाविन्योर्दर्शनप्राप्त्योरपि निस्संशय इत्यर्थः ।

Colophon:

इति श्रीहारीतकुलतिलकस्य श्रीरंगराजदिव्याज्ञालब्धश्रीवेदव्यासभट्टारका-परनामधेयस्य श्रीमत्सुदर्शनाचार्यस्य कृतिषु श्रुतप्रकाशिकाभिधानं शरणागतिगद्यव्याख्यानं सम्पूर्णम् ।।

211- गीताभाष्यम्

Beginning:

श्रीमते रंगनाथ महागुरवे नमः । श्रीहयग्रीवाय नमः ।
श्रीमते वेदान्तगुरवे नमः । अस्मद्गुरुभ्यो नमः ।।
यत्पदाम्भोरुहध्यानविध्वस्ताशेषकल्मषः ।
वस्तुतामुपयातोऽहं यामुनेयं नमामि तम् ।।

श्रियःपतिः, निखिलहेयप्रत्यनीककल्याणैकतानः, स्वेतरसमस्तवस्तु-विलक्षणानन्तज्ञानानन्दैकस्वरूपः, स्वाभाविकानवधिकातिशयज्ञानबलैश्वर्यवीर्य-शक्तितेजः प्रभृत्यसंख्येयकल्याणगुणगणमहोदधिः, स्वाभिमतानुरूपैकरूपाचिन्त्य-दिव्याद्भुतनित्यनिरवद्यनिरतिशयौज्ज्वल्यसौन्दर्यसौगन्ध्यसौकुमार्यलावण्ययौवना-द्यनन्तगुणनिधिदिव्यरूपः, स्वोचितविविधविचित्रानन्ताश्चर्यनित्यनिरवद्यापरिमित-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

दिव्यभूषणः, स्वानुरूपासंख्येयाचिन्त्यशक्ति नित्यनिरवद्यनिरतिशयकल्याणदिव्यायुधः, स्वाभिमतानुरूपनित्यनिरवद्य स्वरूप रूपगुणविभवैश्वर्यशीलाद्यनवधिकातिशयासंख्येयकल्याणगुणगणश्रीवल्लभः, स्वसंकल्पानुविधायिस्वरूपस्थितिप्रवृत्तिभेदाशेषशेषतैकरतिरूपनित्यनिरवद्यनिरतिशयज्ञानक्रियैश्वर्याद्यनन्तगुणगणैः परिमितैः सूरिभिरनवरताभिष्टुतचरणयुगलः,वाङ्मनसापरिच्छेद्यस्वरूपस्वभावस्वोचितविविधविचित्रानन्तभोग्यभोगोपकरणभोगस्थानसमृद्धानन्ताश्चर्यानन्तमहाविभवानन्तपरिमाण नित्यनिरवद्याक्षरपरमव्योमनिलयःविविधविचित्रानन्तभोग्यभोक्तृवर्गपरिपूर्णनिखिलजगदुदयविभवलयलीलः, परं ब्रह्मभूतः पुरुषोत्तमो नारायणः, ब्रह्मादिस्थावरान्तमखिलं जगत् सृष्ट्वा, स्वेन रूपेणावस्थितो ब्रह्मादिदेवमनुष्याणां ध्यानाराधनाद्यगोचरः, अपारकारुण्यसौशील्यवात्सल्यौदार्यमहोदधिः, स्वयमेव रूपं तत्तत्सजातीयसंस्थानं स्वस्वभावमजहदेवं कुर्वन् तेषु तेषु लोकेष्ववतीर्यावतीर्य तैः तैराराधितस्तत्तदिष्टानुरूपं धर्मार्थकाममोक्षाख्यं फलं प्रयच्छन्, भूभारावतारणापदेशेनास्मदादीनामपि समाश्रयणीयत्वायावतीर्योर्व्यां सकलमनुजनयनविषयतांगतः, परावरनिखिलजनमनोनयनहारिदिव्यचेष्टितानिकुर्वन्,पूतना-शकटयमलार्जुनारिष्टप्रलम्ब-धेनुक-कालिय-केशि-कुवलयापीड-चाणूर-मुष्टिक-तोसलकंसादीन् निहत्य अनवधिकदयासौहार्दानुरागगर्भावलोकनालापामृतैर्विश्वमाप्याययन्, निरतिशयसौन्दर्यसौशील्यादिगुणगणाविष्कारेण अक्रूरमालाकारादीन् परमभागवतान् कृत्वा, पाण्डुतनययुद्धप्रोत्साहनव्याजेन परमपुरुषार्थलक्षणमोक्षसाधनतया वेदान्तोदितं स्वविषयं ज्ञानकर्मानुगृहितं भक्तियोगमवतारयामास ।।

End:

यत्र योगेश्वरः कृत्स्नस्योच्चावचरूपेणावस्थितस्य चेतनस्याचेतनस्य च वस्तुनो ये ये स्वभावयोगाः, तेषां सर्वेषां योगानामीश्वरः, स्वसंकल्पायत्त स्वेतरसमस्तवस्तुस्वरूपस्थितिप्रवृत्तिभेदः, कृष्णः वसुदेवसूनुः, यत्र च पार्थो धनुर्धरः, तत्पितृष्वसुः पुत्रः तत्पदद्वन्द्वैकाश्रयः, तत्र श्रीर्विजयो भूतिर्नीतिश्च ध्रुवा निश्चला इति मतिर्ममेति ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

Colophon:

इति श्रीरामानुजविरचिते श्रीमद्गीताभाष्ये अष्टादशोऽध्यायः समाप्तः ।।

Scribe:

श्रीरामभद्रः ।

105 गीताभाष्यार्थसंग्रहः

Beginning:

शुभमस्तु

श्रीमद्यामुनमुनिवर रामानुजमुनियोगिवेदचूडार्यान् ।

कलये किलयैर्नीता हरिणा गीताति भोग्यतां नीता ।।

इह खलु भगवान् सर्वेश्वरः नारायणः स्वयमेव अवाप्तसमस्तकामोऽपि अपारकारुण्यसौशील्यादिगुणपरवशः परमपुरुषार्थिजनसार्थकृतार्थयितुं उर्व्यां वसुदेवगृहेवतीर्य साधुपरित्राणं दुष्कृद्विनाशनं च कुर्वन् पाण्डुतनय युद्धप्रोत्साहनव्याजेननिरतिशयपुरुषार्थलक्षणमोक्षसाधनतयावेदान्तविहितंस्वविषय-ज्ञानकर्मयोगसाध्यं भक्तियोगमवतारयामास गीतोपनिषदा । तामेतां भगवान् भाष्यकारो ज्ञानसंशयविपर्ययनिवृत्तये श्रीमद्भाष्ये व्याचक्रे । तत्तात्पर्ये श्लोकारूढं कुर्वन् इदमपि श्रीमद्भागवतकैंकर्यमिति तथा प्रयते, क्षन्तव्यो महापराधः। तत्र भगवत्प्रवर्तितगीतोपनिषत्प्रस्तावायादौ उपोद्घाततया अर्जुनस्य शोकमोहादिकं निरूपयितुं संजय धृतराष्ट्रसंवादमाह- 'धृतराष्ट्र उवाच' इति ।

End:

---------कृष्णः वसुदेवसूनुः यत्र धनुर्धरः पार्थः तत्र श्रीः - राज्यादिभोगसमृद्धिः, विजयः - शत्रुनिरासः , भूतिः - ऐश्वर्यम्, उत्पन्नयाः समृद्धेः उत्तरोत्तराभिवृद्धिरूपं भवनं, नीतिः अर्थशास्त्रजन्य कर्तव्यनिश्रेयचोदिता धर्मविरुद्धावृत्तिः, ध्रुवा - निश्चला, इति मम मतिः - समीचीनबुद्धिः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

Colophon:

श्रीशैलबुक्कपट्टणयन्नाच्चान्दासविलिखिते अध्यायः ।
श्रीमद्गीताभाष्यार्थसंग्रहे अष्टादशो वृत्तः ।।

Scribe:

श्रीमते श्रीशैलाम्बोधेः षठमर्षणगोत्रोद्भवः श्रीराघवार्यतनूजेन रम्याम्बुनिधि-पट्टणवासिना रामचन्द्रेन लिखितोऽयं श्रीमद्गीताभाष्यार्थसंग्रहः ।।

116 गीताभाष्यार्थसंग्रहः

Beginning:

श्रीकृष्णांघ्रिसरोरुहं निजधनं ध्यात्वा तथैवार्जुनम्
पूर्वाचार्यपरम्परां नृमृगराट् ताताख्य दासो नमन् ।
आनन्दाब्धि ईशाख्यमासि धवले पक्षे दिनेचादिमे
गीताभाष्यरहस्य संग्रहमिमं तत्प्रीतयेऽलीलिखत् ।।
श्रीकृष्णाय वासुदेवाय पार्थसारथये परमपुरुषाय नमः ।
सर्वज्ञसर्वशक्ते करुणासिन्धोजगत्पते कृष्ण ।
त्वत्पादपद्मभक्तिं ---- पाहि पार्थमिवमां च ।।

8 G गुणमीमांसा

Beginning:

श्रियःपतिं सदोपास्यकल्याणगुणसागरम् ।
समस्तचिदचिद्वस्तुशेषिणं विभुमाश्रये ।।

अथातो गुणमीमांसा । अथशब्दः आनन्तर्यार्थे इह गृह्यते । नाधिकाराद्यर्थः । कस्मात्? प्रसिद्धिप्राचुर्यात् वृत्तिविशेषप्रतिपत्तेः । प्रसिद्धिस्सापवादेति चेत्, उपास्य

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

आनन्तर्यात् गुणानाम् उपासनार्था हि गुणास्तदुत्तरमुपदिश्यन्ते । तदाह श्रुतिः - 'शान्त उपासीत । मनोमयः प्राणशरीरःभारूपस्सत्यकामस्सत्यसंकल्पः' इत्यादिः, तदिह निरूपितः । उपासने तत एव हेतोः गुणविचार आरभ्यते । निर्विषयोपासनसिध्यभावात् । ननु च 'भोः परं ब्रह्मैव तद्विषय' इति किं गुणे ? सत्यम्, तद्धि सगुणं प्रतिपन्नम् । निमित्तान्तर्भावात् 'सत्यं ज्ञानमनन्तं हि ब्रह्म । आनन्त्यं च अपरिच्छिन्नगुणता तथा च निर्वचनं नात्र गुणानां गच्छन्ति तेन नातोऽयमुच्यत' इति । श्रीमद्भाष्यं च 'ब्रह्मशब्देन च स्वभावतो निरस्तनिखिलदोषानवधिकातिशयासंख्येयकल्याणगुणगणः पुरुषोत्तमो अभिधीयत' इति ।।

End:

अग्रशब्दकालरूपविजातीयस्य कृतहानाकृताभ्यागमदोषनिर्हरणाय जीवानादित्वस्य सृष्टयनुगुणसार्वज्ञादेश्च श्रुत्यर्थाभ्यामधिगतस्यावश्याभ्युपगन्तव्यतया च निषेधायोगेन अद्वितीयपदस्य द्वितीयमात्रनिषेधपरत्वयोगात् । त्वयाऽपि हि 'जीव ईशो विशुद्धाऽचित्तथा जीवेशयोर्भिधा । अविद्यातच्चितोर्योगं षडस्माकमनादायः' इति ह्युक्तम् । न च स्वाभाविकरूपगतमिदमद्वितीयत्वमिति कल्पयितुं शक्यम् । 'सदेवेद' 'तदैक्षत' इति विशिष्टप्रवाहमध्यगताद्वितीयपदमात्रे निर्विशेषस्वरूपमात्रपरत्वकल्पनानुशेषात् लोकप्रमाणसिद्धोपादाननिमित्तसापेक्षत्वव्युदासस्य तदपेक्षितेति वाक्यावगतनिमित्तोपादानैक्यावगत्यपेक्षितस्य विधानौचित्याच्च निर्विशेषत्वस्य कालाऽनवच्छिन्नतयाऽग्रकालावच्छिन्नत्वस्य तत्र अननुगुणत्वाच्च ------

2417 B - गुणसत्यत्ववादः

Beginning:

श्रीमद्वरप्रदाचार्यसूनुं तत्पदसंश्रयम् ।
कौशिकान्वयजीवातुं चंपकेशगुरुं भजे ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कल्याणमावहतु कल्पसहस्रकोटिं
श्रीकेशवस्य महिषी यतिराजवल्ली ।
उद्भूतभूतपुरपुण्यकृतावतारा
माद्दृग्जनप्रवणमाद्यकटाक्षधारा ।।
मिथ्यावादिमदाजसीजुरमुधासंरम्भकुम्भस्थली ।
निर्देश ---- भवकीर्तिमौक्तिकमणी शुभ--कृतगर्भ -- ।।
सन्त -- स्फुरदत्युदग्रनरवरो वेदान्तशैलाश्रयः ।
श्रीरामानुजकेसरी विजयते प्रोद्दण्डविक्रीडितः ।।

सगुणं ब्रह्म अनेकश्रुतिभिः प्रतिपाद्यते । तत्र निर्गुणमित्येवं पूर्वपक्षाभिमन्य------ भेदानां ब्रह्म ---- मिथ्यात्वमनुमीयते । 'निर्गुणन्निष्कलं शान्तमन्वितं यत् तथा श्रुतिः । प्रबूते यत्र हित्वाऽऽच्चैः तथा भेदो निषिध्यते' । गुणश्रुतिरूपा----समर्थितः, अथ द्वितीयं, सगुणं ब्रह्म नियतमिति सिद्धान्तनिर्णयः । स्वाभाविकीति वचनात् सत्वाः काम इति श्रुतेः ।।

End

------वैकल्यार्थविवक्षणीयतया । तथा सति स्वनिष्ठ--- धर्मप्रयोजकतावच्छेद--साजात्यस्य विवक्षणीयतया, एवं च सति स्वनिष्ठपरकीयधर्मोत्पादकतावच्छेदक-धर्मावच्छिन्नस्वव्यतिरिक्तनिष्ठप्रयोजकत्वादिनिरूपकत्वस्यैव स्वनिष्ठपरकीय-स्वसाध्यधर्मत्वान्न सजातीयधर्मसामान्ये पर्यवसितत्वेन निरुक्तविशिष्टाज्ञान-निष्ठजनकतायाः तादृशधर्मानवच्छिन्नत्वादतो यावत्वमावश्यकं --- पर्यवसाने घटरूपे चाक्षुषत्वस्यालोकरूपापेक्षत्वेन साध्यवैकल्यप्रसंगात् आलोक ---- दृष्टान्तत्वेऽपि घटरूपे ------- ईश्वरज्ञानमादाय बाधप्रसंगाच्च, यथोक्त-पर्यवसाने तु आलोकरूपत्वात् (चक्षुरा) दीनां भेदात् न कोपि दोषः । सूचितं च इदं श्रुतप्रकाशिकायाम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

1253 B - गुरुभावप्रकाशिका

Beginning:

शब्दप्रयोगं दर्शयति सर्वाणीति । 'अत एव प्राण' इत्यस्मिन्नधिकरणे तद्वाक्यस्थप्राणशब्दस्य परमात्मपरत्वसमर्थनादिति भावः । प्राणशब्दार्थताया मुख्यप्राणसम्बन्धनिबन्धनत्वात्तस्यापि तथात्वस्य भगवत्वं बद्धनिबन्धनत्वाच्च भगवदतिरिक्तस्य प्राणशब्दप्रवृत्तिनिवृत्तिविरहे प्रमाणं दर्शयति । 'को ह्येवान्यात् ? कः प्राण्यात्' इत्यादी ---------। अत्र आदिशब्देन 'न प्राणेन नापानेन मर्त्यो जीवति कंचन । इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ' इत्यादि श्रुत्यन्तरमभिप्रेतम् । एतेन अप्राणशब्दसंकोचादुत्तरत्रसंजीवनीम् इत्यत्र धात्वर्थप्राणधारणस्य कैवल्यसाधारणस्य वक्ष्यमाणतया तदनुरोधाच्च प्राणशब्दो जीवात्मपरमात्मोभयविषय इति भ्रमो निरस्तः। न च अत्र प्रसिद्धसुधापक्षसाधारणाय प्राणशब्दस्य मुख्यप्राणसाधारणावश्यंभावेन जीवात्मविषयकत्वमविरुद्धमिति शक्यम् ।

End:

न च तत्र इन्द्रस्योपलक्षणत्वं शक्यम् । उपासात्रैविध्यासिद्धिप्रसंगात् । अनुगृण्हीतं च विशेषणत्वमाचार्यैः । प्रतर्दनादिविद्यासु वेद्यस्य परमात्मनः---विशेषणमिति। नाप्यत्र मधुविद्यान्याये ---- मुक्तेः पूर्वमिन्द्रानुभवसंभवः । तथाऽस्ति विलम्बितफलस्यापि उपक्रमावगत---बाधप्रसंगात् । इति चेन्मैवम् ; प्रतर्दनविद्यानिष्ठानामिवैकाभूत्वेति सांसारिकत्वश्रवणान्मुक्त्यन्तर्भावसंभवः । न हि तत् विशिष्टफलं श्रूयते ।।

2202 c - गुरुसामानाधिकरण्यवादः

Beginning:

श्रीमद्यादवभूधरांकणलसन्मदारमिन्दीवर-
श्रेणीकान्तिझरीपरीतवपुषं निध्याय नारायणम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रीरामानुजसूचितश्रुतिशिखासिद्धान्तबद्धादर-
स्सामानाधिकरण्यसद्गमनिकां ग्रथ्नात्यनन्तस्सुधीः ।।

इह खलु 'सर्वं खल्विदं ब्रह्म' 'अयमात्मा ब्रह्म' 'तत्त्वमसि' इत्यादि-समानाधिकरणपदघटितवाक्यार्थो विचार्यते । तत्पदप्रयोज्यविशेष्यताविशिष्टाभेद-सम्बन्धावच्छिन्नप्रकारताप्रयोजकत्वं तेन समं समानाधिकरणत्वम् ; 'नीलमुत्पलम्' इत्यादौ उत्पलपदप्रयोज्यविशेष्यताविशिष्टप्रकारताप्रयोजकत्वात् नीलपदस्योत्पल-पदेन सामानाधिकरण्योपपत्तिः। प्रकारतायां विशेष्यतावैशिष्ट्यं च- स्वानवच्छेदक-धर्मावच्छिन्नत्वस्वनिरूपितत्वोभयसम्बन्धेन 'घटो घटः' इत्यादौ सामानाधिकरण्य-वारणाय प्रथमसम्बन्धनिवेशः ।

End:

ननु योगापेक्षयाऽपर्यवसानवृत्तेः प्राबल्ये आकाशाद्यधिकरणे योगार्थांगी-करणमयुक्तम् ----- इति चेन्न । तच्छरीरकतया ------ भाष्ये योगप्रदर्शनात् । अत एव टीकायाम् अपर्यवसानवृत्तिरपि उपलक्षिता । न च एवं 'छन्दोऽभिधानात् इत्यत्रापि तच्छरीरकपरमात्मपरत्वेन मुख्यत्वसम्भवात् गौणपरत्वाश्रयणं व्यर्थम् इति चेन्न । चतुष्पदा षड्विधा इति चतुष्पात्त्वषाड्विध्यकीर्तनावैयर्थ्याय तत्सादृश्येन गौणवृत्तेरेव तत्राश्रयणादिति दिक् ।।

Colophon:

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना । अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम्।।

इति गुरुसामानाधिकरण्यवादः ।।

236 D - चतुश्श्लोकी

Beginning:

कान्तस्ते पुरुषोत्तमः फणिपतिः शय्यासनं वाहनं
वेदात्मा विहगेश्वरो यवनिका माया जगन्मोहिनी ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

ब्रह्मेशादिसुरव्रजस्सदयितः त्वद्दासदासीगणः
श्रीरित्येव च नाम ते भगवति ब्रूमः कथं त्वां वयम् ।।
यस्यास्ते महिमानमात्मन इव त्वद्वल्लभोऽपि प्रभुः
नालं मातुमियत्तया निरवधिं नित्यानुकूलं स्वतः ।
तां त्वां दास इति प्रपन्न इति च स्तोष्याम्यहं निर्भयः
लोकैकेश्वरि लोकनाथदयिते दान्ते दयां ते विदन् ।।

End:

शान्तानन्तमहाविभूतिपरमं यद्ब्रह्म रूपं हरेः
मूर्तं ब्रह्म ततोऽपि तत्प्रियतरं रूपं यदत्यद्भूतम् ।
यान्यन्यानि यथासुखं विहरतो रूपाणि सर्वाणि
तान्याहुः स्वैरनुरूपरूपविभवैर्गाढोपगूढानि ते ।।
आकारत्रयसंपन्नामरविन्दनिवासिनीम् ।
अशेषजगदीशित्रीं वन्दे वरदवल्लभाम् ।।
भगवन्नारायणाभिमतानुरूप ------------------ शरणमहं प्रपद्ये ।।
उल्लासपल्लवितपालितसप्तलोकी निर्वाहकोरकितनेमिकटाक्षलीलाम् ।
श्रीरंगहर्म्यतलमंगलदीपरेखां श्रीरंगराजमहिषीं श्रियमाश्रयामः ।।

2300 A - चतुश्श्लोकीभाष्यम्

Beginning:

श्रीमान्वेंकटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ।।
-- ।
-- ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अत्र समन्वयाविरोधसाधनफलविषयशारीरकचतुरध्यायीसमधिगतस्य भगवतः सर्वप्रकाराभिमतानुरूपसहधर्मिणीविशिष्टतयाऽपिसर्वाधिकत्वं'कश्श्रीश्श्रियः'इत्युक्त-कैमुतिकन्यायकाकुगर्भया चतुश्श्लोक्या प्रकाशयन् प्रथमं श्रियःपतिप्रतिपिपाद-यिषितानां विभूतिद्वयशेषित्वादीनां स्थापकमाह -'कान्तस्ते' इति ।

कान्तः - प्रियः, अनुरूपपतिरित्यर्थः । ते - सर्वमंगलास्पदत्वेन प्रमाण-सिद्धायाः । एतत्पदद्वयाभिप्रेतं व्यञ्जितं गद्ये 'देवदेवदिव्यमहिषीम्' इति । 'द्वाविमौ पुरुषौ लोके' इत्यादिभिः स्वेनैव निरुक्तेन परत्वव्यञ्जकेन समाख्याविशेषेण लक्ष्मीकान्तं विशिनष्टि 'पुरुषोत्तमः' इति ।

End:

अत्र स्वामित्यसौलभ्यफलव त्वफलत्वतः ।
आनुरूप्येण सम्बन्धः श्रीपतौ दर्शितः श्रियः ।।

अपि च अत्र द्वयार्थमनुसन्धित्सता श्रीशब्दनिरुक्तयश्च तत्र तत्र सूचिताः । मत्वर्थस्तु नित्ययोगस्वरूपरूपादिसर्वविषयतया चतुर्थश्लोके व्यञ्जितः । नारायणशब्दार्थोऽपि 'कान्तस्ते पुरुषोत्तमः' 'शान्तानन्तमहाविभूति' इत्यादिभिः संग्रहेणोक्तः । चरणशब्दोपलक्षितविग्रहयोगोऽपि 'मूर्तं ब्रह्म' इत्यादिना प्रदर्शितः ।

एवं संक्षिप्तसाध्यांशविशदीकारपूर्वकम् ।
साध्यं प्राप्यमुपायं च स्तोत्रे सन्दर्शयिष्यति ।।
कविकथकसिंह इत्थं त्र्ययन्ताचार्य इत्यभिख्यातः ।
व्यवृणुत यामुनविहितां रमास्तुतिं वेंकटेशकविः ।।

Colophon:

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेंकटनाथस्य वेदान्ताचार्यस्य कृतिषु रहस्यरक्षायां चतुश्श्लोक्यधिकारः तृतीयः ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

139 – चन्द्रिकाखण्डनम् (रविमण्डलाख्यम्)

Beginning:

'यस्मिन् द्यौः' इत्यादिना उक्तं द्युभ्वाद्यायतनं किं रुद्रादिः उत परमात्मावेति संशयः, पूर्वपक्षस्तु द्युभ्वाद्यायतनं रुद्रः 'प्रधानं वायुः जीवो वाव लोकाधारः प्राणानां ग्रन्थिरसि रुद्रः भूतं च भव्यं च भविष्यच्च इत्याचक्षते आकाश एव तदोतं च प्रोतं च वायुना-------सूत्रेण' 'अयं च लोकः परश्च लोकः सर्वाणि च भूतानि-- समाख्यानात् जायमानत्वरूपजीवजीवलिंगाच्च न च लोकाश्च लोकिनश्च विष्णावेव ओतश्च प्रोतश्च' इति विष्णावपि समाख्याऽस्ति इति वाच्यम् 'प्राणानां ग्रन्थिरसि रुद्रः' 'प्राणेश्वरः कृत्तिवासाः पिनाकी' 'रुद्रा वाव लोकाधारः' इति बहुरुद्रश्रुतिलिंग-बलेन रुद्र समाख्यायाः जायमानत्वादिलिंगसहकारेण वायुवादिसमाख्यायाश्च विष्णुसमाख्यातो बलत्वात्, न च जायमानत्वलिंगं विष्णौ सावकाशम् । एतत्सिद्धान्त-समर्थनीयस्य विष्णौ जायमानत्वस्य एतत्पूर्वपक्षदशायां सावकाशत्वकथनायोगात् 'अजायमान' इत्यादि वाक्यमपि जीवविषयमिति ।

End:

चतुर्थपादेन सर्वतेजोनुग्राहकं च ज्योतिः प्रतिपाद्यते । एवंभूतज्योतिर्दर्शनात् अपि अंगुष्ठमात्रः पुरुषः परमात्मा । अत्राह चन्द्रिकाकारः- शब्दादेवेत्याद्यधिकरण-शेषत्वमनयोः सूत्रयोः न संभवति ; तदानन्त्यापातात् च शब्दापातात् च 'न तत्र सूर्यो भाति' इति मन्त्रः ज्योतिःपदाभावेन सूत्रस्य श्रुत्यननुगमप्रसंगवत् सूत्रानन्तरेष्विव ज्योतिर्दर्शनपदयोः प्रतिज्ञाहेतुरूपत्वसंभवे हेतुमात्रत्वाऽयोगाच्च इति । अत्रोच्यते - यत्तावदुक्तं 'कम्पनात्' इत्यादि ----- प्रमिताधिकरणानन्तर्यापात इति ; तन्न, लिंगविशेषनिर्देशात् । समानविधानेष्वनैन्द्राणां मन्त्र -------- ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

1164 - चरमश्लोकचन्द्रिका

Beginning:

श्रीमद्वचनभूषायाः प्रक्रियातन्यते लघुः ।
शुद्धसत्वाख्यदासेन चरमश्लोकचन्द्रिका ।।

प्रथमं श्रीवचनभूषण श्रवणवतामेव मोक्ष इति प्रतिपाद्यते । तदनुसारेणैव चरम-श्लोकार्थनिर्णयः श्रेयस्कर इति वक्तुम् - तथा हि तत्र तावदुत्तारकरुचिपरिगृहीतार्थ एव प्रपन्नैः श्रेयस्कामैः उपादेय इत्यत्र सर्वेषाम् अविवादः । वचनानि च भवन्ति -

को धर्मः सर्वधर्माणां भवतः परमो मतः ।
एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ।।

इत्यादीनि । तत्र द्वयोपदेष्टैवोत्तारकः ।।

End:

----------इयंच पंचदूषणी श्रीकृष्णपादलोकाचार्यैः रहस्यत्रयविवरणे, श्रीवचनभूषणे च 'इवत्तै धर्ममेन्गिरदु' इति वाक्येन 'पुरंबुपिरन्ददेल्लाम्' इत्यादि-वाक्यद्वयेन'ओरुफलत्तुक्करियवळियुम्'इत्यादिवाक्येन'प्रापकान्तरमज्ञर्क्कुमुपायम्' इत्यादि वाक्यैः 'तान् दरिद्रनाकैयाले' इत्यादि वाक्यैश्च सूचितेति संक्षेपः ।।

Colophon:

इति चरमश्लोक चन्द्रिकायाम् अनुवादपक्षे त्रिविधविकल्पापत्तिप्रकाशिका नाम अष्टमीकला सम्पूर्णा ।।

1164 - चरमश्लोकरहस्यचन्द्रिका

Beginning :

रहस्यत्रयसारस्य प्रक्रिया तन्यते लघुः ।
पेलापूर् दीक्षितेनेयमुत्तमश्लोक चन्द्रिका ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्रथमं श्रीमद्रहस्यत्रयसारवतामेव मोक्ष इति प्रतिपाद्यते । तदनुसारेणैव उत्तमश्लोकार्थनिर्णयः श्रेयस्कर इति वक्तुम् - तथाहि तत्र तावत् उत्तारकरुचि-परिगृहीतार्थ एव प्रपन्नैः श्रेयस्कामैः उपादेय इत्यत्र सर्वेषामविवादः । वचनानि च भवन्ति -

को धर्मः सर्वधर्माणां भवतः परमो मतः ।

एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ।।

इत्यादीनि । तत्र द्वयोपदिष्टैव उत्तारकः। नहि द्वयोच्चारणमेव वा, द्वयमेव वा उत्तारकम् ; द्वयस्याभावार्थकत्वेनाफलजनकत्वात्, फलाजनकस्याकरणत्वात् । द्वयोच्चारणस्य भावार्थत्वेऽपि न उपायत्वं सम्भवति, उच्चारणस्याप्रतिपत्तित्वात् । ज्ञानविशेषो हि प्रपत्तिर्नाम ।

End:

प्रतिबन्धकभावतया दृष्टकारणभूतारोपित धर्माननुष्ठानरूपत्यागविशिष्टस्य साधनेच्छारूपतयादृष्टकारणरूपस्य शरणवरणस्य सर्वमुक्तिप्रसंगपरिहारार्थम् अन्यार्थस्यैव सतो मोक्षफलोपधा न नियतपूर्ववृत्तित्वरूपेण मोक्षव्याजत्वेन अज्ञातज्ञापनरूपेण विशिष्टविधिरुतानिष्कृष्टसिद्धान्ते अदृष्टकल्पनाशंकागन्धाभावेन विशिष्टविधिगौरवशंकाया अपि अनवकाशपराहतत्वाच्च इति दिक् ।।

Colophon:

इति रहस्यचन्द्रिकायां द्रमिडोपनिषदां केवल स्तुत्यर्थत्व प्रकाशिका नाम तृतीया कला सम्पूर्णा ।।

1225 G - चरमश्लोकचन्द्रिका

Beginning:

श्रीमद्वेंकटयोगीन्द्रमुन्यंघ्र्यब्जप्रसादतः ।

लिख्यते चरमश्लोकचन्द्रिकार्था श्रुता क्वचित् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रीकुशिकवंशमौक्तिकमणिः सद्बृन्दचिन्तामणिः श्रीशेषावतारः श्रीभाष्यकार-मातृष्व---बालधन्वि गुरुवर्यसत्सन्तान नवरत्नहारनायकमणिः श्रीशुद्धसत्त्वाचार्यः आश्रितजनानां रहस्यसत्संप्रदायार्थप्रकटीकरणेच्छुः प्रारिप्सितं प्रतिजानीते, श्रीमद्वचन --- । तत्तत्प्रकरणस्य आदौ पूर्वपक्षत्वेनुगृहीत --- कृतग्रंन्थस्यापि अर्थः क्वचित् लिख्यते । रहस्यत्रयसारेति । उत्तमश्लोकस्य-चरमश्लोकस्य, चन्दिका, चन्द्रिकावत् प्रकाशिका रहस्यत्रयसारग्रन्थस्य लघुप्रक्रिया - लघुप्रकारं तनुते । 'तनु विस्तारे'। पूर्वपक्षः । रहस्यमिति प्रतिपादद्य चन्द्रिकायां । पूर्वपक्षे उत्तारकत्वं प्रपत्तेः साक्षात् द्वयोपदेष्टुः उत्तारकत्वं प्रवृत्तिसम्बन्धानिबन्धनम् । औपचारिकं विवक्षितः।

End:

------ लोके वेदे नास्ति व्यभिचारः । संस्कारव्याप्तेस्तु लोकिकप्रयोगे व्यभिचारः दृश्यते । क्वचिद्देशविशेषे लौकिकव्यवहारे जातिमात्रमुपजीव्य विना संस्कारं ते शब्दाः प्रयुज्यन्ते । बर्हिरादाय गावो गता इति । कुर्यमाज्यमिति । 'पुरोडाशनम्' मे माता प्रहेलिकां ददाति इति च तस्माज्जातिवाचिनः । प्रयोजनन्तु बर्हिणा धूपमुपस्तृणात् इत्यत्र विना संस्कारेण सरणसिद्धिरिति । संस्कारेति । यत्र यत्र संस्कारादिशब्दप्रयोगः, तत्र तत्र संस्कार इति व्याप्तेः इत्यर्थः । प्रकृते तदधिकरणन्यायेन संस्कृतवेदे वेदशब्दप्रयोगः, तदितरत्र न इति पूर्वपक्षे निर्णीता । द्रामिडीश्रुतिरित्यादिना द्राविडवेदेऽपि वेदशब्दप्रयोगः शिष्टैः क्रियत इति सामंजस्यमिति भावः सिद्धान्त इति ।।

Colophon:

इति चरतमश्लोकचान्द्रिकायां मन्त्ररत्नोत्तारकत्वप्रकाशिका नाम प्राथमिककला ।।

1721 A चरमश्लोकत्यागशब्दार्थटिप्पणी

Beginning:

नत्वा यतीन्द्रलोकार्यौ स्मृत्वा वरवरं मुनिम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

करोमि चरमश्लोकत्यागशब्दार्थटिप्पणीम् ।।

तत्र तावत् सत्सम्प्रदायपरम्पराप्राप्तोऽयमर्थः । सिद्धोपायाधिकारांगतया सवासन-सर्वधर्मस्वरूपत्यागश्चरमश्लोकप्रथमपादे विधीयते इति । अत्र केचित् - प्रपत्यधि-कारानुवादपरः, कार्पण्यविधानपरः, नैरपेक्ष्यानुसन्धानविधानपरः, अशक्यारम्भ-निषेधपरः, अशक्यप्रत्याशानिषेधपरः, ब्रह्मास्त्रन्यायसूचनपरश्चेति षोढा तद्योजना वर्णयन्ति । अत्र हि -

अशक्त्यादचश्रुतेः पार्थेतद्बाधाद्विध्यनन्वयात् ।
विवक्षावैपरीत्यादप्यादयः कल्पोऽसमंजसः ।।

तथाहि - अधिकारानुवादं वदन् वादी प्रष्टव्यः । कोत्राधिकारः स केनानूद्यत इति सर्व धर्मपरित्यागः एवाधिकारः । स च परित्यज्य इत्यनेन अनूद्यत इति चेत् भ्रान्तोऽसि । सर्वधर्मशक्तानामेव तत्परित्यागरूपाधिकारसम्भवेन प्रपत्तेः सर्वाधि-कारत्वभंगप्रसंगात् ।।

End:

तथा च श्रीलोकाचार्यैः 'सर्वधर्मान्परित्यज्य' इत्यस्य भ्रान्तित्यागपूर्वक सर्वधर्मस्वरूपत्यागपरत्वेनैव सुस्पष्टं व्याख्यातत्वात्, श्रीवेदान्ताचार्याणामपि तत्रैव तात्पर्यपर्यसानत्, तथा सत्येव सकलप्रमाणसम्प्रदायोपपत्तेश्च चरमश्लोके स्वरूपत्याग एव त्यजि धात्वर्थः इति सर्वं संमजसम् ।।

Colophon:

श्रीशैललक्ष्मणमुनेः श्रीभूतपुरवासिनः ।
कृतिः प्रवर्धतामेषा त्यागशब्दार्थटिप्पणी ।।
इति श्रीशैललक्ष्मणमुनिविरचित त्यागशब्दार्थटिप्पण्यां
दिव्यसूक्तिविरोधभंगो नाम तुरीयवादः समाप्तः।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

1225 – E

1222 c - त्यागशब्दार्थटिप्पणी कठिनपदपदीपिका

Beginning:

ध्यात्वा श्रीशैलयतिराजगुरुवर्यपदाम्बुजम् ।
त्यागशब्दार्थटिप्पण्यां श्रुतार्थस्तनुते क्वचित् ।।

श्रीमन्महाचार्यचरणकमलसेवासमधिगतसमस्तसंस्कृत - द्राविड - निगमचूडारहस्य -सर्वस्वसुरभिमानसः श्रीमद्रामानुजाचार्य अपरावतारभूतः श्रीशैललक्ष्मणमुनिः प्रारीप्सितस्वग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं स्वाचार्यनमस्कारभूतं मंगलं शिष्य-शिक्षायै ग्रन्थतो निबध्नन् श्रोतृबुद्धयवधानाय प्रारीप्सितं प्रतिजानीते - नत्वा यतीन्द्रेति । यतीन्द्रः - श्रीभाष्यकारः । लोकार्यः श्रीकृष्णपादसूनुः लोकाचार्यः । सिद्धोपायाधिकारस्येति षष्ठी । प्रपत्याधिकारानुवादेति । --- स्थितत्वमिति योजनायां प्रपत्यधिकारानुवादः वेदितव्यः । ----- । रहस्यत्रयसारे चरमश्लोकाधिकारे उक्तरीत्या षोढा योजका निरूपिता इति मन्तव्यम् । ब्रह्मास्त्रसाधसूचनेति । एकस्याय सूचनं प्रपत्तिविषये इति सार`; सिद्धान्ते तु सिद्धोपायविषये इति मन्तव्यम् ।।

End:

अत्र उपायत्वबुद्धित्यागपूर्वक --- भोग्यबुद्धया --- वधिकारितं तदनुष्ठेयमाण --- फलाभिबद्ध --- सिद्धसंयुक्त --- ज्योतिष्टोम --- ज्ञानान्तर्गत अर्णवदूरेण --- कर्मबद्धियोगार्च्चना ----- कर्मान्तरथा --- मोक्षसाधनकर्म --- बुद्धिविशेषान्तरेण कर्मान्तरतया --- स्वरूपत्याग --- उपायत्वं बुद्धयावनुष्ठित --- भोगबुद्धया अनुष्ठिताम् इति --- परमरहस्य श्रीसूक्तिरनुसन्धेया ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

1225 D – चरमश्लोकप्रकाशिका

Beginning:

'कीळेशिल उपायविशेषंगळै' इत्यनेन भक्त्यादीनां उपायकत्वं प्रतीयते । भूमित्ववर्जन ----- इति । 'शुक्तिकेयिलेरजतबुद्धिपण्णुवारैप्पोले' इत्यादि वाक्येन तेषामुपायत्वं नास्तीति प्रतीयते । वेदपुरुष --- अभिमतवस्तु --- ईश्वर एक----- उपायत्वविहितत्व ----- इत्युक्तत्वात् । अभिमतवस्तुस्थानीयत्वं उपायस्वारस्य रोगनिवर्तनौषधस्थानीयत्वं निरुपाधिकसिद्धोपायस्य प्रतीयते । अतः भक्त्यादीनाम् उपायत्वमेव नास्ति । आपातप्रतीत्या उपायत्वं अभिमतवस्तुनः औषधमिश्र रोगनिवर्त्यतोपायत्ववत् ज्ञानौषधस्यैव तद्वास्तवम् । अतः स्वार्थप्रसन्नं प्रति स्वार्थानुभवस्वार्थकैंकर्यफलप्रदानांशे भगवतः अयथावस्थितस्वार्थांशे वैषम्यस्य अपायकृतानां परार्थानुभवकैंकर्यं प्रति उपायत्वं निरुपाधिकपुरुषकारत्व-विशिष्टश्रिय-----रेव उपायत्वं स्वाभाविकम् । स्वार्थकैंकर्यरूपफलप्रदानांशे कर्तृज्ञानादीनामपि भ्रान्त्या उपायत्वेन तादृश उपायानां भगवतः सोपाधिकः ।।

End:

सम्यज्ज्ञाने सति प्रवदनान्निवर्तन्ते । तत् कालुष्यकायस्थम् । तदुभयं यो समर्पितः किन्तु समर्पयामि इति श्लोकद्वये दृष्टचरम् । शठारिगोदाप्रभृतयः--- इति प्राप्यत्वरातिशयात् विशेषासहिष्णवः प्रवृत्तिं कुर्वीरन् । यां च--- इति निवर्तेरन् । पूर्व-पक्षे 'निवृत्तिधर्म' इत्यत्र निवृत्तिविशिष्टधर्म इति, तद्वत् प्रवृत्तिधर्म इत्यत्रापि सिद्धान्ते निवृत्तिरूपधर्म इति । अभावस्य भावान्तरत्वात् तच्च पारतन्त्र्यमिति फलितम् । अनैश्वर्यात्---स्वभावजात् । स्वभावज्ञं पारतन्त्र्यम् । साधनभक्तिः पराशरे । साध्यभक्तिः परांकुशादौ कैंकर्यरूपभक्तिः नाथमुत्यादिषु शरणावरणाधिकारिणः सर्वज्ञाः । शरणवरणस्य अज्ञत्वं नाधिकारः 'सर्वज्ञः शरणं याति' इत्युक्तेः ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

1721 B - चरमश्लोकसंगतिः

Beginning:

निजवसदसिताक्षी शोभनापांगवीक्षा
विहरणपरिपुष्टोत्फुल्लनीलोत्पलाभम् ।
शठरिपुवदनाब्जस्यन्दिगाधामधूनां
मधुपमतिरसज्ञं भावये वेंकटेशम् ।।
अस्मद्गुरूंस्तदाचार्यान्यतीन्द्रं च श्रियःपतिम् ।
नत्वा वक्ष्ये द्वयेनेह चरमश्लोकसंगतिम् ।।

तत्र तावत् शेषसहिताद्युद्धृते रहस्यत्रये मूलमन्त्रविवरणतया पाद्मोत्तरखण्डादिसिद्धं मन्त्ररत्नं प्रति इतिहाससारत्वेन शब्दतोऽर्थतश्च चरमश्लोके मन्त्ररत्नप्रत्यभिज्ञया च तस्य प्रतीयमानं द्वयविवरणत्वं तदुक्तार्थविशदीकारार्थान्तरबोधनाभ्याम् उपपद्यत इति तयोः विवरणविवरणीभावोऽपि संगतिरस्तीति पूर्वाचार्याणां सिद्धान्तः । तत्र सर्वधर्मान् परित्यज्य इत्यत्र द्वितीयान्तान्वितेन धातुना, चरणौ इति द्विवचनोक्तार्थविशदीकरणम् ।

End:

अथ चरमहेतुरप्यनुपपन्नः । 'ब्रह्मास्त्रन्यायेन' साधनान्तरपरित्यागस्य प्रतिबन्धकाभावद्वारा दृष्टविधया सिद्धोपायोपकारकत्वसम्भवात् सिद्धोपायस्यात्यन्तनिरपेक्षत्वे सर्वमुक्तिप्रसंगात्, प्रवृत्तिसापेक्षत्वे नैरपेक्षविरोधात् उपायस्य सिद्धताविरोधाच्च निवृत्तिसापेक्षतायाः पूर्वाचार्यैः अंगीकाराच्च अनुपपत्यभावेन श्लोकस्यांगांशपूरकत्वेन विवरणत्वसम्भवात् सिद्धोपायस्य अत्यन्तनिरपेक्षत्वेन हि तत्करणं लोके वेदे वा किंचित् ईदृशम् । इतिकर्तव्यता साध्ये यस्य नानुग्रहेऽर्थितेत्युक्तरीत्या उपायत्वानुपपत्या मन्त्रेणैव तदाकांक्षायाः शान्त्ययोगाच्च । तस्मात् श्लोकस्य द्वयविवरणत्वमुपपद्यत एवेति पूर्वाचार्याणां संगतिविशेषोपपादनं समीचीनयुक्तिमूलमेवेति सर्वं समंजसम् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

Colophon:

श्री श्रीनिवासदासेन श्रीभूतपुरवासिना ।
रचिता चरमश्लोकसंगतिर्वर्धतां सदा ।।

Scribe:

इन्दसम्पुटं विलम्बवर्षे पंगुनिमासं मून्रां तेदि बुधन्किळमै भरणीनक्षत्रं चतुर्थीदिनं मध्याह्नत्तिल् एळुदि मुडिन्ददु 15 - 3 - 99. तिरुनारायणपुरम् ।।

1202 - PL.

1719 D - चरमश्लोकसिद्धतात्पर्यटिप्पणी

Beginning:

स्मृत्वा यतीन्द्रलोकार्यौ नत्वा वरवरं मुनिम् ।
करोमि चरमश्लोकसिद्धतात्पर्यटिप्प्पणीम् ।।

तत्र तावत् सत्सम्प्रदायपरम्पराप्राप्तोऽयमर्थः । सर्वधर्मपरित्यागपूर्वकं भगवन्तमेव शरणं गतस्य स एव भगवान् साधनमिति सिद्धोपायपरश्चरमश्लोक इति । अत्र कस्यचिच्छान्दसस्य पैशाचं वचनम् । नाऽयं श्लोकः सिद्धोपायं प्रतिपादयति । प्रवृत्तिनिवृत्यन्वयविरहिणः शास्त्रस्य प्रतिपादनपूर्त्या नैराकांक्षायोगात् । तथा च वार्तिकम् --

'यावत्खलु प्रमातृणां प्रवर्तननिवर्तने ।
शब्दानकुर्वते तावन्निराकांक्ष बोधनम् ।।' इति ।

केवलसिद्धपरस्य शास्त्रत्वं च अनुपपन्नम् । तत्र च वार्तिकम् ---

'प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा ।
पुंसां येनोपदिश्येत तच्छास्त्रन्तूपपद्यते ।।' इति ।

End:

------मा शुचः इति शोकनिवृत्तिपरस्य चरमश्लोकस्य सिद्धोपायोपदेशमात्रपरतया एव स्वरसतः प्रतीत्त्या फलान्तरसाधनान्तरविधायकत्वोक्तिः अनुपपन्नत्वाच्च ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तस्मात् चरमश्लोकपूर्वार्धं स्वरूपयाथात्म्यज्ञानप्राप्तयोः साधनान्तरत्यागः भगवदेक-शरणवरणयोः भगवदभिमतत्वज्ञापनमुखेन शोकनिवर्तनपरम् । तदुत्तरार्धं च चेतन-संरक्षणे भगवत एव प्राप्तिप्रदर्शनेन शोकनिवृत्तिपरमिति सिद्धपरतयैवायं पुरुषार्थ-पर्यवसायीति सर्वं समंजसम् ।।

Colophon:

श्रीशैलयतिराजाख्यदासस्य कृतिरुज्वला ।
वर्धतां चरमश्लोकसिद्धतात्पर्यटिप्पणी ।।
।। इति सिद्धतात्पर्यटिप्पणी सम्पूर्णा ।।

1225 F-चरमश्लोकसिद्धतात्पर्यटिप्पणी कठिनपददीपिका

Beginning:

श्रीवेंकटयतीन्द्राख्यमुनिं नत्वा विलिख्यते ।
श्रुतार्थः चरमश्लोकसिद्धतात्पर्यटिप्पणी ।।

परमकारुणिकः श्रीशैललक्ष्मणाख्यमुनिवर्यः शिष्यशिक्षायै-- नमस्कारात्मकं मंगलमुपनिबध्नन् चिकीर्षितं----प्रतिजानीते । स्मृत्वा यतीन्द्रेति । यतीन्द्रः-श्रीभाष्यकारः । लोकार्यः - श्रीकृष्णपादलोकाचार्यः । मीमांसकस्य-------- अखिल--प्रवृत्तिं वा निवृत्तिं वा शब्दो न प्रतिपादयति । तावत् त्वरयुतं --------- मुमुक्षुतया बोधनं न संभवतीति ----- कृतकेन लौकिकेन ----- इत्यन्वयः । ब्रह्मत्वम् । प्रवृत्तिसाध्येषु प्राप्तिनिवृत्तिसाध्यानिष्टपरिष्कारः । ---लौकिकवाक्यम् । हर्षेदिति । हर्षरूपपुरुषार्थ इत्यन्वयः । अनुसन्धानात्मकं कार्यमित्यर्थः । ---इति शेषः । अतः -------स्वार्थ------योरैक्यत्वमिति भावः । तैरेव - वेदान्ताचार्यैरेव----अन्तःकरणः योगवादिपक्षः । इत्थं भास्करमते ध्यानेन सकलप्रपंचनिवृत्तिरिति । शंकरमते वाक्यार्थज्ञानमात्रेण प्रपंचनिवृत्तिरिति ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

End:

अधिकारिविशेषणं भवति प्रवृत्तिरिति भावः ।

निश्चित्य त्वदधीनतां मयि सदा कर्माद्युपायान् हरे

कर्तुं त्यक्तुमपि प्रवक्तुमनलम् सीदामि दुःखाकुलः ।

एतज्ज्ञानमुपेयुषो मम पुनस्सर्वापराधक्षयं कर्ताऽसीनि

दृढोऽस्मि ते तु चरमं वाक्यं स्मरन् सारथेः ।। इति ।

अष्टश्लोक्या त्वदधीनतां पारतन्त्र्यम् । स्वरक्षणार्थं प्रवृत्तिरूपान् कर्तुमनलम् । त्वयाविहितान् त्यक्तुमनलम् । त्वदीयविधानाभावात् प्रवक्तुमनलम् । सन् सीदामि । पारतन्त्र्यज्ञानविरोधादेव उपायप्रपत्तावपि अनलमित्यप्यर्थः । चरमश्लोकं स्मरन् दृढोऽस्मि अनभिमतत्वे सति विधानाभावादिति भावः । स्मरन् दृढोऽस्मीति कर्तव्यांश-प्रतिपादनात् सिद्धोपायपरत्वम् । भगवदभिमतेति विधिमुखेन इत्यध्याहार्यं । समंजसम् - उपपन्नम् ।।

Colophon:

।। इति सिद्धतात्पर्यटिप्पणी कठिनपददीपिका सम्पूर्णा ।।

107 - छान्दोग्योपनिषत्प्रकाशिका

Beginning:

अतसीगुच्छसच्छायमंचितोरःस्थलं श्रिया ।

अंजनाचलशृंगारमंजलिर्मम गाहताम् ।।

श्रीशैलपूर्णवंशाब्धिकौस्तुभस्य जगद्गुरोः ।

श्रीमतस्तातयार्यस्य चरणौ शरणं वृणे ।।

श्रीतातगुरुसेवाप्तवेदान्तयुगलाशयः ।

वात्स्यानन्तगुरुः श्रीमान् श्रेयसे मेऽस्तु भूयसे ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

यत्सेवावैभवाल्लब्धा मया परमहंसता ।
तमहं शिरसा वन्दे परकालमुनीश्वरम् ।।
व्यासं लक्ष्मणयोगीन्द्रं प्रणम्याऽन्यान् गुरुनपि ।
छान्दोग्योपनिषद्व्याख्यां करवाणि यथामति ।।

ब्रह्मविद्यौपयिकं कर्मांगविषयम् आदौ उपासनमुपदिश्यते- 'ओमित्येतदक्षरम् उद्गीथमुपासीत' ।।

End:

सर्वां ब्रह्मोपनिषदमधिकृत्य मदीयांगानि इन्द्रियाणि च वर्णतां ब्रह्मणश्च मम च परस्परनिराकरणं मा भूत् । आत्मज्ञाननिरतस्य उपनिषदि ये शान्तिदान्त्यादयो धर्माः प्रतिपन्नाः ते मयि सन्तु ।

क्षेमाय यः करुणया + मुनिराद्रियताम् मदुक्तिम् ।।

Colophon:

इति श्रीमत्ताताचार्यचरणारविन्दचंचरीकस्य वात्स्यानन्तार्यसेवासमधिगत शारीरक-मीमांसाभाष्यहृदयस्य श्रीपरकालमुनिकृपालब्ध पारमहंसस्य रंगरामानुजमुनेः कृतिषु छान्दोग्योपनिषत्प्रकाशिका समाप्ता ।।

।। इति श्रीछान्दोग्योपनिषत्प्रकाशिकायां अष्टमः प्रपाठकः ।।

8 D - जिज्ञासादर्पणम्

Beginning:

भवबन्धं जिहासन्तोयमन्तस्सन्तमन्तितः ।
जिज्ञासन्ते सदा सन्तः तमनन्तमुपास्महे ।।
गुरून् कृपा गुरून्नत्वा धृत्वा च तदनुग्रहम् ।
सतां सन्तोषमाधित्से जिज्ञासादर्पणार्पणात् ।।

इह तावत् त्रैय्यन्तसन्ततिसमर्थनाय प्रवृत्तेन भगवता बादरायणेन प्रणीतानि

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

ब्रह्मसूत्राणि। तेषां परकीयव्याख्यानप्रत्याचिख्यासया भवभयाभितप्तभुवनभागधेय-वैभवभावितावतरणो भगवान् भाष्यकारः प्रववृते । तत्रेदम् आदिमं सूत्रम् - 'अथातो ब्रह्मजिज्ञासा' । तत्र जिज्ञासाशब्दो मीमांसाशब्दवद्विचारे रूढ इति केचित् । प्रमितिरूपफलेच्छारूपाया जिज्ञासाया अर्थाक्षिप्तो विचार इत्यपरे । 'इच्छाया इष्यमाणप्रधानत्वात् इष्यमाणं ज्ञानम् इह विधीयत' इति श्रीमद्भाष्यकाराः । तेषाम् अयमाशयः । तत्र नाद्यः पक्षो युक्तः । 'ज्ञा'धातोः इच्छायामर्थे 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' इति सनो विधानेन ज्ञानेच्छाया एव तदर्थतौचित्यात् 'वृत्तात्कर्माधिगमादनन्तरं ब्रह्म विविदिषति' वृत्तिग्रन्थे ज्ञानेच्छावाचिना विविदिषापदेन तथैव विवरणात् , 'शिक्षजिज्ञासायाम्' इत्यत्र तथैव वैयाकरणैः व्याख्यातत्वाच्च ।।

End:

पूर्णः शीर्णमतिः श्रुतिस्मृतियुगीसंकल्पनाजल्पनाद्
बुद्धः पद्धतिमुद्धतिं च विजहौ तत्किंकरः शंकरः ।
भ्रष्टो भट्टकुमारिलो गुरुरपि स्पष्टं न संचेष्टते
व्याख्यासौख्यमुपेयुषि प्रतिपदं क्षेमाय रामानुजे ।।
पथ्यं त्रिः खलु वेदनीयमिति यत् सूत्रं त्रिधा व्यावरोत्
त्रय्यन्तादयमुद्दधार कृपया दुर्यन्त्रणामन्त्रणात् ।
गीतां चाप्यविगीतवैभववतीं चक्रे प्रचक्रे यश-
स्तस्मै दोषविदूरशेषवपुषे कस्मै नताः स्मो हृदा ।।

Colophon:

इति श्रीशैलकुलतिलकसर्वतन्त्रस्वतन्त्रश्रीनिवासतातार्यनन्दनेन लक्ष्माम्बागर्भ-शुक्तिमुक्ताफलेन श्रीनिवासदीक्षितकरुणाकटाक्षवीक्षाशिक्षितमीमांसा द्वन्द्वनिर्द्वन्द्व-मतिना निजाग्रजाण्णयाचार्यदीक्षितानुग्रहगृहीतचतुस्तन्त्रनियन्त्रितस्वान्तेन श्रीनिवास-विदुषा विरचितं जिज्ञासादर्पणं सम्पूर्णम् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

2202 D - ज्ञानयाथार्थ्यवादः

Beginning:

जगज्जन्मस्थेमप्रविलयमहानन्दलहरी-
निदानं श्रीकान्तं निरुपाधिककारुण्यजलधिम् ।
समाराध्य श्रीमद्यतिपतिमतं तन्यत इदं
मतीनां याथार्थ्यं यदुगिरिजुषाऽनन्तविदुषा ।।

ज्ञानत्वव्यापकं याथार्थ्यमिति वेदान्तसिद्धान्तः । यद्यपि नैयायिकमतेऽपि 'सर्वं ज्ञानं धर्मिण्यभ्रान्तं, प्रकारे तु विपर्ययः' - इति न्यायेन भ्रमस्यापि धर्म्यंशे प्रमात्वांगीकारात् तद्वति तत्प्रकारकत्वरूपयाथार्थ्ये ज्ञानत्वव्यापकत्वमक्षुण्णम् । तथाऽपि ज्ञानत्वनिरूपितप्रतियोगिवैयधिकरण्य-अघटितव्यापकत्वस्य सिद्धान्त्य-भिमतस्य नैयायिकैरस्वीकारन्नदोषः धर्मितावच्छेदकांशे प्रमात्वस्य निरुक्त-व्यापकतानाश्रयत्वात् ।।

End:

न च तादृशस्वप्नो निष्प्रमाणक इति वाच्यम् । स्वप्ने केनचित् सदसद्विलक्षणत्वादिसाध्यकानुमानप्रयोगे कृते तदानीं तद्वाक्याद्बोधस्यापि सम्भावितत्वेनापलापासम्भवात् इति चेन्न । भ्रमस्थले अथवेत्यादिभाष्योक्तसृष्टिः स्वाप्निकसृष्टिश्च प्रत्यक्षविषयपदार्थस्यैव, न परोक्षविषयस्येत्यभिप्रायात्, प्रत्यक्षस्थले सन्निकर्षघटनार्थं सृष्टेरावश्यकत्वेऽपि परोक्षे तदनावश्यकत्वात्, तत्र परोक्षात्मकज्ञानद्वयेनैव ज्ञानयाथार्थ्यनिर्वाहात् । अत एव द्वैतवादिभिरपि प्रत्यक्षस्थले अनिर्वचनीयख्यातिः परोक्षे अन्यथाख्यातिरंगीकृतेत्यादिकं वादान्तरे प्रपंचितम् इति सर्वमवदातम् ।।

Colophon:

इति अनन्तार्यस्य कृतिषु ज्ञानयाथार्थ्यवादः समाप्तः ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

8 E - ज्ञानरत्नप्रकाशिका

Beginning:

यत्तच्छ्रुतं हृदि मतं मुहुस्स्मृतं च तत्तादृशीं शुभमतिं नियतं तनोति ।
तद्ब्रह्म निर्मलमपारकृपानुकूलं गोपालबालमतिवेलगुणं प्रणौमि ।।
यो मादृशामवदृशामवशात्सभूमौ क्षेमाय भाष्यमुदजृम्भतया प्रधृष्यम् ।
वामाध्वसाध्वसतमिस्रसहस्रधामा रामानुजस्स मुनिरस्तु ममार्थसिद्ध्यै ।।
श्रीकान्तकरुणालोकास्तेकान्तरितवैभवान् ।
टीकाचार्यान्नमस्कुर्मो लोकोत्तरगुणोत्तरान् ।।
वाचामगोचराचारचातुरीचारुतेजसे ।
प्राचीनां शिरसो वाचामाचार्यायास्तु मे नतिः ।।

प्रणम्य पूर्ण-----अण्णयार्यान्निजाग्रजान् ।
क्रियते श्रीनिवासेन ज्ञानरत्नप्रकाशिका ।।

End:

तदेवम् अनभिसंहितकर्मानुष्ठाननिर्मलीकृतान्तःकरणनिष्पन्नमविच्छिन्न-स्मृतिसन्तानरूपमुपासनात्मकं ज्ञानमपवर्गोपाय इति सर्वमवदातम् ।।
यतीन्द्रोः पन्थानं नियतमनुरुन्धानममुना
मितप्रज्ञाप्राज्ञाबहुलमनुगृहणीयुरिह माम् ।
इति स्मृत्वा हर्ष-------------तदधुना
प्रतीक्ष्य क्षन्तव्यं स्खलितमिह यत्तत्र गलितम् ।।
यतिपतिमतश्रद्धामद्धानिबोद्धुमिह क्षमाः
कठिनकृतिनः किं तै त्रैय्यन्तचिन्तदूरगैः ।
तदुपनिहितप्रेक्षादीक्षान् प्रणम्य कृताकृतिं
प्रतिगतधियः प्राज्ञाः पश्यन्ति चेत्यफलश्रयः ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

Colophon:

कौण्डिन्यश्रीनिवासाध्वरिवरकृपयाप्यग्रजानुग्रहेण ज्ञातं यद्भाष्यतत्त्वं तदिह बुधजनप्रीतये व्यक्तमुक्तम् । तेन प्रीतः प्रगुणसुरपुरीबालगोपालरूपः श्रीमान् श्रीपामभूपश्रियमयमधिकामादरादादधातु ।।

श्रुतश्च यत्नेन मतश्च पश्चात् ध्यातः फलं पूर्वमदादिदानीम् ।
श्रीपामभूपाल --- -रैष शौरिः सर्वं फलं दास्यति दृष्टमात्रः ।।

2741 - णत्वतत्त्वविभूषणम्

Beginning:

श्रीहयग्रीवाय नमः । श्रीमते रामानुजाय नमः । श्रीमते वेदान्तगुरवे नमः ।

यत्पादनिस्सृतात्तीर्था------- शिवतां गतः ।
तमहं सर्ववेदान्तसारं नारायणं भजे ।।
शेषार्यवंशवार्धीन्दुरनन्ताचार्यकोविदः ।
करोति विदुषां प्रीत्यै णत्वतत्त्वविभूषणम् ।।

अत्र किल कैश्चिद्द्वैतवादिभिरेव शैवजनसबहुमानावलोकनलिप्सया तन्मतं प्रविष्टैः नारायणशब्दस्य शिववाचकत्वसाधनप्रत्याशयः कश्चन सन्दर्भो निबद्धः स तावदामूलचूडप्रयुक्त इति प्रतिपाद्यते । तत्र यत्तावदुक्तं शिवस्य जगत्कारणत्वसिद्धेः कारणवाक्यघटकनारायणशब्दस्य शिवपरत्वसिद्ध्यधीनत्वात् नारायणशब्दस्य शिवपरत्वमेव प्रथमम् उपपादनीयमिति । अत्रोच्यते ---------

End:

श्रीभगवान् --

एवकार्यावतारेषु मानुषत्वमुपागतः ।
त्वामेवाराधयिष्यामि त्वमेव वरदो भव ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

यत्त्वयोक्तं वहस्वेति देव देव उमापते ।
सोऽहं वहामि त्वां देव मेघो भूत्वा शतं समाः ।।
मदंशो द्वादशोऽयस्तु विष्णुनामा हि भूतये ।
अवतीर्णो भवन्तन्तु आराधयतु शंकरः ।। इति ।

एतेन 'नराणां नारस्य वा सम्बन्धिनी नारे' अयश्चणं च अयणे यस्मात्' इति व्युत्पत्त्या नारायणशब्देन नरसम्बन्धिशुभावहविधिज्ञाने तदुभयजनकत्वविशिष्ट-शिवस्य बोधः । अयशब्दस्य शुभावहविधिवाचित्वं, णकारस्य ज्ञानवाचित्वं च अमर, नानार्थरत्नमालादौ सिद्धमिति निरस्तं नरसम्बन्धिशुभावहविधिज्ञानोभयबोधस्य शक्त्या संभवेऽपि तज्जनकबोधस्य अन्यपदार्थलक्षणाधीनत्वात् । अल्पाच्तरस्य णशब्दस्य पूर्वनिपातापत्तेश्च - वस्तुतस्तु नराज्जातानि तत्त्वानीति उपबृम्हणसहकृतया

'यच्च किंचिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा ।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायण स्थितः' ।।

इति श्रुत्या प्रतिपन्नः नारायणशब्दः योगार्थ एव रुद्रे निषिध्यते । न तु अन्यादृशः कुसृष्टिकल्पित इत्यलं पल्लवितेन ।।

Colophon:

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितं नवकोटिविभंजनम् ।।
।। णत्वतत्वविभूषणम् सम्पूर्णम् ।।

115 - तत्त्वटीका

Beginning:

श्रीमान्वेंकटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शरदिन्दुविकासमन्दहासां स्फुरदिन्दीवरलोचनाभिरामम् ।
अरविन्दसमानसुन्दरास्यारविन्दासनसुन्दरीमुपासे ।।
स जयति यतिराजमुनिः करुणाजलधिः क्षमापरिष्कारः ।
करिशैलकृष्णमेघः काङ्क्षितवर्षी यदर्पितैस्तोयैः ।।
स्वतसिद्धं शुद्धस्फटिकमणिभूभृत्प्रतिभटं सुधासध्रीचीभिर्द्युतिभिरवदातत्रिभुवनम् ।
अनन्तैस्त्रय्यन्तैरनुविहितहेषाहलहलं हताशेषावद्यं हयवदनमीडीमहि महः ।।
प्रणम्य वरदाचार्यवादिहंसाबुधावपि ।
त्रय्यन्तसूत्रभाष्यार्थतत्त्वटीका विधीयते ।।
असावनतिसंक्षेपादतिविस्तरवर्जनात् ।
सर्वन्यायानुकूलत्वात् गृह्यतां सारवेदिभिः ।।
शातितः शतदूषण्यां शंकरादिमुधाग्रहः ।
शारीरकशरीरं तु व्यक्तमत्र प्रदर्श्यते ।।
विश्वामित्रकुलीनेन वेदान्ताचार्यसूरिणा ।
शश्वद्विधीयते विश्ववैतण्डिकविधूननम् ।।
निखिलनिगमश्रेणीचूडापरिष्कृतिरूपिणी
निपुणमनसामाशासौधस्थलीषु निबध्यते ।
यतिपतिभुवो भाष्यस्यासौ यथाश्रुतचिन्तित-
प्रवचनविधावष्टाविंशे जयध्वजंपट्टिका ।।
तत्र तावत् -- अखिलेत्यादिभाष्यस्य दशार्थानभिदध्महे ।।

End:

अनन्यपरसगुणवाक्यबाधसमर्थानि कानि वाक्यानि ? तेषां च तद्बाधे कीदृश सामर्थ्यम् इत्यत्राह - एतदुक्तमिति । कूटस्थम् - विश्वविकाराध्यासे तन्निवृत्तौ च स्वयं कूटवदविकृतम्, कूटे-अध्यसनीये स्वयं सत्यतया सर्वाधिष्ठानत्वेन स्थितं वा । इतराणि उपात्तानि - यस्सर्वज्ञः इत्यादीनि ---- ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

2185 A - तत्त्वदीपः

Beginning:

वेदान्तवेद्यं गुरुभिस्सुगुप्तं मन्त्रद्वयं श्लोकमुखं रहस्यम् ।
यस्तत्त्वदीपात्सुपथं चकार तं सौम्यजामातृमुनिं प्रपद्ये ।।
सुन्दरजामातृमुनेः प्रपद्ये चरणाम्बुजम् ।
संसारार्णवसम्मग्नजन्तुसन्तारपोतकम् ।।
अस्मद्गुरुभ्यस्तेषां च गुरुभ्यो विदधे नमः ।
निदधे च शिरस्स्याद्यगुरोः पादौ श्रियः पतेः ।।
अस्मद्गुरुदयायातयतीन्द्रांगीक्रियाश्रयः ।
लभेय लब्धविज्ञानो लक्ष्मीपतिपदद्वयम् ।।
मन्त्रद्वयोत्तमश्लोकविषयोऽर्थप्रदर्शकः ।
गुरुस्नेहदशारूढस्तत्त्वदीपः प्रकाश्यते ।।
तत्रार्थतत्त्वमाचार्याद्यथामति यथाश्रुतम् ।
वर्ण्यते मननार्थाय मतो ह्यर्थस्स्थिरो भवेत् ।।

अयं जीवात्मा, स्वयं नित्यनिर्मलज्ञानानन्दैकस्वरूपः स्वाभाविकज्ञातृत्व-कर्तृत्वभोक्तृत्वस्वरूपधर्मः, भगवदायत्तस्वरूपस्थितिप्रवृत्तिकतया तच्छरीरत्वेन तदनन्यार्हशेषत्वादिरूपस्वासाधारणाकारः, सर्वप्रकारतत्पारतन्त्र्ययुक्ततद्दास्यैकरसः, तदनुभवजनितनिरवधिकातिशयनित्यानन्दयोग्योऽपि गुणत्रयात्मिकया क्षणक्षरण-स्वभावया तमः प्रकृत्यनृताऽविद्याद्यपरनामधेयया अनाकलितमूलसम्बन्धया ----- ।।

End:

-------अयमेव उपायविशेषः सर्वाधिकारिणा स्वस्वाभिलषितपुरुषार्थसिद्ध्यर्थं स्वोज्जीवनार्थं च समाश्रयणीय इति निरवद्यम् ।

सौम्यजामातृमुनिना गुरुस्नेहदशान्वयात् ।
चरमश्लोकसारार्थतत्त्वदीपः प्रदर्शितः ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

आरण्यकगुहान्तस्थमदृश्यं गुरुगोपनात् ।
सम्पश्यसि रहस्यार्थं तत्त्वदीपान्वितः पुमान् ।।
सुन्दरजामातृमुनिं वन्दे पूर्वैः सुरक्षितं गुरुभिः ।
यस्तत्त्वदीपकरणादकरोत्सुपथं रहस्यार्थम् ।।

2223 - तत्त्वदीपः

Beginning: Adds the following verses in the beginning.

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ।।
यस्य द्विरदवक्त्राद्याः --- विष्वक्सेनं तमाश्रये ।।
वेदान्तदेशिककटाक्षविवृद्धबोधं कान्तोपयन्तृयमिनं करुणैकपात्रम् ।
वत्सान्वयायमनवद्यगुणैरुपेतं भक्त्या भजामि परवादिभयंकरार्यम् ।।

1281 - तत्त्वदीपमन्त्रार्थः

Beginning:

---मन्त्रान्तरोत्कृष्टम् इत्यवगम्यते । अत्र गायत्र्यां मन्त्रत्रयप्रधानभूतानां मन्त्रत्रयोपादानं तेषां कृत्स्ने --- प्रदर्शनार्थं व्याप्यव्यापकतद्गुणव्याप्तिप्रकारतत्फलादिसमस्तार्थनिधायितया व्याप्ताव्याप्ताहारादिसापेक्षद्वादशाक्षरादिव्यापकमात्रप्रकाशकात् षडक्षराद्वा स्वार्थसम्पत्तिरविगीता । किं च

पुरा जन्मान्तरे तात द्वादशाक्षरसंज्ञितः ।
मन्त्रोऽभ्यस्तो महाप्राज्ञः तत्प्रभावानुगीतवान् ।।
श्रूयतां कालदण्डोऽय कामादीनां च सत्तम ।
पापानां चैव रोगाणां विविधस्य भवस्य तत् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

नमो नारायणायेति प्रणवेन समन्वितः । ------- सम्भवत्विति ।।

-------------------- । -------------------- ।।

हे पुत्र शिष्याः श्रुणुत न मन्त्रोष्टाक्षरात्परः ।

यथा सर्वेषु देवेषु नास्ति नारायणात्परः ।।

तथा सर्वेषु मन्त्रेषु -------- परिवर्तते ।

सर्ववेदार्थसारार्थः संसारार्णवतारकः ।।

गतिरष्टाक्षरो नृणां अपुनर्भवकांक्षिणाम् ।

ऋचो यजूंषि सामानि तथैवाथर्वणानि च ।।

End:

'अहं स्मरामि मद्‌भक्तं नयामि परमां गतिम्' कालादिकार्यनियमेन कारणपाटवमात्रसाध्यसकृद्‌भगवद्‌स्मरणवतः तदनन्तरमेव म्रियमाणदशायामप्रतिमस्मृतिव्यतिरेकेण काष्ठपाषाणकल्पस्यापि भगवतैव स्मर्यमाणस्य तत्प्राप्तिप्रतिपादनात् प्रारब्धभंगः सम्प्रतिपन्नः । भक्तिनिष्ठस्य---अनन्तर एव फलप्राप्तिरिति पूर्वमेवोक्तम् । प्रारब्धं च पूर्वार्जितफलानुभवार्थमारब्ध--- तस्य 'भोगेन त्वितरे क्षपयित्वा' इति भोगप्रतिपादनात् । अतः प्रारब्धकर्मानुभवोऽपि प्रपन्नस्य न विद्यते इत्येवं रूपात् ।

संपश्यति रहस्यार्थ तत्त्वदीपान्वितः पुमान् ।

सुन्दरजामातृमुनिं वन्दे पूर्वेसुरक्षितम् ।।

गुरुभिर्यस्तत्त्वदीपकरणादकरोत् सुपथं रहस्यार्थम् ।

एकः सुमनः प्रसक्तं - - - - - - - ------ ।।

दक्षिण्योपात्तमहं रामानुजसुरभिमारुतं वन्दे ।

स्वाधीनयति यो नित्यं हठात्कृत्य मनो मम ।

तस्मै रामानुजाख्याय नमस्ते ब्रह्मयोगिने ।।

Colophon: इति श्रीतत्त्वदीपमन्त्रार्थः समाप्तः ।।

Scribe: संकर्षरामानुजदासः । श्रावणावदिसंवत्सर 1902 ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

106 - तत्त्वमार्ताण्डः

Beginning:

---- तर्हि नामसमन्वयाधीनः तत्रापि लिंगसमन्वय इति नास्मद्विशेषस्तस्य । अत्रापि यदि नामसमन्वयाधीनो लिंगसमन्वयः, केन तर्हि नामसमन्वयः । निरवकाशेन केनचिल्लिंगेनेति चेत्, किमत्र कानिचिल्लिंगानि सावकाशानि, सर्वाण्यपि हि वस्तुतो निरवकाशान्येव । अन्यत्र प्रसिद्धश्रुतिसमभिव्याहारप्रयुक्तः सावकाशत्वभ्रान्तिवारणमेव न्यायसाध्यमिति चेत् सत्यम् । तद्धि उभयत्रापि समम् । अन्यथा पूर्वपक्षानुत्थानादिति यत्किंचिदेतत् । अथ स्यात् - पूर्वत्र अन्तस्थत्वमेको विषयः । तत्किं विष्णोः उत अन्यस्येति सन्देहे अन्यत्र प्रसिद्धेन्द्रादिनामवशादन्यस्येति प्राप्ते, निरव काशलिंगान्तरैः तद्विष्णोरेवेति निर्णीयत इति चेन्न, तर्हि ...

End:

------ जीवपरत्वशंकानिरासे पौनरुक्त्यशंकानिरासे पौनरुक्त्यशंकानुत्थानात् । अत एव समाधानस्यापि अनुत्थानाच्च । समाधानमपि न चतुरश्रम् । 'भेदव्यपदेशात्' इति तुल्ये निर्देशे अर्थभेदकल्पनादौर्घटयात् । विस्तृतं च एतत् अन्यत्रेति दिक् ।

सर्वात्मकं सुखमयं हरिमक्षराख्यं
मुक्तानुभाव्यमजहद्दहरं भजेयम् ।
अंगुष्ठमात्रमजरैः वसुभिश्च भाव्यं
शूद्रानुपास्यमुपकल्पितनामरूपम् ।।
यन्नामरूपघटना पटुना कृतं तत्
किं नाम तेन बलिनो भविताऽत्र कार्यम् ।।
तद्रक्षणक्षमकरी बहिरीकुलेन्दोः
श्रीवेंकटप्रभुमणेः करुणाऽत्र नो चेत् ।।

Colophon:

प्रथमाध्यायस्य तृतीयःपादः समाप्तिभगमत् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

385 - तत्त्वमार्ताण्डः

Beginning:

शुभमस्तु । अविघ्नमस्तु ।

एवं प्रथमेनाध्यायेन प्रतिपादितस्य परस्य ब्रह्मणो निखिलजगत्कारणत्वस्य सम्भावनीयसमस्तप्रकार (दुर्धर्षणत्व) ख्यापनाय द्वितीयोऽध्यायः आरभ्यते । तत्र प्रथमे पादे परोद्भावितकारणविषयक दोषाश्लेषोऽभिधीयते । द्वितीये च तत्पक्ष-प्रामाणिकत्व-शंकाकळंकितधियां स्वपक्षश्रद्धावैकल्यविध्वंसनाय तत्पक्षप्रतिक्षेपः। तृतीयचतुर्थयोऽस्तु सर्वकारणत्वघटकचिदचिद्गतकार्यत्वानुपपत्तिनिमित्तदोष-विशेषोद्धारः । तत्रापि भोग्यभोक्तृवर्गकार्यत्वानुपपत्तिः तृतीये । भोगोपकरणस्थता-निरासः चतुर्थ इति विवेकः । यथाहुराचार्याः-

पादद्वन्द्वं द्वितीये परिहरति परे कारणे बाह्यपीडां
कार्यद्वारेण पादान्तरयुगमुदयत्यान्तरक्षोभशान्त्यै ।

End:

तस्मादुक्तप्रकारमेव सूत्रार्थवर्णनमधिकरणवर्णनं च इति निरवद्यम् ।

सांख्यस्मृतिविरोधेन वेधो मतविरोधतः ।
कार्यवैरूप्यतश्शिष्टानेकतन्त्रविरोधतः ।।
देहत्वावाप्तभोगाप्त्या कार्योपादानभेदतः ।
स्वजातोषहतेः क्लृप्तकारकस्तोमहानितः ।।
कृत्स्नांशाद्यूहसंपत्त्या कृतिनैष्फल्यतः क्रमात् ।
आक्षिप्तं विश्वकर्तृत्वं साधितं दशभिर्नयैः ।।

Colophon:

इति श्रीशैलकुलतिलकसर्वतन्त्रस्वतन्त्रश्रीनिवासताताचार्यनन्दनेन लक्ष्माम्बागर्भ-शुक्तिविविक्तमुक्तामणिना (कौण्डिन्य) श्रीनिवासदीक्षितकृपाकटाक्षवीक्षाशिक्षित-मीमांसाद्वन्द्वनिर्द्वन्द्वमतिना निजाग्रजाण्णयदीक्षितानुग्रहगृहीतचतुस्तन्त्रनियन्त्रित-मानसेन श्रीनिवासविदुषा विरचिते तत्त्वमार्ताण्डे द्वितीयस्याध्यायस्य प्रथमः पादः।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

581 - तत्त्वमुक्ताकलापः (सव्याख्यः)

Beginning:

परेष्टभंगाय त्यागविशेषं निष्कर्षति - त्यागत्रैविध्यमिति । स्वमतम् 'एतान्यपि च कर्माणि' इति श्लोकोक्तम् । 'कार्यमेव' इति श्लोकोऽपि तदर्थः। तत्फलितमाह - तस्मादिति । 'मोहात्तस्य परित्यागस्तामस' इत्यस्यार्थोऽपद्दशामित्यादिना दर्शितः । ननु योगदशायां कालादिकमजानतः कर्तव्यलोपः स्यादेव, ऋते कर्मत्यागो न तामस इति तत्राह - योगारूढस्येति । योगदशायां बहिरप्रवृत्तमनसो न धीपूर्वककर्मत्यागः अबुद्धिपूर्वकं तूत्थानकालेऽपि न लिम्पतीति नियमितम्, किमुत समाधौ अंगार्थवाक्यैः कर्मणां समाधिरूपांगिशेषत्ववाक्यैः इत्यर्थः ।

End:

तथा च चक्रकमित्यर्थः, ज्ञातो भावना, भावनया च स्मृतिः स्मृत्या ज्ञानमिति श्रुत्या ज्ञाने पुनरस्मत्पक्षः प्रत्यक्षादिभिः स्मृतिविषयज्ञानमत्रैव प्रतिक्षिप्तम्, कथन्तर्हि महर्षीणां प्रत्यक्षेण धर्मदर्शनम्? इत्थं श्रुत्या धर्मं प्रतिपाद्य स्वयमनुष्ठानतारो धर्मप्रभावात् प्रभावविशेषमासाद्य पश्चात् "चोदनालक्षणोऽर्थो धर्मः" इति श्रुति-विषयत्वेन धर्मान् साक्षात्कुर्वन्ति, नैतावता स्मृतीनां श्रुतिमूलत्वभंगः ; तैरपि योगिभिर्योगदशायां श्रुतिप्रमाणगम्यत्वेनैव धर्माणामुपलम्भात्, अतो वेदमूलत्वं स्मृत्यादेरुपपन्नमिति स्मृतीतिहासादेर्वेदमूलत्वम् ।।

979 A – तत्त्वविवेकः (स्वरूपदर्पणम्)

Beginning:

श्रीबालवल्लिकुलवारिधिपूर्णचन्द्रश्रीरामसूरिपदपंकजमत्तभृंगम् ।
तल्लब्धमन्त्रवरमात्मगुणाभिरामं श्रीरामदेशिकमहं शरणं भजामि ।।

वाधूलश्रीनिवासार्य चरणौ संश्रयेमहि ।
यस्स्मृतिस्सर्वसिद्धीनामन्तरायनिवारिणी ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रामानुजांघ्रिरजसा तेजितस्वान्तदर्पणे ।
प्रतिबिम्बतु याथात्म्यमात्मानात्मतदात्मनाम् ।।
रामानुजदयालब्धगुणरत्नविभूषिताः ।
स्वरूपदर्पणं स्वच्छं वीक्षन्तां सात्विका मुहुः ।।
औदार्यकरुणाक्षान्तिज्ञानवैराग्यवारिधीम् ।
रामानुजदयाकारं श्रीकृष्णगुरुमाश्रये ।।

वेदान्तविषये स्वरूपदर्पणाय निरन्तरं मंगलमातनोतु । श्रियःपतेः अखिलचेतनाचेतनपदार्थसकलविधशासितुः परमात्मनः परमबन्धोः अखिलजगज्जनिजीवनलयैकलीलस्य भगवतो नारायणस्य अनन्यार्हशेषभूतेन नित्यामलसुखावबोधस्वरूपस्वभावेन सर्वप्रकारतत्पारतन्त्र्ययुक्तेन तच्चरणारविन्दनित्यकैंकर्यसंजाततन्मुखकमलविकासानुभवसम्भावितनिरतिशयानन्दसिन्धुकल्लोलडोलाविहरणलीलनिरन्तरोचितेनापि गुणत्रयात्मकानादिमायातिरोहितस्वप्रकाशतया समधिगतायथार्थज्ञानेन तद्धेतुकविरुद्धकर्मवर्त्तिना तन्निबन्धनब्रह्मादिस्तम्बपर्यन्तसर्वविधशरीरपंजरप्रवेशनिरन्तरभूयानुभूयमाननिरवधिकदुःखसागरनिमग्नेन तद्दुःखविलोकनासम्भवननिर्हेतुककृपाप्रेरितभगवदवलोकनामृतजननसमयाभिषिक्तेन तन्निमित्तनिगमबाह्यक्रमः ... ।

End:

अर्चावतारश्च परव्यूहादिविग्रहद्रव्यव्यावृत्तद्रव्यमयत्वं तद्विग्रहसमानसन्निवेशत्वं तदीयप्रीतिविषयत्वं तत्समानकृतनामरूपाभिमानयोगित्वं तद्वदर्चनस्नपनादिभिः अखिलफलप्रदानशीलत्वं तथा ....तदपेक्षितग्रहादिस्थापनाभ्युपगमेन तत्तदनादरकालप्रतीक्षणापारवश्येन तत्तदनादिभोगसापेक्षत्वं च अनुसन्धेयम् । तस्मात् रुचिजनकत्वं स्वाश्रयणीयत्वमशेषलोकशरण्यत्वं अनुभाव्यत्वं च अर्चावतारे परिपूर्णम् । स्वस्वामिभावं .... ।

Colophon:

इति स्वरूपदर्पणे अचित्स्वरूपनिरूपणाधिकारः ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

619 - तत्त्वार्थप्रकाशिका (चापमज्जनवैभवव्याख्या)

Beginning:

मुदमातनोतु महिषी मनोहरा वटपत्रध्रतल्पशयनस्य सुन्दरी ।
निजभक्तचित्तनिखिलेष्टदा सदा मम निष्णुचित्ततनया स्ववीक्षणैः ।।
कल्याणमव्याहतमातनोतु बल्याद्यशेषासुरदर्पहन्ता ।
वल्याननाधीशविभीषणेन्द्रान् तुल्यार्थभाजोत्वतयस्स मह्यम् ।।
कल्याणं कलयत्वशेषचिदचित्सृष्ट्याद्यनेकश्रमं
स्वामित्वात् कृपया वियुक्तमिति या भर्तुर्हरेर्वीक्षणैः ।
भक्ताभीष्टविधानकल्पकतरुप्रख्यैः कृपापूरितैः
अंगीकृत्य मुदान्वितं विदधाति श्रीर्मह्यमम्बानिशम् ।।
यस्य गजास्य प्रमुखाविघ्नान्निघ्नन्ति पारिषद्याश्च ।
तं विघ्नस्य निहन्त्यै विष्वक्सेनं भजामि वाक्सिद्ध्यै।।
करुणारसपरिणाह सुवरुणालयनयनं मतदूषणमदवारण........वचसम् ।
शरणागतभरणादरमुरुणारुणवसनं कलये हृदि कलिकल्मषहरणं यतिरमणम् ।।
यतिवरवचसि निपुणः कलिमलकुलकरिचयमदमृगरमणः
पातु स मृदुरसपूर्णः चरणमवतु स रंगराट् चरणः ।

End:

-- सरिद्भक्तपथ्यावक्रं प्रकीर्तितमिति गोदामज्जनवैभवं पठति यो भक्त्यावहं कामदं लब्धेह अखिलसम्पदः स तु वरान् पुत्रा --- सत्रादिकान् । पश्याभिः सुधाश्च पूर्वाकृपया भट्टेशपुत्र्यामपरं स्थानं प्राप्य पुनर्भावादिरहितो भूया --- भवान् ।

Colophon:

इति श्रीमद्वरवरमुनिसंकेतितसप्तगोत्रसप्ततत्यघटकात्रेयवंशस्थूलमुक्ताफलायमान श्रीरंगाचार्यसूनुना सुन्दरराजदासेन विरचितायां तत्वार्थप्रकाशिकाख्यायां चापमज्जनवैभवव्याख्यायां चतुर्थः परिच्छेदः समाप्तः ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

98 A – तदुक्तार्थविलासः

Beginning

प्रांचं कंचनसैन्धवोत्तममम‌ुं राकेन्दुबिम्बोज्वलम् ।
वन्दे यत्पदपंकजं प्रणमतां मूकाग्रगाणामपि ।।
------- विजृम्भते प्रतिकलं सन्ध्यानटधूर्जटी ।
श्रीमन्मौळिपरिभ्रमत् सुरनदी पूरप्रियं भावुकः ।।
--------------------------------------- ।
यत्सूक्तिगंगा भवपावकोत्थज्वालावलीढा सहसा धिनोतु ।।
प्रपत्याख्यं मार्गं प्रकटमकरोत् सर्वसुलभम् ।
प्रपद्येहं नित्यं शठमथनमेनं गुरुवरम् ।।
वेदव्रातमलिम्लुचं सुररिपुं पूर्वं हयस्यात्मना ।
संभूयद्रुतमाजघान भगवान् लक्ष्मीसहायः खलु ।।
पौत्रो विश्रुतवीरराघवगुरोः श्रीवेंकटार्यात्मजः ।
सोऽयं कांचन सन्तनोऽति कुतुकाद्वेदान्तदासः कृतिम् ।।
आवश्यको हि सर्वेषां तदुक्तार्थस्य निर्णयः ।
यन्मूलः पूर्वपरयोश्शास्त्रयोरैक्यनिश्चयः ।।

इह खलु परमकारुणिको भगवान् अनादि भवजलधिनिमग्नजनानुद्धर्तुकामः व्यासरूपेणावतीर्य त्रयीं व्याचिख्यासुः पूर्वभागतत्त्वार्थनिर्धारणाय निजान्तेवासिनं जैमिनिं नियुज्य तदुत्तरभागतत्त्वार्थनिर्धारणाय स्वयमेव शारीरकं शास्त्रं निरूपयितुं प्रववृते ।।

End:

-----कथम् अक्षरग्रहणमात्रपरत्वे आरम्भणीयत्वम्? इत्थम्, अध्ययनविधेः अर्थज्ञानपर्यन्तत्वे सति अर्थज्ञानस्याधीत्यस्नायात् 'आचार्यकुलाद्वेदमधीत्य अभिसमावृत्य' इति यज्ञाद्यनुष्ठानशेषत्वेन विनियोगाद्युपनिषत्सिद्धस्य ब्रह्मज्ञानसिद्धस्यापि

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कर्मशेषतापत्तेः तस्यैव ज्ञानस्य 'आत्मा वा इदं' 'ब्रह्म वा इदम्' 'अयमात्मा ब्रह्म' इति त्रैय्यन्तस्थब्रह्मशब्दस्यात्मपर्यायत्वेन आत्मविषयत्वात् आत्मज्ञानस्य व्रीह्यादि ----

Colophon:

इति तदुक्तार्थविलासे प्रथमः परिच्छेदः ।।

98 B – तदुक्तार्थविलासः

Beginning:

तदुक्तग्रहणादपि शास्त्रैक्यसिद्धिः । दृश्यते हि तदुक्तग्रहणम् । 'संज्ञातश्चेत् तदुक्तमस्ति तु तदपि' । 'हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दस्तुत्युपगानवत्तदुक्तम्' । 'अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम्' । 'प्रदानवदेव तदुक्तम्' । 'अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववत् दृष्टश्च तदुक्तम्' इत्यादिसूत्रेषु । अत्र कर्तृनिर्देशस्य अधिकरणनिर्देशस्य हि अभावेन तदुक्तमित्युक्तिः एकस्मिन्नेव ग्रन्थे पूर्वोत्तरतां स्वरसतोऽवगमयति ।।

End:

--स्पष्टमत्र व्यासाचार्याः समन्वयाधिकरणे वचसा न त्वपूर्वत्वादिति 'यदाग्नेयोष्टाकपालः' इत्युक्तौदाहरणं हरन्ति । तद्व्याख्यायां तूलिकाख्यायामपि वचसा न त्वपूर्वत्वादित्यत्र यदाग्नेयोष्टाकपाल इत्यादीनि किं विधिः उत अनुवाद इति विशये यच्छब्दानुबन्धादनुवाद इति पूर्वपक्षं कृत्वा अन्यतः प्राप्तस्यैव अनुवादासंभवात् अष्टाकपालादीनाम् अन्यतो प्राप्तेः अनुवादित्वायोगात् सिद्धान्तितम् ।।

Colophon:

इति तदुक्तार्थविलासे प्रथमः परिच्छेदः ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

2657 – तप्तमुद्राविलासः

Beginning:

श्रीमद्गुणाकरमहागुरुभागधेयः श्रीचित्रकूटपति किंकरतासु -- ।
------------- नियतकर्म --------------प्रदिभि ---------- ।।
वाधूलश्रीनिवासप्रथितसुतवर -- सेवा सुप्रीत श्रीवृषाद्रि---------।
गोविन्दक्ष्मापतेर्या प्रतिभटविजयस्तंभलक्ष्मीप्रतिष्ठां ---------- ।।
------श्रीमत् कौशिकवाधूलमहाचार्य पदाश्रयः
श्रीनृसिंहाभिध --------------पादपंकजसेवया ।
--------अधीतसर्वशास्त्रार्थस्तप्तमुद्रां प्रकाशये ।

--- 'सुपां सुलुक्' इत्यादिना करणे विहित -- स्वादेशेन प्रथमान्तत्वात् न चेयम् प्रातिपदिकार्थ प्रथमैवेति वाच्यम् । अतप्ततनुरित्यत्र करण सापेक्षत्वेन प्रातिपदिकार्थप्रथमायाः असंभवात्, ननु सुपांसुलुक् इत्यस्य छन्दो विषयत्वात्-----

End:

न च अग्निहोत्रादिकर्मणां स्वर्गनरकप्राप्तिनिवृत्तिकामपुरुषकर्तव्यत्वेन ख्यातिलाभादि कामाधिकारकत्वाभावात् ---- अन्यथा मन्त्रतन्त्रविपर्यासादिनापि अनुष्ठानप्रसंगादिति वाच्यम् । तर्हि मोक्षनरकप्रवृत्तिनिवृत्तिकामकर्तव्यत्वेन सुदर्शनधारणस्य ख्यातिलाभादि कामकर्तव्यत्वाभावान्नावैदिकत्वप्रसंगः, अन्यथा मन्त्रतन्त्र विपर्यासादिनाप्यनुष्ठानप्रसंगादेवेति -----।

धारणं शंखचक्रादेः ख्यातिलाभादि हेतुभिः ।
प्रवृत्तिर्यदि यज्ञादौ साकथं न भवेत् ततः ।।
यज्ञादेः ख्यातिमूलत्वे वैदिकत्वं कथं भवेत् ।
तस्माद्वेदादि मूलत्वात् वैदिकं चक्र धारणम् ।।

Colophon:

इति श्रीमत्कौशिकवाधूल महाचार्यश्रीचरण ------ तत्वयाथात्म्यावबोधेन

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

आत्रेयकुलतिलक श्रीमदमृतफलाचार्यसूनुना तत्प्रसादलब्ध श्रीनृसिंहापरनामधेयेन विरचिते तप्तमुद्राविलासे सुदर्शनधारणनिर्णयो नाम सप्तमः परिच्छेदः ।।

९ - तात्पर्यचन्द्रिका (गीताभाष्यटीका)

Beginning:

अथ चतुर्थसंगतिं वक्तुं तृतीयाध्यायार्थं संग्रहेण उदगृहणाति-तृतीयेऽध्याय इति । सहेतुकमिति-ज्ञानयोगकर्मयोगयोः सप्रमादत्वनिष्प्रमादत्वादिहेतुपूर्वकमित्यर्थः । एतेन 'अशक्त्या लोकरक्षायै गुणेष्वारोप्य कर्तृताम् । सर्वेश्वरे वा न्यस्योक्ता तृतीये कर्मकार्यता' इति संग्रहश्लोकेऽपि व्याख्यातः । अशक्तस्य, शक्तत्वेऽप्यप्रसिद्धस्य च स्वार्थनिपुणस्य कर्मयोग एव कार्यः, प्रसिद्धस्यतु अशक्तस्य शक्तस्य वा स्वार्थ लोकरक्षार्थं च स एव कार्य इति तृतीयाध्यायेनाधिकारिचिन्तनम्, कर्मयोगस्य प्रामाणिकत्वं ज्ञानमिश्रत्वं स्वरूपं तद्वैविध्यं ज्ञानांशप्राधान्यं प्रासक्तिको भगवदवतार इति षडर्था इह उच्यन्त इत्याह - चतुर्थेनेति । ननु 'प्रसंगात् स्वस्वभावोक्तिः कर्मणोऽकर्मताऽस्य च । भेदाः ज्ञानस्य माहात्म्यं चतुर्थाध्याय उच्यते' । इति चत्वारोऽर्थाः संगृहीताः । तत्कथमत्र षडर्थानुकीर्तनम् ।।

End:

तथा 'सहस्रस्थूणे विमिते दृढ उग्रे यत्र देवानामधिदेव आस्ते' इति । सामान्यतो विशेषश्च प्रवृत्तयोः पूर्वोत्तरसामानाधिकरण्ययोर्मध्यस्थेन 'त्वया ततम्' इत्यादिना शरीरात्मभावमेव निबन्धनमिति स्पष्टमुच्यत इत्यभिप्रायेणाह - त्वयाऽऽत्मत्वेन इति ।

'इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यस्सुपर्णो गरुत्मान्', 'एकं सद्विप्राः बहुधा वदन्ति', 'अग्निं यमं मातरिश्वानमाहुः', 'तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः। तदेव शुक्रममृतं तद्ब्रहम तदापः स प्रजापतिः', इत्यादि श्रुत्युपबृम्हणाभिप्रायेण 'त्वया ततं विश्वम्' इति निर्दिष्टम् -------- ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

Colophon

इति कवितार्किकसिहंस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेंकटानाथस्य वेदान्ताचार्यस्य कृतौ श्रीमद्भगव——द्गीताभाष्यटीकायां तात्पर्यचन्द्रिकायां दशमोऽध्यायः ।।

120 - तात्पर्यदीपिका (वेदार्थसंग्रहव्याख्या)

Beginning:

अभंगुरकलादाना स्थूललक्ष्मत्वमीर्यणे ।
तुंगायमहते तस्मै तुरंगाय मुखे नमः ।।
वरदं द्विरदादिशेखरं कमलायादयितं दयानिधिम् ।
सकलार्थिजनार्थितप्रदं प्रणमामि प्रणतार्तिहारिणम् ।।
कृत्वानवद्यं निगमान्तभाष्यं निराकृतं येन भयं श्रुतीनाम् ।
प्रतारितानां बहु श्रुतैस्तं रामानुजं योगिनमाश्रयामः ।।

'अशेष' इत्यादि श्लोकद्वयेन प्रारीप्सितप्रकरणविघ्नपरिसमाप्त्यर्थं श्रोतृणां तत्प्रसिद्ध्यर्थं स्मृत्याचारप्राप्तं श्रुत्या मंगलमाचरति। स्वपक्षे प्रतिपाद्यं उपायोपेयात्मकम् । तत्र सिद्धवस्तुस्वरूपमुपेयं - चतुर्थ्यन्तैः पदैः सूच्यते । नमः शब्देन उपायस्सूच्यते । तत्र उपेयस्य ब्रह्मणः उभयविभूतिविशिष्टत्वं पूर्वार्धेन उच्यते । 'निर्मल' इत्यादि पदेन उभयलिंगत्वमुच्यते ।

End:

-'विपुलाच पृथ्वी' इति प्रकारेण यत्रकुत्रचित् यदाकदाचित् एवंविधाः पुरुषाऽपि संभविष्यन्तीति मत्वा, तेषाम् अभिमतविषयत्वेन वेदार्थसंग्रहः कृतः इत्यर्थः ।

वेदार्थसंग्रहसुधां वेदान्ताब्धेर्य आहरत् ।
रामानुजाय मुनये तस्मै भगवते नमः।।
वेदार्थसंग्रहव्याख्या विहितेयं यथाश्रुता ।
वेदव्यासापराह्वेन श्रीसुदर्शनसूरिणा ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

Colophon:

इति हरितकुलतिलकश्रीवाग्विजयसूनुना श्रीरंगराजदिव्याज्ञालब्धवेदव्यासापरनामधेयेनश्रीमद्वरदराजार्यपादसेवासमधिगतवेदार्थसंग्रहतात्पर्येणश्रीसुदर्शनसूरिणा विलिखिता तात्पर्यदीपिका समाप्ता ।।

3002 – तिरुमन्त्रकारिका

Beginning:

सुन्दररामानुजमुनेः प्रपद्ये चरणाम्बुजम् ।
संसारार्णवसंमग्नजन्तुसंतारपोतकम् ।।
अस्मद्गुरुस्तदाचार्यान् परमानखिलानपि ।
रामानुजार्य करुणावात्सल्यवरुणालयम् ।।
श्रीशा-------व्यामोहतृणीकृततदन्यकम् ।
पूर्णयामुनरामाब्ज-----भृगुनाथान् शठवैरिणम् ।।
सतां यदंघ्रियुगलं मातृतातसुतांगनाः ।
सेनेश------- तद्दिशौश्च नत्वा तेषां प्रसादतः ।।
रहस्यत्रितयार्थोयं चिन्त्यते दृढताप्तये ।
रहस्यत्रितयं ज्ञेयं चेतनेन मुमुक्षुणा ।।
ज्ञातव्यमखिलं तस्य यस्मादत्राभिधीयते ।
रहस्यत्रितयं प्रोक्तं महानष्टाक्षरो मनुः ।।
द्वयाभिधं मन्त्ररत्नं चरमश्लोक इत्यमी ।

End:

स्वप्राप्तये शोचति तद्विरोधिनिवृत्तिमात्रं वदतोत्र भावः ।
यद्भक्तिभाजां फलमभ्यधायि प्रवृत्तिभाजोपि तदेव चेति ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्लोकस्य गीताचरमस्य भावं श्रोतुं यथावद्भगवान् --।
गुरुक्तमस्वान्ति ----- स्वयं पुराष्टादशकृत्व --------।।
श्लोकार्थमेतं गुरुणोपदिष्टं यथावदा-----तदर्थनिष्ठाम् ।
भाग्याधिकात्केपि भजन्ति सन्तस्सुदुर्लभा भागवतप्रधानाः ।।
श्रीरामानुजयोगिवर्यप्रसादलब्धार्थ दृढाप्ति सिद्धचै ।
कृता रहस्यत्रयकारिकेयं सद्भिः क्षमैवात्र परं विधेया ।।

2588 A – तैत्तिरीयोपनिषद्भाष्यम्

Beginning:

यस्याद्यानन्द पर्यन्ता युवत्य--------- ।
अप्रमेयतयाज्ञातास्तं श्रीशं संश्रयेमहि ।।
सांहितीष्वपि संजाता सर्वेशः प्रतिपाद्यते ।
वरीतावरणीयो वारुणा वारुणेष्वपि ।।

इह खलु--संसारतत्त्व-श्रान्तमानसस्तैस्तरणप्रकार-----सर्व--पुरुषार्थार्थ-सार्थवा--- भवाः नित्यनिर्दोषवेदास्तावत्समाश्रयणीयाः । तत्रापि मुमुक्षुभिर्विशेषस्त्रय्यन्तस्संसेव्यः------तैत्तिरीयारण्यमध्य ----- वारुण्या याज्ञिक्य संसारिणां शरणं दासां नारायणस्वरूपरूप विभूत्यादिष्टतात्पर्यातिशयात्। पंचमहासंहितानुसन्धान प्रयाना--- -'शन्नो मित्रः' इत्यारभ्य द्वादशानुवाकाः । देवताच संजाता सर्वेश्वर इति देवतानुक्रमण्यां स्मर्यते । ततोत्तरास्त्रयोनुवाका वारुण्यं उपनिषदः वारुणात्, ऋषिणा प्रोक्तत्वात्, देवता च सर्ववरणशीलोवरुण इति स्मृतः । 'अम्भस्यपारे' इत्यारभ्य समस्तप्रश्नो याज्ञिक्य उपनिषदः यज्ञात्मना भगवता नारायणेन दृष्टत्वात् देवता च स एवेति स्मृतः । तत्र तावत् साम्हित्यो वारुण्यश्च व्याख्यास्यन्ते ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

End:

---एतद्वैजरामर्यमग्निहोत्रं सत्रं एतदस्य प्रपन्नस्यात्मयाजिनो जीवनं, जरामर्यमग्निहोत्रं जरया वयोगाहान्याद्वीयन्ते समाप्यत इति जरामर्यं मरणान्तमग्निहोत्रम् 'अग्नये अग्रनयनाय परमात्मने प्रत्यगात्माऽत्र भूयते' इत्यग्निहोत्रं सत्रं, सदा त्रायकं सतोपात्रायकं सत्रम् । स एवं विद्वानित्यादिना एतद्वेदनफलं दर्शयति । एवमात्मयागवित् मरणान्तरं सूर्याचन्द्रमसोः महिमानं प्राप्नोति इत्युपनिषदिति गतम् । इति चतुष्षष्टितमोनुवाकः ।

Colophon:

इति नारायणदासीये तैत्तिरीयोपनिषद्भाष्ये याज्ञिक्योपनिषदः समाप्ताः ।।

565 - तैत्तिरीयोपनिषद्विवृतिः

Beginning:

अतसीगुच्छसच्छायमंचितोरस्थलं श्रिया ।
अंजनाचलशृंगारमंजलिर्मम गाहताम् ।।
व्यासं लक्ष्मणयोगीन्द्रं प्रणम्यान्यान् गुरूनपि ।
तैत्तरीयकवेदान्तविवृतिं करवाण्यहम् ।।

परविद्यामारभमाणो विघ्नशान्त्यै देवताः प्रार्थयते । शंनो मित्रश्शं वरुणः ---- शंनो विष्णुरुरुक्रमः । सूर्यः वरुणः, अर्यमाख्यः दित्यविशेषः, इन्द्रः बृहस्पतिः, महता विक्रमाख्यपदविन्यासविशेषेण युक्तो विष्णुश्च सुखप्रदा भवन्त्वित्यर्थः ।

End:

----- अत्र दक्षिणायने मृतस्य चन्द्रप्राप्त्यभिधानेपि न पुनरावृत्तिः इति "अतश्चायनेपि दक्षिणे" इति सूत्रे भाष्यकृता प्रपंचितमिति नेह तद्विचारः क्रियते ।।

Colophon:

इति तैत्तरीयोपनिषत्प्रकाशिका समाप्ता ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

82 – दुरूहशिक्षा

Beginning:

अस्मद्गुरूणां पंक्तिं तामगोघद्वयवासिताम् ।
भजामः श्रीशपादाब्जमधुधारात्मिकां पराम् ।।
साम्राज्ये वर्धतां वादिकविसिंहस्य सद्गुरोः ।
यत्रोदितोक्तिस्वप्नोऽपि दाक्षिणात्येभभंजकः ।।
रमासखस्याद्यगुरोः शंखचक्रादिदो गुरुः ।
व्याख्या मुद्रितहस्ताब्जो जीयाद्यतिपुरन्दरः ।।
श्रीशैलपूर्णश्रीभाष्यकारदेशिकमाश्रये ।
जगत्प्राणोऽपि यद्दत्तजीवनोऽभूज्जगत्पतिः ।
शास्तापि गोप्ता समभूद्वक्षसि स्थितया यया ।
वृषाद्रीशस्तां शरणमशरण्यः श्रये श्रियम् ।।
सकरुणारुणाफुल्लदृगुज्ज्वलं
सहसितोचितदृश्यसुविस्मयम् ।
स्वविनतेषु वृषाचलवल्लभं
पुरुषमेव मनो मम गाहताम् ।।
वचोभूषणमीमांसां दुरूहैकशरीरकाम् ।
शिक्षयामो लक्ष्मणार्यमतधौरेयसूक्तिभिः ।।
भाषैकादृतसाक्षिकप्रणयिनामर्थाननर्थावहा-
स्त्रय्यन्तद्वयबाधितस्ववचनैः साध्या न सिद्धया हतान् ।
नादत्ते मम चित्तमत्र सुतरामाचार्यवाग्गुम्फनै-
र्न्यायोपेतनिरर्गलप्रसरणग्रन्थैः प्रतिष्ठापितम् ।।

End:

अतः एव न कामनाधिकारत्वभंगोऽपि अत्र 'मोक्षयिष्यामि' इति संकल्परूपस्य -

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

--- फलत्वेन श्रुतेः तत्र --- नैवाधिकारः । न तु मोक्षकामनैव उपायविशेषणत्वेन तदन्यायात् । 'त्वमेवोपाय भूतो मे भव' इति ।।

Colophon:

इति श्री रहस्यत्रयसारव्याख्याकरणविख्यातवैभवघनगिरिश्रीनिवासाख्य-गुरुवरकरुणाविषयेण तन्नामकतत्प्रपौत्रगुरुकरुणलब्धतत्त्वत्रयविवेकेन वरदश्रुत्य-चलमुनिवरपदकमलसमाश्रयणसंजाततत्त्वहितपुमर्थयाथात्म्यविज्ञातेन श्रीमद्वरद-देशिककटाक्ष्यैकलक्ष्यतामुपगतेनकविकथककण्ठीरवचरणयुगलविन्यस्तसमस्तभरेण श्रीनिवासपरकालयतिना वेदान्तयतिराजस्वामिशिष्येण विलिखितायां पूर्वखण्डार्थ--विषयकदुरूहशिक्षायां श्रीशब्दार्थारोपितपरप्रतितन्त्रार्थप्रतिक्षेपतः प्रथमः परिच्छेदः।

1345 - द्रमिडोपनिषद्भाष्यविचारः

Beginning:

'अंजरयमडनाराय्' इति द्रमिडोपनिषदि श्रूयते । तद्विषयभाष्ये तत्रापाततः प्रतीयमानानामर्थानां स्वसन्देशप्रेषणादीनामर्थानां लौकिककामिनीकामुकास्वाद्यतया तत्राचार्यादरस्य असकृत्कीर्तनरूपादरलिंगैः सिद्धेः तद्ग्रन्थस्य बौद्धाद्यपागमस्य विद्यास्थानत्वाभावात् स्वाध्यायोच्येत विधिविषयाध्ययनगोचरत्वन्नास्तीति श्रेयसा --- भिरवगन्तव्यार्थत्वन्नास्तीति जानानः विद्यास्थानत्वन्नास्तीति मत्वा कैवि --- त्यभिप्रायः । तत्र परमपुरुषार्थतया साधनतदधिकारिप्रदर्शनेन स्वप्रमाण-भूतवेदोपयोगः अध्ययनविधेः अक्षरग्रहणमात्रगोचरत्ववादिनाम् अस्वीकरणीयः । तेनास्य वेद --- । एवं चाचार्यसूक्तिभिरवबोधितानां --- भावानां निष्कृष्टस्वरूपफलोपायत्वाभावप्रतीतेः नादरणीयाचार्यसूक्तिरिति ज्ञानम् । यत्ज्ञानं तत्त्वज्ञानं विपरीतार्थविषयकमेव तस्य ...

End:

----- नादरणीयत्वमिति किंचिदस्ति तच्च न शकितं न समाहितं च भाष्ये

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

इति न्यूनतास्ति । आत्मानि ---- अध्यासित --- त्वेवंविधं परमार्थस्य प्रकरणे श्रवणाभावेन तेनैव निदिध्यासनविषयात्मना अनवगमसंभवेन तस्यानवगतस्य भाग्यहानिः कारणमिति वचनं व्यर्थं पिष्टपेषणं --- घटादिचाक्षुषाभावस्य चक्षुरभावायत्तत्वस्य भाग्यहानिहेतुवचन --- यदि कश्चिद्दोषः । ननु न चात्रात्मनो वचनाभावाः । ---- मिति तद्वाचकशब्दस्य श्रवणात्, इतः परं भाग्यहान्ये--मयासीदिति चेत्, सत्यं तत्प्राप्त्यर्थाचार्यदूतप्रेषणादिप्रवृत्तिपरग्रन्थस्य मेघसन्देशादि-तुल्यत्वाभावेन तदुपेक्षाया अनवसरात् इति ।।

.226 D - द्रमिडोपनिषत्सारः

Beginning:

सेवायोग्योऽतिभोग्यः शुभसुभगतनुः सर्वभोग्यातिशायी

श्रेयस्तद्धेतुदाता प्रपदनसुलभोऽनिष्टविध्वंसशीलः ।

भक्तच्छन्दानुवर्ती निरुपधिकसुहृत्सत्पदव्यां सहायः

श्रीमान् सर्वोचितायामुपनिषदि मिषत्येष गाथाशतैर्नः ।।

आद्ये पश्यन्नुपायं प्रभुमिह परमप्राप्यभूतं द्वितीये

कल्याणोदारमूर्तेर्द्वितयमिदमिति प्रेक्षमाणस्तृतीये ।

ऐश्वर्यादेश्चतुर्थे विषमधुतुलयानन्यभोग्यत्वमिच्छन्

षड्भिःस्वां पंचमाद्यैरनितरगतितामाचचक्षे मुनीन्द्रः ।।

End:

सतामित्थं सारं द्रमिडनिगमस्यान्वकथयत्

बहूनां विद्यानां बहुमतिपदं वेंकटपतिः ।

दिशासौधश्रेणी दृढघटितजैत्रध्वजपटी

परामर्शभ्रश्यत्प्रतिमतनिराबाधनिगमः ।।

मनुव्यासप्राचेतसपरिषदर्हा क्वचिदियं

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सुधासिक्ता सूक्तिः स्वयमुदयमन्विच्छति जने ।
निरुन्ध्युः के विन्ध्याचलविकटसन्ध्यानटजटा-
परिभ्रान्ता पंगोरुपरि यदि गंगा निपतति ।।

Colophon:

द्रमिडोपनिषत्सारः सम्पूर्णः ।।

1658 B - नारायणपारम्यम्

Beginning:

नारायणस्य सर्वस्मात् परत्वमुच्यते -
सत्यं सत्यं पुनस्सत्यं उद्धृत्यभुजमुच्यते ।
वेदशास्त्रात् परन्नास्ति न दैवं केशवात्परम् ।।

End:

महाभारते -
तावद्गच्छेत्तु तीर्थानि सरितश्च सरांसि च ।
यावन्नाभूच्च भूपाल विष्णुभक्तिपरं मनः ।।
प्रमादात्कुर्वतां कर्म प्रच्यवत्यध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ।। इत्यादि ।

57 - निक्षेपचिन्तामणिः

Beginning:

अखिलभुवनरक्षासाधनायावतीर्णे कुमतिकलिविलासध्वान्ततिग्माशुजाले ।
निरवधिकरुणाब्धौ वेदचूडागुरौ मे भवतु परमभक्तिः श्रीनिधौ वेंकटेशे ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

क्षरन्ती सायुज्यं झटिति जगतां पापमखिलं
क्षिपन्ती सन्तापं द्रुतमपनयन्ती शुभगुणान् ।
वहन्ती मूर्त्या श्रीश्रुतिशिखर रामानुजमुने-
श्चरन्ती न्यासाख्या मनसि मम विद्या निवसतात् ।।
अस्मद्देशिकतद्‌गुरून् श्रुतिशिरश्चूडार्यरामानुजौ
रंगेशं रघुपुंगवानुजगुरुं श्रीमन्नतार्तिच्छिदम् ।
श्रीरामानुजपूर्णयामुनमुनीन् रामारविन्देक्षणौ
नाथश्री शठकोपसैन्यरमण श्री श्रीपतीन् भावये ।।
आत्रेयकृष्णार्यमथागमान्तरामानुजार्यं गुरुसार्वभौमम् ।
श्रीरंगनाथं च गुरुं प्रणम्य निक्षेपचिन्तामणिमातनोमि ।।
आचार्यचरणैरुक्तान्यासांगांग्यादिगोचरान् ।
विशेषान्विप्रकीर्णान् संदर्शयामि यथामति ।।

तत्र निक्षेपन्यासापरपर्यायप्रपत्तिविद्यायाः अंगानि - आनुकूल्यस्य संकल्पः, प्रातिकूल्यस्य वर्जनं, कार्पण्यं, महाविश्वासः,गोप्तृत्ववरणं चेति पंचविधानि ।

End:

प्रायश्चित्तविशेषेषु सर्वस्वरादिशेषेषु च नात्मनहिंसनदोषोऽस्ति तथाऽर्तशरणागतौ दृप्तस्य तु यथा शास्त्रं चिरं जीवितुम् इच्छतः । प्राणरक्षणशास्त्रार्थलंघनं तु अपराधनमिति चरमश्लोकाधिकारेऽभिहितम् । अतो दृप्तप्रपन्नस्य वध्यादिदशायाम् औषधपानाद्यतिलंघनदोषज्ञापनोज्जीवनहेतु इष्टौषधादि भक्षणमवश्यं कार्यम्, एवम् अन्यदपि श्रीदेशिकनिबन्धनादि- अवलोक्यानुष्ठेयम् इति संक्षेपः ।

Colophon:

इति आत्रेयकृष्णतनूजेन श्रीमद्‌गोपालदासेन विरचिते निक्षेपचिन्तामणौ द्वितीयोधिकारः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

169 - निक्षेपरक्षा

Beginning:

श्रीमान्वेंकटनाथार्यः + सन्निधत्तां सदा हृदि ।।

संसाराध्वगतागतश्रमहरः सर्वावगाह्य स्वयम्
श्रीसंश्लेषसमुल्लसद्घनरसः शीतस्तटाको महान् ।
नेदिष्टेन महापथेन सुगमो येषां प्रसादादभूत्
तीर्थं तत्र शुभं प्रकाशयतु नः तेभ्यो गुरुभ्यो नमः ।।

प्रायः प्रपदने पुंसां पौनःपुन्यं निवारयन् ।
हस्तः श्रीरंगभर्तुः मामव्यादभयमुदितः ।।

स्थितं तावत् - देहबाह्याभ्यन्तरकरणप्राणधिषणाविलक्षणः पारलौकिक-सुखदुःखोपभोगभोग्यः, परमपुरुषनित्येच्छातन्त्रिक--तन्त्यपारतन्त्यः, अनादिकर्म-प्रवाहहेतुक चतुर्विधदेहप्रवेशजनिततत्तदात्माभिमानसन्तान्यमानावर्जनीय...,

End:

विवृतमिह रहस्यं यन्मया गोपनीयं
स्खलितमपि यदीषद्भूयसा वा तदेतत् ।
निजमहिमविशेषप्रेममात्रेण नाथः
क्षमत इति विचिन्त्य क्षन्तुमर्हन्ति सन्तः ।।

गुरुचरणसपर्यास्वादवैदेशिकानां
प्रलपितमवधूय प्राक्तनेनाध्वनैव ।
व्यवृणुत परमार्थं वेंकटेशः प्रजानां
निगमगिरिनिगूढं न्यासविद्यानिधानम् ।।

Colophon:

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेंकटनाथस्य वेदान्ताचार्यस्य कृतिषु निक्षेपरक्षा संपूर्णा ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

1225 B - निक्षेपरक्षा कठिनपददीपिका

Beginning:

श्रीशैललक्ष्मणमुनेः पादपद्मैकसेविता ।
निक्षेपरक्षावाक्येषु श्रुतार्थस्तन्यते क्वचित् ।।

संसारेति । नेदिष्ठेन समीपवर्तिना । महापथेन - संप्रदायप्रवर्तित- प्रपत्तिमार्गेण, तत्र तटाके, तीर्थं कृपादिकं, शुभं मंगलं प्रकाशयतु इत्यन्वयः । गुरुभ्यो नमः, नमस्या । तत्र तटाके तेंगिन मडुक्कल् पोलेन्नुंरीत्या अर्चावतारे । शुभं - भोग्यं, तीर्थ - पावनम् । शरणवरणं प्रकाशयतु इत्यन्वयः । सन्तनं - सनातनम् । संसिद्धिकं - स्वाभविकं, सम्यगध्यक्षम् - समीचीनप्रत्यक्षं च कृत्यानि सृष्टिस्थिति संहार- मोचननियमनानि परिणमितेति शामितेत्यर्थः । पितृत्वो -- माहातत्त्व प्रयुक्तत्व कालुष्यम् ।

End:

'सर्वधर्मान् परित्यज्य' इति वचनप्रग्रहे । इति कविदादिक ---उपायः इत्यन्वयः । कुंकुमेति । कुंकुमलतायाः काश्मीरकेदारानुताजीवं त्वं जीवनौषध्य निगमप्रसादस्य -- ऊर्ध्वदेशारोहणाधायनीभूतः वेणुकृतः श्रव्योपकरणविशेषः । क्षमते इति विचिन्त्य तदेतत् स्कलितं------ ।।

177 - नित्यग्रन्थः - सव्याख्या

Beginning:

श्रियःपतये नमः । श्रीकृष्ण पाहि । श्रीमते रामानुजाय नमः ।
रामानुजमुनिर्जीयाद्यो हरेर्भक्तियंत्रितः ।
कलिकोलाहलक्रीडामुधाग्रहमुपाहरत् ।।

अथ परमैकान्तिनो भगवदाराधनक्रमप्रयोगं वक्ष्ये । भगवत्कैंकर्यैकरतिः परमैकान्ती भूत्वा भगवानेव स्वशेषभूतेन मया स्वकीयैश्च देहेन्द्रियान्तःकरणैः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

स्वकीयैरेव कल्याणतमैः औपचारिकसांस्पर्शिकाभ्यवहारिकैः भोगैरखिलपरिजन-परिच्छदान्वितं स्वात्मानं प्रीतं कारयितुमुपक्रमत इत्यनुसन्धाय । तीर्थंगत्वा शुचौ देशे पादौ प्रक्षाल्याचम्य तीरं संशोध्य शुचौ देशे मूलमन्त्रेण मृदमादाय द्विधा कृत्वा शोधिततीरे निधाय एकेनार्धेन देहमलप्रक्षालनं कृत्वा निमज्ज्याचम्य प्राणायामत्रयमासिनो भगवन्तं च ध्यायन् कृत्वा अन्यमृदभागमाधाय वामपाणितले त्रिधा कृत्वा पृथक्प्रोक्ष्य अभिमन्त्र्य एकेन दिग्बन्धनमस्त्रमन्त्रेण कुर्यात् । आद्येन तीर्थपीठं मूलमन्त्रेण कुर्यात् इतरेण अंगमन्त्रेण अंगानि सम्मन्त्र्य निमज्याचम्य अर्घ्यार्धम् उत्क्षिप्य भगवद्वामभागांगुष्ठान्निसृत गंगाजलं संकल्पितपीठे आवाह्य मूलमन्त्रेण जलांजलिमाधाय सप्तकृत्वोपिमन्त्र्यामूर्ध्नि सिंच्येत् ।

End:

----- भगवन्तम् अर्चयिष्यामि इति योगं संकल्प्य बलमन्त्रंच अनुसन्धाय ततश्च प्रत्यहम् आत्मनोज्जीवनायैव अनुस्मरेत् इत्युक्तप्रकारेण चिन्तयित्वा यावच्छक्ति किंचित्कालं भगवन्तं ध्यात्वा कृतं च करिष्यामि इति योगेन भगवत्कर्मणा भगवान् प्रियतां वासुदेवः इति विज्ञापयेत् ।।

Colophon:

इति भगवद्रामानुजमुनिविरचिते नित्यव्याख्या सम्पूर्णा ।।

186 A - नित्यानुष्ठानपद्धतिः

Beginning:

अज्ञानध्वान्त संघात प्राभादिकदिवाकरः ।
रंगलक्ष्मण योगीन्द्रः श्रीमान् श्रेयस्करोतु नः ।।
सन्न्यासाश्रमनिष्ठानान्नित्यानुष्ठान पद्धतिः ।
पांचकालिक सद्धर्मी समुपेता प्रदर्श्यते ।।

मोक्षाश्रमी -- 'उत्तिष्ठ ब्रह्मणस्पते । देवयन्तस्त्वेमहे । उपप्रयन्तु मरुतस्सुदानवः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

इन्द्रप्राशूर्भवा स चा । प्रैतु ब्रह्मणस्पतिः । प्रदेव्येतु सूनृता ।

End:

अथ सायंसन्ध्यां यथा विधिस्नात्वा सायंसन्ध्योपासनं जपान्तं कृत्वा -- इमं मे वरुणः + प्रियास इत्युक्त्वा ओमिति ब्रह्म+ स महेश्वरः इत्यन्तं जपित्वा सायमभिगमन आराधनं कृत्वा स्वाध्यायं समाप्य योगं संकल्प्य श्रीवैकुण्ठगद्यादिकम् अनुसन्धाय शयनकाले-

वासुदेवप्रसुप्तोऽस्मि यावन्नोदयते रविः ।
अहंतावन्निपत्स्यामि सर्वभूतहिताय वै ।।

इत्युक्त्वा निद्रां कुर्यात् । निद्राविच्छेदे भगवन्नामसंकीर्तनध्यानादिकं कुर्यात् ।

Colophon:

इति यत्यान्हिकप्रयोगः ।

112 F - नीतिमाला

Beginning:

कर्मविचारस्य कर्तव्यायां सत्यां कर्मणां साधनत्वात्तद्विचारस्यैव प्राथम्यमुचितम् । अननुष्ठिते साधने साध्यनिर्णयानुपपत्तेः । अत एव पूर्वकाण्डे स्वर्गादिफलचिन्तायाः प्रागेव साधनभूतयागादिचिन्ता क्रियते । अतः कर्मब्रह्मभागविचारयोः पौर्वापर्यमुपपन्नम् । किंच नित्यनैमित्तिकानां कर्मणामकरणे प्रत्यवायबाहुल्यं श्रुतिभिः उद्घुष्यते । अतो मुमुक्षुरपि कर्मविचारे प्रथमं प्रयतते । अनर्थं परिहृत्यैव हि अभ्युदये यतितव्यम् । अपि च सद्विद्यादहरविद्यादीना भेदाभेदनिर्णयः कर्मभेदाभेदनिर्णयहेतुभिर्न्यायैः शारीरके क्रियते । उक्तं च भगवता बादरायणेन - 'हानौ तु उपायनशब्दशेषत्वात् कुशाच्छन्दस्तुत्युपगानवत्तदुक्तम्' 'प्रदानवदेव तदुक्तम्' इत्यादि । अतः कर्मविचारस्यैव पूर्ववृत्तत्वं युक्तम् । केचिदाहुः -

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अद्वितीयात्मविज्ञानमद्वितीयानिवर्तकम् ।
श्रूयते तस्य चोत्पत्तौ समाधिः कारणं श्रुतौ ।।
औचित्याच्च विरुद्धत्वाच्छमादेः कर्मणामपि ।
शमाद्यनन्तरं कर्तुं युक्तं ब्रह्मविचारणम् ।।
एकधैवानुद्रष्टव्यम् तरति शोकमात्मवित् ।

इत्यादिभिः अद्वितीयात्मविज्ञानमपवर्गसाधनतया श्रुतम् ।

End:

यदुक्तं लोके स्वातन्त्र्यं प्राशस्त्यं पारतन्त्र्यं निन्दितंचेति ; एतन्न सार्वत्रिकम्, अप्राप्तषोडशवर्षाणां पुत्राणां पितृपारतन्त्र्यस्य, स्त्रीणां भर्तृपारतन्त्र्यस्य च श्लाघ्यत्वात् । तेषामेव स्वातन्त्र्यस्य निन्दितत्वाच्च । सेवा श्ववृत्तिराख्यातेत्यनेनापि अनर्थहेतुभूतान्यसेवैव निषिध्यते, न सेवामात्रम् । इतरथा हि अन्तेवासिनामाचार्यसेवाया अशास्त्रीयत्वप्रसंगात् । तस्मात् ज्ञानानन्दाद्यसंख्येय-कल्याणगुणगणस्य सर्वस्वामिनः परमपुरुषस्यानुभवः शेषभूतस्य मुक्तस्य परिचर्यारसमावहतीति तथाविधो भवगवदनुभवः परमनिश्श्रेयसमिति सर्वं समंजसम् ।।

Colophon:

।। इति नीतिमालायां निःश्रेयसनिर्णयाधिकारो दशमः ।।

2415 - न्यायपरिशुद्धिः

Beginning:

श्रीमान्वेंकटनाथार्यः + सन्निधत्तां सदा हृदि ।।
पत्युः संयमिनां प्रणम्य चरणौ तत्पादकोटीरयोः ।।
संबन्धेन समिध्यमानविभवान् धन्यांस्तथाऽन्यान् गुरुन् ।
शुद्धं संश्रितबादरायणतनोर्नारायणोक्तिभिः
श्रीमान्वेंकटनायकः स्थितिपदं निर्माति नीतेः शुभम् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विद्यास्थानेषु धर्म्येषु गण्यते न्यायविस्तरः ।
स च विप्लावितस्तैस्तैस्ततोऽत्र परिशोध्यते ।।

यद्यपि कथं चिदक्षपादं सत्पक्षे निक्षेप्तुं शक्यम् ; न च कणभक्षपक्षनिक्षेपवत् क्लेशः, नापि तत्कर्ता गौतमस्तामसेषु परिपठयते ; नापि च विप्रलम्भकत्वख्यातिः; तथाऽपि ब्रह्मसूत्रकारादिबहिष्कृतत्वान्नातीव वयमाद्रियामहे । न खलु आर्षत्वादिभिस्तदादरः, अतिप्रसंगात् ।

प्राज्ञानां प्रथमेनैव गुरुणा हि स्वयं पुरा ।
लोकायतमतं प्रोक्तं लोकविप्लवकारणम् ।।

अथवा पितामह एवात्र प्रमाणम्, य इन्द्रविरोचनयोश्चार्वाकमतमुपदिष्टवान् । तथा गौतमोऽपि सम्भाव्यते । अथापि,

काणादशाक्यपाषण्डैस्त्रयीधर्मो विलोपितः ।
त्रिदण्डधारिणा पूर्वं विष्णुना रक्षिता त्रयी ।।

इति स्मृतेः,

बहवः पुरुषा राजन् सांख्ययोगविचारिणः ।
नैतदिच्छन्ति पुरुषमेकं कुरुकुलोद्भव ।।
समासेन तु तद्व्यासः पुरुषैकात्म्यमुक्तवान् ।।

End:

इह तु प्रमाणचिन्तायाः परमप्रयोजनं दर्शयितुं प्रमेयस्य संग्रहोक्तिः, सपरिकरप्रमाणमर्यादाप्रतिपादनपरत्वान्न्यायविस्तरशास्त्रस्य, इति ।।

स्वातन्त्र्येण मितं सुखेतरतया यद्भाति जन्तोरिदं
सर्वं यस्य विभूतिरित्यवसितं स्वादं व्यनक्ति स्वकम् ।
अन्तः स्वान्तमनन्तनन्दतुनिधिर्मेदोदृशां
मादृशामाविर्भावयतु स्वयं स भवगानात्मानमात्मेश्वरः ।।
यत्रोदासत जैमिनिप्रभृतयः श्रुत्यर्थचिन्तापराः
यस्यां कन्दलयन्ति मन्दमतयः पारिप्लवान् विप्लवान् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विश्वेषामिह वेंकटेशविदुषा विश्रान्तये वादिनां
प्राची नीतिषु पर्यशोधि सरणिः प्रच्छायनिष्कण्टका ।।
शुद्धिं बिभ्रति मादृशां भणितयश्चूडान्वये केवलं
प्रान्ते मिश्रमभाणि नीतिनिपुणैः किं तेष्वमन्तव्यता ।
युक्तं वर्गयुगे विमृश्य योक्तिकैः
अंगीकर्तुमशक्यनिह्नवगुणग्रन्थो निबन्धो मम ।।
निरूढनिगमत्रये निखिललोकचिन्तामणौ
प्रसक्तिमुपसेदुषि प्रणिदधानभावास्पदे ।
रतिं भजति भावना लयमिवोपयाति द्रुतं
रमावसुमतीसहाचरितधर्मणि ब्रह्मणि ।।

colophon:-

इति न्यायपरिशुद्धौ प्रमेयाध्याये द्वितीयमाह्निकम् । न्यायपरिशुद्धिः समाप्ता ।।

392 - न्यायपरिशुद्धिव्याख्या - 'न्यायसारः'

Beginning:

--- अनुमानत्तादुद्धारं तत्त्यकामप्रजापतिः अकरोत् --- कलवाद --- प्रत्यक्ष--भावः यस्मिन् भगवान् --- सति तस्य तत्त्व--- इति भावः, यस्य भगवतः ----क्रियाकोपेन प्रशंसः । --- सूरिष्वेव योनि --- इति भावः, नित्यैश्वर्यमहोदधिः --- परिपूर्णः । --- श्रेयसा या मोक्षा --- परमपुंरुषार्थ --- भवत्यित्यर्थः ।

End:

कर्मानुष्ठानेऽपि फलावधित्वं सप्रमाणं प्रतिपादयति अन्येति कर्ममात्रेण ज्ञानोत्पत्तिं प्रतिपादयति । गुणवतेति । सात्त्विकगुणवता तस्यैव तत् साधनेत्योक्तेरिति भावः । 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः' इति प्रमाणवदुक्त-कैवल्यमुक्तिप्रसंगः । अत एव ज्ञानिनः कैवल्यार्थिनश्च अपुनरावृत्तिम्,

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

ऐश्वर्यार्थिनः पुनरावृत्त्वात् इह उत्तरत्र उक्तम् । अस्तु तस्याप्यर्चिरादिगतिश्चेत् न तु प्रतिकालं, अप्रतिकालं --- विशेषितत्वात् इदमप्यप्रतीकालम्बनमिति चेन्न, मन आलम्बनस्याप्यप्रति ------- ।

colophon:

इति श्रीमद्वेदान्ताचार्य --- जलधिकौस्तुभ श्रीदेवराजार्यसूनुना श्रीनिवासेन विरचितायां न्यायपरिशुद्धिव्याख्यायां न्यायसारसमाख्या --- ।

न्यायपरिशुद्धि व्याख्यानं समाप्तम् ।।

914 A - न्यायभास्करः

Beginning:

------ विशेषणमिति ज्ञानाद्वैलक्षण्यस्य विषयितावैलक्षण्यादेव वाच्यतया सन् घटः घटस्सन् इति ज्ञानयोरपि विषयितावैलक्षण्यादेव वैलक्षण्यनिर्वाहात् सत्प्रति-योगिक तादात्म्यान्तरे मानाभावात् आश्रयासिद्धिः दुर्वारा । यदपि ज्ञातो घट इति प्रतीत्या ज्ञानप्रतियोगिकविषयतासम्बन्धस्य घटादौ सिद्धत्वात् न आश्रयासिद्धिः । सत्तादात्म्यं हि चिद्रूपज्ञानस्य विषयतारूपं तादात्म्यम् । अत एव घटपटादिरूप-विषयभेदेन तादृशसत्तादात्म्यानन्त्यमपि प्रामाणिकं कपालादिनिष्ठाविषयतारूप-सत्तादात्म्येनावच्छिन्नस्य कपालो घटवान् इति ज्ञानस्य घटादिनिष्ठविषयता-रूपसत्तादात्म्यस्य तन्त्वादिनिष्ठविषयतारूपेण सत्तादात्म्येन अभेदा सम्भवात् ।।

End:

न च निरवच्छिन्नविशेषणतासम्बन्धेन तादृशाभावस्य साध्यघटकत्वात् न सिद्धसाधनतेति वाच्यम् । तथापि तादृशविषयतासम्बन्धस्य वृत्यनियामकत्वेन तत्सम्बन्धावच्छिन्नाभावाप्रसिद्ध्या साध्याप्रसिद्धापत्तेः वृत्यनियामकसम्बन्धस्य अभावप्रतियोगितावच्छेदकत्वागीकारेऽपि विषयतायाऽविषयतात्वेन सम्बन्धतायाः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्रामाणिकत्वेऽपि विशेष्यताप्रकारताभिन्नविषयतात्वेन सम्बन्धतायाः अप्रामाणिकतया तादृशाभावप्रसिद्ध्यसाध्या प्रसिद्धिः दुर्वार इति दिक् ।।

colophon:

इति शेषकुलतिलकस्य यादवाद्रिनिवासरसिकस्य अनन्ताचार्यस्य कृतौ न्यायभास्करे सदसद्विलक्षणत्वरूपमिथ्यात्वभंगो द्वितीयः ।।

2563 - न्यायमन्दारसमा - तत्त्वसुधाव्याख्या

Beginning:

--- भजेहं भक्तिसाराख्यं सौदर्शनमहंमहः ।
ययौजंगमतां येन --- गास्तु विभान्वितः।।
न्यायमन्दरमयितादागमार्णवात् ।
सम्भूतया प्रतिमादन्तां श्रीतत्त्वसुधयाबुधाः ।।

ईश्वरः सर्वभूतानां, ईश्वरीं भूतानाम् इत्यादि सर्वशब्दयोः अन्यतरसंकोचेन उपपत्ता उभयसंकोचस्यानुचितत्वात् पत्नीत्वरूपेण सर्व भगवद्विषय --- वाक्यस्य सर्वशब्देन श्रियोपि संग्रहान् श्रियो भगवन्नियाम्यत्वम् । किंच सत्यप्युभयसंकोचे श्रीश्रीशयोर्नान्योन्य नियन्तृत्व विरहेण जगन्नियन्तृत्वसिद्धिः । वाक्यभेदापत्तेः तयो --- सामर्थ्यादवस्थाकल्पनैकदेशत्वादिति न्यायेन जगन्नियन्तृत्व अन्यथा अनुपपत्या भगवन्नियाम्यत्वाभावसिद्धिः ।

End:

जगन्नियन्तृत्वं हेतुतयाविवक्षितन्नशक्यम् । विष्णुपत्नीत्वहेतुकजगन्नियन्तृत्व श्रवणात् ममयोनिरप्स्वन्त समुदिति श्रवणाचेत्याशयेनाहं असिद्धेरिति स्वरूपासिद्धेरित्यर्थः । चकारेणजगन्नियन्तृत्वं भगवन्नियाम्यत्वमुपपन्नम् । अत्र अर्थाश्चाकल्पनैकदेशत्वादित्यस्यापि अनवतार इत्ययमर्थः समुच्चीयते । न समर्थेति अनियाम्यत्व साधन इति शेषः। वाक्यद्वयेऽपि क्रमेण भगवत श्रीनियन्तृत्वस्य

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रियो भगवन्नियाम्यत्वस्य चानत्तिरेव नत्वाभावोक्ति सर्वशब्दद्वयसंकोचकल्पनेऽपि नवाशब्दरूप संकोचकल्पनं युक्तम्, एकसंकोचेन उपपत्तावुभयसंकोच- स्यान्यायत्वान्नापि विनिगमकाभावः । भूयसो विनिगमशब्दाश्रित --- वचनसाम्यं स्त्रीप्रत्ययेन तत् बाधात् मच्छेषभूत इत्यादिना वचनद्वयसमाप्युपबृम्हित- त्वाच्चेत्यादिकमपि सकल्याण --- सन्धेयमिति भावः ।

विस्तीर्णान्निगमार्णवं विपुलयद्विश्वं हरेस्थापितः,
प्रज्ञाभोगवतापरन्नियमितः प्राज्ञैस्समावर्तितः ।
आकारे ---- र्न्नयमन्दरो पशुभिरप्यायोजितश्रीमतः
श्रीतत्त्वं समुंचयन् भगवतश्चित्ते विधत्तेमुदम् ।।

colophon:

इति श्रीवाधूलवीरराघवकृतिषु तत्कृत श्रीतत्त्वसुधाव्याख्यानं न्यायमन्दार- समाख्यानं सम्पूर्णम् ।।

2537 - न्यायरत्नावलिः

Beginning:

श्रीमान् वेंकटनाथार्यः + सन्निधत्तां सदा हृदि ।।

स्वामी समस्तजगतामपि यः परासौ दूतो बभूव विनतस्य मृदंगकेतोः ।
स्वांदर्शयन् प्रणतकिंकरतां जनानां श्रेयः समे दिशतु वृष्णिकुलाधिराजः ।।
यद्भक्तिरेव निखिलानि फलानि सूते यत्पादपंकजयुगं धनमस्मदीयम् ।
यद्वन्दिनो निगममौलिगणाः समस्ताः देवः प्रसीदतु स मे करिशैलसंगी ।।

श्रीमदादिवराहार्यान् वेंकटेशगुरोः सुतान् ।
वन्दे येषां प्रसादेन वस्तुभावं गतोऽस्म्यहम् ।।
वेंकटेशगुरुं भक्त्या प्रपद्येस्मत्पितामहम् ।
अनवद्यगुणैर्यस्य च्छात्रैः पृथ्वीपरिष्कृता ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अस्मद्गुरोर्गुणगणान् हृदिभावयामः श्रीवेंकटार्यचरणौ शरणं भजामः ।
वेदान्तदेशिकपदाम्बुजमाश्रयामः श्रीमद्यतीन्द्रचरणौ मनसोद्वहामः ।।
लक्ष्मीसहायपदपंकजभक्तिभाजो निर्धूतसंसृतिभयाः कृपया मुरारेः ।
साम्यं व्रजन्ति परमं गतजन्मशंका इत्यागमेकशरणाः प्रवदन्ति सन्तः ।।

End:

न च साधनवैषम्यान्मुक्तौ वैषम्यसम्भवः ।
अत्यर्थप्रीतिरूपत्वं साधनस्याभ्युदीरितम् ।।
तारतम्यपरा या च परैः स्मृतिरुदीरिता ।
सा तु श्रुतिविरुद्धत्वान्न प्रमाणमिति स्थितिः ।।
सालोक्यादिपरा यद्वा तारतम्यपरा स्मृतिः ।
तत्सर्वथापि मुक्तानां भोगसाम्यं व्यवस्थितम् ।।

colophon:

श्रीवत्सकुलजलधिकौस्तुभवैदिकसार्वभौमवेदान्तदेशिकसंप्रदायप्रवर्तकवेंकटदेशिकसुकृतपरिपाकसर्वतन्त्रस्वतन्त्रवेदान्ताचार्यानुजश्रीमदादिवराहाचार्यतनयस्य तच्चरणारविन्दचंचरीकस्य तत्प्रसादलब्धब्रह्मविद्यावैशद्यस्य निजहृदयकमलविहरमाण श्रीरंगराजप्रेरितस्य कोनेट्याम्बागर्भसम्भवस्य वेदान्ताचार्यस्य कृतिषु न्यायरत्नावल्यां द्वितीयः परिच्छेदः ।

3112 - न्यायसिद्धांजनम्

Beginning:

श्रीमद्वेंकटनायकः श्रुतिशिरस्तात्पर्यपर्याप्तधी-
र्लब्धार्थो वरदार्यपादरसिकाद्रामानुजाचार्यतः ।
बालानामतिवेलमोहपटलाष्टम्भसीददद्दृशां
सम्यक्तत्त्वनिरीक्षणाय तनुते सत्तर्कसिद्धांजनम् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सदसद्भूमिकाभेदैस्तत्तत्सिद्धान्तनाटकैः ।
उपप्लुतस्य तत्त्वस्य शुध्यर्थोऽयमुपक्रमः ।।
यन्यायपरिशुध्यन्ते संग्रहेण प्रदर्शितम् ।
पुनस्तद्विस्तरेणात्र प्रमेयमभिदध्महे ।।

अशेषचिदचित्प्रकारं ब्रह्मैकमेव तत्त्वम् । तत्र प्रकारप्रकारिणोः प्रकाराणां च मिथोऽत्यन्तभेदेऽपि विशिष्टैक्यादिविलक्षणैकत्वव्यपदेशः तदितरनिषेधश्च ।

End:

तच्चेदं सामान्यमापाततः क्वचित् प्रत्यक्षीक्रियते, यथा घटत्वादि । क्वचित् सहकारिविशेषापेक्षया, यथा विलीनघृतादौ गन्धग्रहणापेक्षया घृतत्वादि । मातृपितृसम्बन्धस्मृत्याद्यपेक्षया ब्राह्मणत्वादि । तदुक्तं भगवद्यामुनमुनिभिरागमप्रामाण्ये-

ततश्च सन्ततिस्मृत्याऽनुगृहीतेन चक्षुषा ।
विज्ञानमयं ब्रह्मण्यं प्रत्यक्षत्वं न मुंचति ।।
तथा च दृश्यते नानासहकारिव्यपेक्षया ।
चक्षुषो जातिविज्ञानजनकत्वं यथोदितम् ।।

colophon:

इति कवितार्किकसिहंस्य सर्वतन्त्रस्वतन्त्रश्रीमद्वेंकटनाथस्य वेदान्ताचार्यस्य कृतिषु न्यायसिद्धांजने अद्रव्यपरिच्छेदः षष्ठः सम्पूर्णः ।।

48 - न्यायसिद्धांजनटीका

Beginning:

अतसीगुच्छसच्छायमंचितोरस्थलं श्रिया ।
अंजनाचलशृंगारमंजलिर्मम गाहताम् ।।
श्रीमत्तातार्यपादाब्जे हृदये भावये शुभे ।
आत्मानं लभते जन्तुर्ययोस्त्वात्म समर्पणात् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

मम शारीरकस्यान्तविज्ञानं यत्कृपाफलम् ।
तं तातयार्यप्रवणं वात्स्यानन्तगुरुं भजे ।।
श्रीरामानुजभाष्याध्वा येन निष्कण्टकीकृतः ।
जयन्तु कृतयस्तस्य निगमान्तगुरोः शुभाः ।।

चिकीर्षितस्य ग्रन्थस्याविघ्नपरिसमाप्त्यर्थं शिष्टाचारप्राप्तं गुरुपरम्परास्मरणरूपं मंगलमाचरन् प्रेक्षावत् प्रवृत्त्यर्थं विषयप्रयोजनाधिकारि णश्च निर्दिशन् सिद्धांजन-नामकरणे प्रवृत्तिनिमित्तरूपं तत्साद्दश्यं च व्यंजयन् वेदान्ततात्पर्यपरिज्ञानकुशल-संप्रदायाभिज्ञकर्तृकत्वेन ग्रन्थान्तरवैलक्षण्यं च दर्शयति- श्रीमद्वेंकटनायक इति ।।

End:

ज्ञानयोगेति । ज्ञानयोगो नाम कर्मयोगविजितान्तःकरणस्य निरन्तरप्रकृत्यादि-विलक्षणपरशेषतैकरसस्वात्मानुभवचिन्तनम् । कर्मयोगो नाम फलसंगादिरहित-नित्यनैमित्तिकादियुक्तदेवतार्चनतपस्तीर्थयात्रादिः । उपासनशेषतयेति । उपासन-निवृत्त्यर्थत्वेन परिगृहीतत्वादित्यर्थः । पश्वादीनामिति । अत्र प्रयोगोपकरणभूतानां पश्वादीनां तदानीमेव नष्टानां न तुल्यकालगमनं संभवति । नाप्येकस्वर्गभाक्त्वम् । बहुवित्तव्ययायासससाध्ययागानुष्ठातृयजमानेन यागौपयिक-- ---- ।

P. colophon:

इति न्यायसिद्धांजनटीकायां त्रिगुणद्रव्यपरिच्छेदः प्रथमः ।।

212 E - न्यासतिलकम्

Beginning:

श्रीमते वेदान्तगुरवे नमः
श्रीमान्वेंकटनाथार्यः + सन्निधत्तां सदा हृदि ।।
गुरुभ्यस्तद्गुरुभ्यश्च नमोवाकमधीमहे ।
वृणीमहे च तत्राद्यौ दम्पती जगतां पती ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्रायः प्रपदने पुंसां पौनः पुन्यं निवारयन् ।
हस्तः श्रीरंगभर्तुर्मामव्यादभयमुद्रितः ।।
अनादेर्निःसीम्नो दुरितजलधेर्यन्निरुपमं
विदुः प्रायश्चित्तं यदुरघुधुरीणाशयविदः ।
तदारम्भे तस्या गिरमवदधानेन मनसा
प्रपद्ये तामेकां श्रियमखिलनाथस्य महिषीम् ।।
महेन्द्राग्नाविष्णुप्रभृतिषु महत्त्वप्रभृतिवत्
प्रपत्तव्ये तत्त्वे परिणमितवैशिष्ट्यविभवाम् ।
अधृष्यत्वं धृत्वा कमितुरभिगम्यत्वजननीं
श्रियं शीतापांगामहमशरणो यामि शरणम् ।।

End:

विधानं रंगेशादधिगतवतो वेंकटकवेः
स्फुरद्वर्णं वक्त्रे परिकलयतां न्यासतिलकम् ।
इहामुत्राप्येष प्रणतजनचिन्तामणिगिरिः
स्वपर्यंके सेवां दिशति फणिपर्यंकरसिकः ।।

Colophon:

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेंकटनाथस्य कृतिषु न्यासतिलकं समाप्तम् ।।

212 G - न्यासतिलकव्याख्या

Beginning:

श्रीमल्लक्ष्मणयोगीन्द्रसिद्धान्तविजयध्वजम् ।
विश्वामित्रकुलोद्भूतं वरदाचार्यमहं भजे ।।
श्रीमत्त्रैयन्तसिद्धान्तदेशिकेन्द्रेण वर्णितम् ।
------ तिलकं वरेण्यं न्यासशालिनम् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विश्वामित्रकुलोद्भूतवरदाचार्येण वर्ण्यते ।

आचार्यरचितन्यासतिलकस्यार्थवर्णनम् ।

अत्र खलु आचार्यतातपादनिर्मितस्य न्यासतिलकस्य तात्पर्य --- मात्रेण श्रोतृजनसम्प्रीतये, प्रकाशयामि । स च आचार्यवंशो ज्ञेयः । आचार्याणां ---- इति श्रुतिसिद्धगुरुपरम्परानुसन्धानस्य स्वानुष्ठानमुखेन कर्तव्यतामुपदिशति । गुरुभ्य इति अयमत्र श्रुत्यर्थः । अध्यात्मोपदेशपारम्पर्यमेवात्राचार्यवंशः । विद्याजन्मानुसारेण गुरुपारम्पर्यविधानात् । न केवलं जन्म । अत एव ----

End:

ततः पूर्वम् असत्कल्पत्वात् तदात्वे च विश्लिष्टाश्लिष्टपूर्वोत्तरदुरितभरम् 'उत्तरपूर्वाघयोरश्लेषविनाशौ' इति न्यायेन न विद्या प्रारम्भदशायामेव बुद्धिपूर्वन्त-नानां नाशः । अबुद्धिपूर्वानामश्लेषः । यापितः, प्रापितः निरुपाधिकदयया उद्भूतं प्रादुर्भूतं यो यो ज्ञानं आदिशब्देनानन्दसंग्रहः ज्ञानानन्दादिस्वरूपं यस्य त्वत्भोगैकस्वभोगं तव भोग एव मुख्यः । मम भोगभोगोपसर्जनीभूतः तादृशं दयितं तव प्रयोजनायैवानुचरं सर्वलोकेष्वनुसरणशीलम् ।

918 E - न्यासतिलकव्याख्या

Beginning:

श्रीमान्वेंकटनाथार्यःकवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ।।
सद्भिरभ्यर्थ्यमानो यो वेदान्ताचार्यशेखरः ।
न्यासस्य तिलकं चक्रे तद्व्याख्यास्यामि संग्रहात् ।।

श्रीमान्वेदान्ताचार्यस्सद्भिरभ्यर्थ्यमानः अकिंचनजनानुग्रहजिघृक्षया प्रपत्ति-शास्त्रेषु प्रकीर्णं प्रतिपादितार्थप्रपत्त्युपयुक्तानर्थविशेषान् सुखग्रहणायै तत्र संजिघृक्षुः प्रथमं न्यासविंशतौ प्रपत्तिशास्त्रार्थान् प्रायशः संगृह्य तत्रोक्तानुक्तां चार्थविशेषान्

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

न्यासतिलके स्तोत्रे प्रचिकाशयिषुर्भगवन्तं श्रीरंगराजं संबोध्य, तस्मै विज्ञापयन् आदितो गुरुपरम्परानुसन्धानपूर्वकमुपक्रम्य, क्रमेण प्रपदनकृत् कर्तव्यत्वं तदारम्भे श्रीप्रपत्तेरवश्यं कर्तव्यत्वं श्रियः पुरुषकारत्वम् उपायान्तर्भावं च--------- ।

End:

अयं रंगशायी देशिकादेशिकांक्षी सदाचार्यस्यादेशः प्रपत्युपदेशः तं स्वकृतं शीलवान् । अन्यथा सर्वमुक्तिवैषम्यादेः प्रसंगात् निजमपि पदं ब्रह्मरुद्रादिपुलहमपि स्थानं आचार्योपदेशरूपस्य व्याजस्य सिद्धिं ------- एतद्देहावसाने अवश्यं दास्यति । वर्तमानसामीप्ये वर्तमानप्रयोगः । एवमैहिकादिषु त्रिष्वपि फलेषु अन्यथा सिद्धेषु सत्सुतैः तव परं एतेभ्यः --- वरं किमपि नास्तीत्यर्थः । यत्पुनरुद्दिश्य त्वं विद्यसेवेवं प्राप्नोषि तन्नास्ति पुनरपि वाक्यालंकारे । अथ भगवता स्वेने ---- भवद्भिः व्यर्थं दुष्प्रपत्तिर्न कार्येत्याह । मातरिति ।।

918 A - न्यासदशकम्

Beginning:

श्रीमान् वेंकटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ।।
अहं मद्रक्षणभरो मद्रक्षणफलं तथा ।
न मम श्रीपतेरेवेत्यात्मानं निक्षिपेद्बुधः ।।
न्यस्याम्यकिंचनः श्रीमन्ननुकूलोऽन्यवर्जितः ।
विश्वासप्रार्थनापूर्वमात्मरक्षाभरं त्वयि ।।
स्वामी स्वशेषं स्ववशं स्वभरत्वेन निर्भरम् ।
स्वदत्तस्वधिया स्वार्थं स्वस्मिन्न्यस्यति मां स्वयम् ।।
श्रीमन्नभीष्टवरद त्वामस्मि शरणं गतः ।
एतद्देहावसाने मां त्वत्पादं प्रापय स्वयम् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

End:

श्रीमान्नियतपंचांगं मद्रक्षणभरार्पणम् ।
अचीकरत्स्वयं स्वस्मिन्नतोऽहमिह निर्भरः ।।
संसारावर्तवेगप्रशमनशुभकृद्देशिकप्रेक्षितोऽहं
सन्त्यक्तोऽन्यैरुपायैरनुचितचरितेष्वद्य शान्ताभिसन्धिः ।
निश्शंकस्तत्त्वदृष्टया निरवधिकदयं प्राप्य संरक्षकं त्वां
न्यस्य त्वत्पादपद्मे वरद निजभरं निर्भरो निर्भयोऽस्मि ।।

644 A - न्यासदशकव्याख्या

Beginning:

वेदान्ताचार्यगुरुर्यदिदं न्यासदशकमाचष्टे ।
व्याख्याति तत्समासात् श्रीभाष्यश्रीनिवास इह सूरिः ।।

इह खलु सात्त्विक------श्रीमद्वेदान्त इति प्रख्यातः श्रीवेंकटनाथार्यः न्यासविद्यास्वरूपं स्वभावं च प्रपत्तिशास्त्रे प्रपंचितं विरलबुद्धीनामपि संग्रहण---- दशभिरनुष्टुब्भिः पद्यैः संजगृहुः । तन्यासदशकाख्यं यथोपदेशं यथामति संग्रहतो व्याख्यास्यति ।

श्रीभाष्यश्रीनिवासगुरुः कौशिकान्वयसम्भवः ।

तत्रादौ त्रिभिः पद्यैः द्वयस्य पूर्वखण्डोक्तभरन्यासो विविच्यते चतुर्थेन पद्येन उत्तरखण्डोक्तफलप्रार्थना क्रियते । ततः परं पंचभिरुत्तरकृत्यं तु प्रार्थनं व्याजेन विविच्यते । अन्ते स्वस्य नैर्भयोक्त्या निगद्यते ।

End:

अन्ते यतस्सागमभरसमर्पणं स्वयमेव कारितवानसि । उत्तरत्र यथा कथंचित् क्रोडीकरणं च तव स्वभावः । अतोऽहं निर्भरोस्मीति निगमयति - श्रीमानिति । भो श्रियःपते ! स्वयमेव मत्प्रार्थनां विनैवादौ मदुज्जीवन--- आचार्यसमाश्रयणद्वारा

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

स्वस्मिन् परमशेषिणि प्राप्ते सर्वज्ञे सर्वशक्तौ त्वयि नियतानि नियमेन स्वीकर्तव्यानि पंचांगादि आनुकूल्यसंकल्पादीनि यस्य मद्रक्षणभरार्पणं मम रक्षणे स्वप्राप्तिरूपे मदुज्जीवने यो भरः निर्वाहः तस्य समर्पणमचीकरः कारितवानसि । अतो त्वयि भरापनयनात् अहं च त्वयि न्यस्तभरः । तदर्थं कर्तव्यशेषरहितः । इह भरन्यास----अन्यस्मिन् काले निर्भरोऽपि गतभरोस्तीति सर्व समंजसम् ।।

Colophon:

श्रीन्यासदशकव्याख्या सेयं संक्षेपतः कृता ।
हृदया सुधीभिर्हृदये धार्या सर्वार्थसिद्धये ।।

12 – न्यासप्रकाशिका

Beginning:

वेदान्तार्यावतारं वरदगुरुवशं वत्सलत्वादिराशिं
निक्षेपं मूर्तिमन्तं कृपणजनफलं सर्वधा साधयन्तम् ।
वन्दे श्रीशैलवंशाम्बुधि----अनघं तातयार्य गुरुं तं
यद्दृष्ट्या लब्धसत्तस्समुचितमतिमानमप्यहं सर्वतन्त्रे ।।
श्रीमानंगिस्वरूपं वरदगुरुरुपादिष्टवान् मह्यमेतत्
--------येनयुक्तं त्विदमिति परकालाभिधो देशिको यः ।
मह्यं सारार्थदानादनवरतमुपदिदेशातिकारुण्यतस्तं
वेदान्तद्वन्द्वलीलाविवरणनिपुणं नौमि सर्वार्यमूर्तिम् ।।
निगमान्तगुरूक्तीनां निखिलार्थविदां वरम् ।
वरदं कृपणाळीनां वरदं गुरुमाश्रये ।।
नमो नमो नमो दीनबन्धवे भक्तिसिन्धवे ।
नमो वरद वेदान्तमुनये भवहानये ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वेदान्तदेशिकवरोक्तभरार्पणस्योपायार्थनस्य च भिधां परिबुद्ध्य सम्यक् ।
स्वप्ने वदत्स्वपदसेविजनस्य युक्तं वेदान्तलक्ष्मणमुनिं शरणं प्रपद्ये ।।

त्रय्यन्तार्यगुरुर्भूयात् मय्याविषदयाभरः ।
मत्प्रसादं विना न्यासप्रसादो नैव लभ्यते ।।
भक्तिप्रपत्त्युपायत्वं भाष्ये गद्यत्रये स्फुटम् ।
बभाषे भाष्यकृद्व्यक्तं भजे भवभयापहम् ।।
द्रमिडोपनिषद्भाष्यं यत्सूनुः प्रथमं व्याधात् ।
श्रीशैलपूर्णस्सोऽव्यान्मां भाष्यकृद्देशिकोत्तमः ।।
श्रीमन्महापूर्णमुखान् गुरून् शरणमाश्रये ।
यत्सम्बन्धा जगत्यस्मिन् अपवर्गो न चान्यथा ।।
वल्लभां देवदेवस्य वरदां सर्वमातरम् ।
प्रज्ञास्तन्यप्रदामस्मन्मातरं श्रियमाश्रये ।।
न्यासोपासनसंवेद्यं निखिलाभीष्टदायकम् ।
श्री श्रीशरूपमद्वन्द्वं द्वन्द्वं शरणमाश्रये ।।
वेदान्तदेशिकवचोमणयो हरन्ति
यत्सूक्तिशाणकषणप्रभवः प्रकाशाः ।
मोहान्धकारपटलीं निकटस्तितथानाम्
तत्तातयार्यचरणौ शरणं प्रपद्ये ।।
न्यासेनव्याहितक्षोभनिवारणपुरस्सरम् ।
न्यासप्रकाशविवृत्तिं करवाणि सतां मुदे ।।
क्व तातदेशिकगिरः क्वाहमत्यन्तमन्दधीः ।
तथाऽपि तत्कृपेवैमं नियुंक्ते व्याक्रियाकृतौ ।।

स्वाधीनत्रिविधचेतनाचेतनस्वरूपस्थितिप्रवृत्तिभेदः श्रीमन्नारायणः 'अनृतेन हि प्रत्यूढाः' 'तेषां सत्यानां सताम् अमृतमपिधानम्' 'अविद्या कर्मसंज्ञान्या तृतीया शक्तिरिष्यते' ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

End:

'मंगलान्तानि शास्त्राणि' इत्युक्तविधया ग्रन्थान्ते स्वाचार्यवरददेशिकाय मंगळाशासनतद्वन्दनतद्भजनरूपमंगळानि रचयति - त्वत्समीप इत्यादिना । त्वत्समीपे सदावर्त इति वेदान्तदेशिकैः । स्वप्ने यस्यावदत्तस्मै वरदार्याय मंगळम् ।।

स्वप्ने भगवदादिष्टयन्नामावर्तनादहम् ।
वस्तुतामुपयातस्तं वन्दे वरददेशिकम् ।।
अपरां वरदार्याख्यां निगमान्तार्यपादुकाम् ।
उदितां चैत्ररोहिण्यां मदसाधरणीं भजे ।।

अत्र ताद्रूप्यरूपकालंकारः ---

निगमान्तार्यावतारं निखिलार्थविदां वरम् ।
अपारकरुणासिन्धुमाश्रये तातदेशिकम् ।।
परकालगुरं वन्दे परवादिगजांकुशम् ।
यत्कटाक्षात्त्रयीशीर्ष युगळार्थविदस्म्यहम् ।।

Colophon:

श्रीमानित्थं श्रीनिवासपरकालयतेर्मुखात् ।
हयग्रीवो न्यासविद्या प्रकाशविवृतिं व्यधात् ।।

212 B - न्यासविंशतिः

Beginning:

श्रीमद्वेदान्तरामानुजसंयमिसार्वभौममहादेशिकाय नमः ।
सिद्धं सत्सम्प्रदाये स्थिरधियमनघं श्रोत्रियं ब्रह्मनिष्ठं
सत्त्वस्थं सत्यवाचं समयनियतया साधुवृत्त्या समेतम् ।
डम्भासूयादिमुक्तं जितविषयगणं दीर्घबन्धुं दयालुं
सखाशक्त्ये शासितारं स्वपरहितपरं देशिकं भूष्णुरीप्सेत् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अज्ञानध्वान्तरोधादघपरिहरणादात्मसाम्यावहत्वा-
ज्जन्मप्रध्वंसिजन्मप्रदगरिमतया दिव्यदृष्टिप्रभावात् ।
निष्प्रत्यूहानृशंस्यान्नियतरसतया नित्यशेषित्वयोगा-
दाचार्यः सद्भिरप्रत्युपकरणधिया देववत्स्यादुपास्यः ।।

End:

श्रुत्या स्मृत्यादिभिश्च स्वयमिह भगवद्वाक्यवर्गैश्च सिद्धां
स्वातन्त्र्ये पारतन्त्र्येऽप्यनितरगतिभिः सद्भिरास्थीयमानाम् ।
वेदान्ताचार्य इत्थं विविधगुरुजनग्रन्थसंवादवत्या
विंशत्या न्यासविद्यां व्यवृणुत सुधियां श्रेयसे वेंकटेशः ।।
संसारावर्तवेगप्रशमनशुद्दृग्देशिकप्रेक्षितोऽहं
संत्यक्तोऽन्यैरुपायैरनुचितचरितेष्वद्य शान्ताभिसन्धिः ।
निःशंकस्तत्त्वदृष्ट्या निरवधिकदयं प्राप्य संरक्षकं त्वां
न्यस्य त्वत्पादपद्मे वरद निजभरं निर्भरो निर्भयोऽस्मि ।।

Colophon:

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेंकटेशाय वेदान्तगुरवे नमः ।।

212 F – न्यासविंशतिव्याख्या -'बालबोधिनी'

Beginning:

श्रीमते वेदान्तगुरवे नमः ।
वेंकटेशगुरुशेखरोदितां न्यासविंशतिमुदारगुम्फनम् ।
व्याकरोति तदनुग्रहाय स्फुटं श्रीनिवास इह कौशिकान्वयः ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रीमद्वेदान्ताचार्यापरनामधेयाः वेंकटनाथार्याः सद्भिः अभ्यर्थ्यमानाः सकललोकोज्जीवनाय श्रुतिस्मृत्यादिशास्त्रनिरूढां न्यासविंशतिं प्रणीय तामत्र संग्रहेण व्याकुर्वन् । तद्व्याक्रियामनुसृत्य एतत्प्रसादतो नात्र संकोचविस्तरां व्याख्यां बालबोधिनीं अभिधास्ये । वेदान्ताचार्यवचसां सर्वंकषव्याख्यानाय स एव तत्कुमारो वरदाचार्यो वा प्रभवति । मादृशां तद्व्याख्याकथनं परेषां हास्यायैव भवति । अथापि तद्भक्तिप्रेरितोऽहं तत्र प्रवृत्तः, तत् क्षन्तव्यं दयालुभिः । तत्रादौ प्रपत्त्याद्यपरपर्यायां न्यासविद्यां संजिघृक्षुः मुमुक्षोः तत्त्वज्ञानादिमुखेन तदधिकारहेतुभूतमाचार्यसंग्रहणमाह - सिद्धमिति । आचार्यसंग्रहेण तद्गुणवत्त्वे 'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्' इत्यादीनि प्रमाणानि प्रष्टव्यानि भूष्णुः । भगवद्पादारविन्दसमाश्रयणेन संसारमपधूय नित्यकिंकरो भवितुं पुमान् देशिकमीप्सेत् ।

End:

अकुतोभयोऽस्मीति अत्र सर्वशक्तां परमकारुणिके सर्वाभिमतवरप्रदे श्रीसखे भगवति न्यस्तभरत्वान्निर्भरत्वनिर्भयत्वसिद्धिः । अयमत्र मुमुक्षोरधिकारसंग्रहः । सदाचार्योपसक्तिपूर्वकं सत्वोद्रेकं सम्यक्ज्ञानं सम्पाद्य इतरोपायान्तरनिष्पादनाद्यनुगुणज्ञानशक्तिविरहात् निर्विण्णाः स्वशक्यसत्कर्तव्यलघूपायपरामर्शेन प्रत्यवस्थापितः फलसंगकर्तृत्वत्यागयुक्तसांगभरन्यासेन कृतकृत्यः स्वीकृतभरं शरण्यं श्रियःपतिं अवलोक्य निर्भरो निर्भयश्च स्वयंप्रयोजनकैंकर्येण सुखं वर्तते इति ।

वेदान्ताचार्यगुरुभिस्संपृष्टा न्यासविंशतिः ।
श्रीभाष्य श्रीनिवासेन व्याख्यातैवं यथामति ।।
न सामर्थ्येन भक्त्यैव पूरितैव यथामति ।
मयेयं विहिता व्याख्या सम्यक्शोध्यानसूयुभिः ।।

Colophon:

इति श्रीनिवासाचार्यकृतिषु न्यासविंशतिव्याख्या सम्पूर्णा ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

417 B – न्यासविंशतिव्याख्या

Beginning:

आत्रेयरामानुजदेशिकेन्द्रपादारविन्दप्रवणात्मवृत्तिम् ।
समस्तकल्याणगुणाम्बुराशिं वेदान्तविद्यागुरुमाश्रयामः ।।

सकलश्रुतीतिहासपुराणेष्वन्तःसारतया प्रतिपाद्यमानां भगवत्परांकुशपरकालनाथयामुनयतिवरादिसकलदेशिकवरपरिगृहीतां प्रपत्तिविद्यां संग्रहीतुकामो भगवान् श्रीरंगराजदिव्याज्ञानलब्धवेदान्ताचार्यापरनामधेयः विंशत्यब्दे विश्रुतनानाविधविद्यः त्रिंशद्वारं श्रावितशारीरकभाष्यः कवितार्किकवरकण्ठीरवो भगवत्समाराधनोपयुक्तघण्ठावतार इति बुधजनोत्प्रेक्षणीयवैभवोऽष्टोत्तरशतप्रबन्धप्रकाशितपरावरतत्त्वयाथात्म्यः श्रीवेंकटदेशिकः प्रपन्नजनसार्थं कृतार्थयितुं प्रपत्त्यधिकारहेतुभूतसदाचार्यवरणमाह - सिद्धं सत्संप्रदायेति ।

End:

निरवधीत्यादिना नेतृत्ववरणमुक्तम् , न्यसेत् इत्यादिना आत्मनिक्षेपः उक्तः। अयमत्र मुमुक्षोरज्ञाननियम संग्रहः आचार्योपपत्तिपूर्वकं समन्त्रकं सम्यज्ज्ञानं सम्पाद्य गुरुतरोपायान्तरनिष्पादनानुगुणज्ञानशक्तिविरहान्निर्विण्णाः सकृत्कर्तव्यलघूपाय परामर्शेन प्रपत्या स्थापितः फलसंगकर्तृत्वादि-----न युक्तसांगभरन्यासेन कृतकृत्यः स्वपदनिक्षेपात्मभरं शरण्यं श्रियःपतिमवलोक्य निर्भरो निर्भयश्च स्वयंप्रयोजनकैंकर्येण सुखं वर्तेत ।।

Colophon:

इति श्रीकौशिककुलतिलकताताचार्यसूनुः श्रीनिवासार्यकृतिषु
न्यासविंशतिव्याख्या सम्पूर्णा ।।

Scribe:

युवनामसंवत्सर आश्वयुजशुद्धदशम्यां शुक्रवासरे गुरुकौण्डवीरराघवाचार्यपुत्राप्पलाचार्येण लिखिता न्यासविंशतिः सव्याख्या सम्पूर्णा ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

74 - न्यासविद्याप्रकाशविवृतिः-न्यासप्रकाशिका

Beginning:

न्यासेन व्याहितक्षोभनिवारणपुरस्सरम् ।
न्यासप्रकाशविवृतिं करवाणि सतां मुदे ।।

End:

परकालं गुरुं वन्दे परवादिगजांकुशम् ।
यत्कटाक्षत्रयीशीर्षयुगलार्थं विदस्पृहम् ।।

Colophon:

श्रीमानित्थं श्रीनिवासपरकालयतेर्मुखात् ।
हयग्रीवो न्यासविद्या प्रकाशविवृतिं व्यधात् ।।

393 – पंचकालक्रियादीपः

Beginning:

वन्दे जगद्गुरुं श्रीशं यस्य चाज्ञा श्रुतिस्मृती ।
यस्य लीला जगज्जन्मस्थितिसंहरणादयः ।।
प्रणमाम्यस्मदाचार्यान् तदगुरुन् भाष्यकृन्मुखान् ।
यैरकण्टकिता मार्गा दैविकाः पांचरात्रिकाः ।।
कुमारतातयाचार्यं सदाचारदं सदा ।
वेदान्ताचार्यसिद्धान्तविजयध्वजमाश्रये ।।
शतक्रतुचतुर्वेदिश्रीनिवासार्यदेशिकः ।
पंचकालक्रियादीपं कुरुते विदुषां मुदे ।।
तत्र नित्यस्य भगवत्समाराधनकर्मणः ।
यागध्यानादिरूपस्य प्रयोगो ह्यभिधीयते ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अथ परमैकान्ती ब्राह्ममुहूर्ताभिधेये रात्र्याः पश्चिमयामे विश्रमार्थं यामद्वयकृतां निद्रां परित्यज्य समाहितमनाः सत्वस्थः प्रसन्नधीः हरिर्हरिरिरिति सप्तकृत्व उच्चार्य हरिमेव चिन्तयन्नुत्थाय पादौ प्रक्षाल्याचम्य तस्मिन्नेव शयने समासीनो हरिरोमिति निर्दिश्य सत्वस्थः प्रसन्नधीः पूर्वयामानुसंहितमन्त्रेण प्रतिसंहितयोगः अन्तःकरणचित्रभित्तिगतं विचित्रशुभाश्रयं ध्येयं परिपूर्णं भगवन्तं नारायणं निद्रातमोऽन्तरितमपि सात्विकध्यानरूपप्रदीपप्रकाशेन सम्यगवलोक्य तत्तत्कालोचितं भगवन्मन्त्रजपं वेदाभ्यासं च यथाबलमाचरेत् ।

End:

ऋतौ गर्भशंकायास्सम्भवात् ऋतुकालाभिगमिस्नानं कुर्यात् । अनृतौ मूत्रपुरीष-शौचसहपठितशौचमात्रं कृत्वाऽऽचामेत् । ततोयावन्निद्रा समभ्येति तावन्मनसा नारायणमनुस्मरेत् । निद्रान्तरेपि प्रबुद्धस्सन् भगवद्गुणानुवर्णनं कुर्यात् ।।

Colophon:

इति श्रीमद्रामानुजसिद्धान्तस्थापनाचार्यशतक्रतुचतुर्वेदि श्रीनिवासाचार्य विरचिते पंचकालक्रियादीपे योगनिरूपणाख्यः पंचमः परिच्छेदः ।।

अनेक स्मृतिविज्ञेय कृत्याऽकृत्य प्रकाशकम् ।
पंचकालक्रियादीपमज्ञानध्वान्तरोधकम् ।।
शतक्रतुचतुर्वेदि श्रीनिवासार्यनिर्मितम् ।
सन्तस्समीक्ष्यसन्तोषं प्राप्नुवन्तु विमत्सराः ।।
इति पंचकालक्रियादीपः सम्पूर्णः ।।

2406 – परतत्वविवेकः

Beginning:

नारायण शिव-----रूपमुपाद्य----धातयोज्जगत् पितृत्वेन च मात्र---हिरण्यगर्भ जनकत्व उपपत्तेश्च । किंच 'यस्मात् परन्नापरमस्ति किंचित् यस्मान्नाणीयो न

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

ज्यायोस्तिकश्चित् । वृक्ष इवस्तब्धोदिवितिष्टत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्' इत्यनेन प्रथममन्त्रार्थप्रत्यभिज्ञानात् ईशशब्दार्थस्यैव --- शिवस्य सर्वस्मात् परत्वमुपपाद्य पुरुषशब्दार्थस्य तस्यैवं जगद्व्याप्तिरभिधीयते । न च पुरुषशब्दः नारायणवाचक इति अस्यापि अनुवाकस्य तत्परत्वमिति युक्तम् । उपक्रमते --- रुद्राभिधानश्रुतिद्वयानुसारेण तस्य नेयत्वात् । पुरुषशब्दे नारायणसाधारणा ------निरसिष्यमाणत्वाच्च । 'दहं विपाप्मम्' इत्यादिना तस्मिन्यदन्तस्तदन्वेष्टितव्यमित्यनेन विधीयमान दहरोपासनमपि प्रकृतशिवविषयमेव । अन्यथा प्रकृतभाना---प्रसज्येताम् । किंच

'यद्वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य यः परः सः महेश्वरः।।'

इति प्रकृतदहरविद्योपास्यः शिव एव--------- उपात्तम् ------------

End:

रुद्र ब्रह्माद्यन्त --- नारायण एव --- यतेयोयं रुद्रस्सभगवान् विष्णुस्तस्मै --- नाहंविष्णुरित्यादिवद्विभत्सिमत्भाव ---- किंच 'यो वै नृसिंहो देवो भगवान्यश्च तस्मै --- नमो नम इत्यादि --- आद्रृताथर्वशिरो वाक्यानां रुद्रान्तर्यामिभगवत्परत्वं युक्तम् नवा वैपरीत्यं शंक्यं शिवस्य नारायणो---- शिवान्तर्यामित्वे प्रमाण---- ।।

Colophon:

परतत्त्वविवेकसिद्धान्ते पुरुषसूक्तस्य नारायणपरत्वसमर्थनाधिकारः एकादशः ।।

212 A – पादुकासहस्रम्

Beginning:

सन्तः श्रीरंगपृथ्वीशचरणत्राणशेखराः ।
जयन्ति भुवनत्राणपदपंकजरेणवः ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

भरताय परं नमोऽस्तु तस्मै प्रथमोदाहरणाय भक्तिभाजाम् ।
यदुपज्ञमशेषतः पृथिव्यां प्रथितो राघवपादुकाप्रभावः ।।

End:

यदि स्फीता भक्तिः प्रणयमुखवाणीपरिपणं
पदत्राणस्तोत्रं हृदि बिभृथ रंगक्षितिभृतः ।
निरुन्मादो यद्वा निरवधिसुधानिर्झरमुचो
वचोभंगीरेता न कथमनुरुन्धे सहृदयः ।।
जयति यतिराजसूक्तिर्जयति मुकुन्दस्य पादुकायुगली ।
तदुभयधनास्त्रिवेदीमवन्ध्ययन्तो जयन्ति भुवि सन्तः ।।

Colophon:

पादुकासहस्रं सम्पूर्णम् ।।

53 - पादुकासहस्रपरीक्षा - चित्रपद्धतिः

Beginning:

प्रतिष्ठां सर्वचित्राणां प्रपद्ये मणिपादुकाम् ।
विचित्रजगदाधारो विष्णुर्यत्र प्रतिष्ठितः ।।
श्रृणु ते पादुके चित्रं चित्राभिर्मणिभिर्विभोः ।
युगक्रमभुवो वर्णान् युगपद्वहसे स्वयम् ।।
सुरासुरार्चिता धन्या तुंगमंगलपालिका ।
चराचराश्रिता मान्या रंगपुंगवपादुका ।।
पदमेव मंगलसरित्पारं संसारसन्ततेः ।
दुरितक्षेपिका भूयात् पादुका रंगभूपतेः ।।
अनन्यशरणः सीदन् अनन्तक्लेशसागरे ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शरणं चरणत्राणं रंगनाथस्य संश्रये ।।
प्रतिभायाः परं तत्त्वं बिभ्रती पद्मलोचनम् ।
पश्चिमायामवस्थायां पादुके मुह्यतो मम ।।
यामः श्रयति यां धत्ते यैर्नयात्याय याच्च या ।
यास्यमानाय यै वान्या सा मामवतु पादुका ।।

End:

इमाविति साक्षात्कारानर्हौ चरणौ चत्वरेषु श्रीरंगनगराजिरेषु सतां सत्तामात्रवतां सर्वेषां इत्यर्थः । दिशसि - साक्षात्करोषीत्यर्थः । संचरसमय इति भावः ।

Colophon:

इति श्रीमदात्रेयगोत्रभूषायमाणाशेषाचलाचार्यपौत्रेण श्रीरामानुजगुरुवरसूनुना श्रीवेंकटनिवासदासेन विरचितायां श्रीरंगनाथपादुकासहस्रव्याख्यायां चित्रपद्धतिः ।।

655 - पादुकासहस्रपरीक्षा - नादपद्धतिः

Beginning:

अथास्यां पद्धत्यां गर्भाश्मनादान् आलम्ब्य पादुकां स्तौति । श्रुतीनामिति । हे रंगेन्द्रस्य पादुके; तव शिंजितं भूषणीभवदन्तर्मणिरवम् । 'भूषणानां तु शिंजितम्' इति शब्दप्रकरणे अमरः ।

End:

---- 'संसारतन्त्रवाहित्वात् रक्षापेक्षां प्रतीक्षते' इत्युक्तं क्षिपति निवर्तयति। नूनमित्युत्प्रेक्षा । अज्ञानेन स्वरक्षणप्रार्थनारहितान् जन्तून् रक्षेति भगवन्तं पादुकानादैः प्रेरयतीवेति भावः ।।

Colophon:

इति नादपद्धतिव्याख्या संपूर्णा ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

2220 - पाराशर्यविजयः

Beginning:

पाराशर्यो दयालुर्जयति बहुविधान् वेदमार्गप्रतीपान्
सम्यक्तर्काख्यशस्त्रैः प्रतिभटजनतागर्वसर्वंकषैस्तैः ।
ब्रह्मण्यैश्वर्यभूती गुणगणविततिं हर्तुकामान् कुतर्कैः
तैस्तैर्दुर्लंघ्यमाया वितति विरचितैर्न्यायमार्गप्रहीणैः ।।
वेदापहारिणं दैत्यं मीनरुपी निराकरोत् ।
तदर्थहारिणस्सर्वान् व्यासरूपी महेश्वरः ।।
पाराशर्यजयोस्माभिः ख्याप्यतेऽद्य सतां मुदे ।
वाधूलश्रीनिवासार्यगुरुणामनुकम्पया ।।

श्रियःपतिः अवाप्तसमस्तकामस्समस्तकल्याणगुणगणभूषितो भगवान् आत्मतनूजाय ब्रह्मणे वितीर्णं ब्रह्मशेवधिं वेदबृन्दं दैत्येनापहृतं मीनरुपेणावतीर्यदैत्यन्तं संहृत्य पुनर्ब्रह्मणे प्रदाय तदर्थं कुदृष्टिभिः अपहृतं पुनः व्यासरूपेणावतीर्य कुदृशो निर्जित्य विबुधेभ्यः प्रददौ ।

End:

एतेन सर्वे व्याख्याता । एतेन पादचतुष्टयोऽक्त न्यायकलापेन सर्ववेदान्तेषु जगत्कारणप्रतिपादनपराः सर्वे वाक्यविशेषाः चेतनाचेतनविलक्षण सर्वज्ञसर्वशक्तिब्रह्मप्रतिपादनपरतया व्याख्याताः । व्याख्याता इति पदाभ्यासः अध्यायपरिसमाप्तः ।

Colophon:

इति श्रीवाधूलकुलतिलक श्रीनिवासाचार्यपादसेवासमधिगत परावरतत्त्व याथात्म्येन तदेकदैवतेन तच्छरणपरिचरणपरायणेन तत्प्रसादलब्ध महाचार्यापरनामधेयेन रामानुजदासेन विरचिते पाराशर्यविजये प्रथमाध्यायस्य चतुर्थःपादः ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

640 A - पुरुषसूक्तार्थदर्पणः

Beginning:

वाधूलसौम्यजामातृ देशिकेन्द्र पदाश्रयम् ।
वेंकटेशगुरुं वन्दे वेदान्तद्वयदेशिकम् ।।
अश्वमेधे महायज्ञे स्वयम्भूविहिते पुरा ।
प्रादुर्भूताय दिव्याय पुरुषाय नमो नमः ।।
यदस्ति पौरुषं सूक्तं यजुष्यष्टादशर्चकम् ।
इतिहासपुराणाभ्यां तस्य तात्पर्यमुच्यते ।।
ऋग्भिष्षोडशभिर्धात्रा प्रोक्तं वरदवैभवम् ।
विदुषः फलमन्त्याभ्यां द्वभ्यां ऋग्भ्यां इहोच्यते ।।

तत्रादौ वरदस्य जगन्मयत्वं सर्वसुलभत्वंचाह - सहस्रेति । सहस्रं शिरांसि यस्य स तथोक्तः, 'शीर्षन्छदसि' इति शिरश्शब्दस्य शीर्षन्नादेशः । एवं सहस्राक्षस्सहस्रपात् । अत्र सहस्रशब्दः आनन्त्यवाची ।

End:

अत एव वेदान्ताचार्यैः एवमुक्तः ---

निरन्तरन्निर्विशतस्सदीय अस्पृष्टचिन्ता मदमाभिरुह्यम् ।
सत्यं शपे वारणशैलनाथ वैकुण्ठवासेऽपि न मेऽभिलाषः।। इति ।

हेत्वाश्चर्ये - इयत्तानवच्छिन्न श्रीहस्तिगिरिमहिमा इति भावः । एतत्सर्वं महद्भिरवगतमिति सर्वं समंजसम् ।

श्रीमद्वाधूलवरदवल्लभाचार्य निर्मितम् । श्रीमद्पुरुषसूक्तार्थदर्पणं वेत्ति यस्स सन् ।।

Colophon:

इति श्रीमद्वाधूलकुलतिलकश्रीदेवराजार्यतनयस्य श्रीमद्वरदवल्लभाचार्यस्य कृतिषु श्रीमत्पुरुषसूक्तार्थदर्पणस्सम्पूर्णः ।।

श्रीमते देवराजाय पुण्यकोटिनिवासिने । ब्रह्मप्रतिष्ठितायास्तु श्रीभूमितपये नमः ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

640 B - पुरुषसूक्तसारार्थदीपः

Beginning:

इतिहासपुराणाभ्यां तस्य तात्पर्यमुच्यते ।।

तत्रादौ श्रीदेवराजस्य दिव्यमंगलविग्रहनिर्माणं प्रतिपाद्यते । अद्भ्य इति । अद्भ्यः अपस्स्रष्टुं 'अप एव ससर्जादौ' इति मनुवचनात् ---- पृथिवीमुद्धर्तुं 'उद्धृतासि वराहेण' इति श्रुतेः । यथोक्तं ब्राह्मे -

पुरा वराहरुपेण धरणी यन्मयोद्धृता ।
खुरैर्निहत्य दैतेयान् पातालतलवासिनः ।।
तदा मां द्रष्टुकामोयं अनन्तोलोकधारकः ।
अत्रैव वसुधां भित्वा समुत्थस्थौ रसातलात् ।।

End:

अहोरात्रे अहश्च रात्रिश्च अहोरात्रे तव पार्श्वे पार्श्वभूतधनं मनिषाण-अंगीकुरु । तदर्थममुं विग्रहं मनिषाण - सर्वं नमस्कारादिकं च मनिषाण इत्येवमब्रुवन् इति पूर्वेण अन्वयः । एतत्सर्वं सम्प्रदायादवगतमिति सर्वं समंजसम् ।

Colophon:

श्रीमद्वाधूल वरदवल्लभाचार्य निर्मितम् । सारार्थदीपस्तत्त्वज्ञैः --- समाप्यताम् ।। इति श्रीवाधूलकुलतिलकश्रीदेवराजार्यतनयस्य श्रीवरदवल्लभाचार्यस्य कृतिषु सारार्थदीपः सम्पूर्णः ।।

8 B - प्रणवदर्पणम् (नयमणिकलिका)

Beginning:

मदनकदनवेल्लदल्लवीजाललोल-
त्कुचतटघटनोद्यत्कुंकुमालंकृतांगः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

निगमनिकरचूडाक्रीडलीलानुकूलः
कलयतु शुभकामी कोऽपि कामी मुदं नः ।।
यद्यपि चेदं प्रकरणमुपयुक्तं चन्द्रिकानिराकरणे ।
तदपि प्रथमे सूत्रे प्रणववदाप्नोति किं न पार्थक्यम् ।।

इह कतिचिदतिसाहसिनः प्रथमम् 'अथातो ब्रह्मजिज्ञासा' इति ब्रह्ममीमांसोपक्रमसूत्रे सकलैः पाठ्यमानमोंकारं तदवयवमभिदधति । तदेतत्प्रमाणपथानुवर्तिनो नानुमन्यन्ते । तथा हि - 'तस्य तदवयवत्वेन तावत्प्रत्यक्षं प्रमाणम्, असंभवात् । शब्दस्वरुपमात्रग्राहिणः श्रोत्रस्य साधुत्वासाधुत्वयोरिव अवयवत्वानवयवत्वयोरुदासीनत्वात् उपनीतप्रत्यक्षस्य च उपनीयप्रामाण्याधीनप्रामाण्यकत्वेन स्वतो निर्णायकत्वादनुमित्यादेर्वक्ष्यमाणरीत्या संभवेन तदुपनीयासंभवाच्च ।

End:

तस्मात्प्रमाणाभावात् न सूत्राणां प्रत्येकं प्रणवगर्भत्वमिति प्राहुः । तस्मात् अप्रामाणिकमिदं ध्वान्तमतानुवर्तिनां अवयत्वकथनं इति सर्वं समंजसम् ।

Colophon:

श्रीमच्छ्रीशैलवंशाम्बुधिशशिकमलवासतातार्यपुत्रः
पौत्रश्चित्रापदानप्रगुणगुणनिधेरण्णयाचार्यनाम्नः ।
स्वाचार्याचार्यसेवासमधिगतहितोदन्तवेदान्ततत्त्वो
च्यातानीच्छ्रीनिवासो नयमणिकलिकां ध्वान्तदौर्गत्यहन्त्रीम् ।।

220 A - प्रणवाधिकारविषयम्

Beginning:

श्रीमदष्टाक्षरोमन्त्रः कठवल्लीष्वाथर्वणवेदोपनिषदि , छान्दीय --- श्रूयते । अयं त्रैवर्णिकाधिकारः । प्रणवादिवर्जेन स्त्रीशूद्राधिकारत्वमुक्तम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

नस्वरः प्रणवोंगानि नार्च्यन्त्यविधयस्तथा ।
स्त्रीणां च शूद्रजातीनां मन्त्रमात्रोक्तिरिष्यते ।।

इत्यादि वचनैः । भगवच्छास्त्रे च ---

वैदिकं तान्त्रिकंचैव तथावैदिक तान्त्रिकम् ।
त्रिविधं कर्मसंप्रोक्तं पंचरात्रामृतार्णवे ।।
वैदिकं ब्राह्मणानां तु राज्ञां वैदिक तान्त्रिकम् ।
तान्त्रिकं वैश्यशूद्राणां सर्वेषां तान्त्रिकन्तुवा ।।
अष्टाक्षरश्च यो मन्त्रो द्वादशाक्षर एव च ।
षडक्षरश्च यो मन्त्रो विष्णोरमिततेजसः ।।
एते मन्त्राः प्रधानास्तु वैदिकाः प्रणवैर्युताः ।
प्रणवेन विहीनास्तु तान्त्रिका एव कीर्तिताः ।।

इति तान्त्रिकशब्देन तान्त्रिकत्वफलं स्त्रीशूद्राद्यधिकारमुक्तं भवति - कैशिकाध्यायेऽपि द्वादशीमाहात्म्ये 'नमो नारायणेत्युक्त्वा श्वपाकः पुनरागमत्' इति प्रणवादि-वर्जितस्यापि प्रणवसहित तुल्यफलप्रदत्वम् उक्तम् ।

End:

आर्तदृप्तविभागः श्रीरामायणे उक्तः --

आर्तो वा यदि वा दृप्तः परेषां शरणागतः ।
अहिः प्राणानुपक्रम्य रक्षितव्यः ततात्मना ।।

इति । अतो 'मा शुचः' इत्यनेन प्रपन्नस्य प्रारब्धकर्माभावात् सिद्धः त्यागश्चोन्मृदित विधेयश्चेत्याज्यः स्वीकर्तुः एव त्यागो विधेयस्स्यात् । न हि स्वयमेव त्यक्तवतः सत्यागोविधेयः । त्यागाधिकारश्च उपायान्तरस्वीकारश्च तत्त्छक्त्यैव अतः त्यागस्य विधीयमानस्त्वे भक्तियोगाद्यधिकारिणस्तु निषेधः, अतस्स्यात् ततश्च उपासन-शास्त्रवैय्यर्थ्यं च स्यात् । शक्तं प्रति प्रतिषिद्धत्वात् अतो यथोक्त एवार्थः ।

Colophon:

कूरान्वयतिलकस्य श्रीवेदव्यासभट्टार्यस्य कृतिरियं समाप्तिरगमत् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

2202 G - प्रतिज्ञावादः

Beginning:

आराध्य वारिधिसुतादयितांघ्रियुग्ममानस्य लक्ष्मणयतीश्वरमादरेण ।

तोषाय सर्वविदुषां कुतुकात्प्रतिज्ञावादंसयुक्तिकमनन्तसुधीर्विधत्ते ।।

इह खलु 'प्रतिज्ञाविरोधात्', 'प्रतिज्ञाऽहानिव्यतिरेकात्' इत्यादिषु सूत्रेषु प्रतिपादितायाः एकविज्ञानेनसर्वविज्ञनप्रतिज्ञाया विवेचनाय सद्विद्याघटकः कश्चिदंशो व्याख्यायते।

End:

किंच स्वान्यशून्यं ब्रह्मेत्युक्तौ कथं तद्भेदनिषेधः न च विशेषणेऽपि निषेधान्वयात्तल्लाभ इति वाच्यम् । विशेष्यबाधस्थल एव तथात्वात् सविशेषणे हीति न्यायस्य बाधघटितत्वात् । एवं विजातीयभेदनिषेधेनैव स्वगतभेदविषेधस्य स्वस्मिन् सिद्धतया वैयर्थ्याच्च । तस्मात् अद्वैतमतमसंगतमिति दिक् ।

Colophon:

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।

अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ।।

1019 B - प्रपन्नपारिजातः

Beginning:

श्रुतार्थमननस्थेम्ने मम, नेतरथा, श्रमः ।

सोढव्यमत्र स्खलितं सद्भिर्विनयगौरवात् ।।

प्रपत्तिस्तैत्तिरीयाणां वेदे तावत् विधीयते ।

न्यासाख्या सप्रयोगाऽसौ वसुरण्येति मन्त्रतः ।।

तत्रोपास्यं यथा ब्रह्म सर्वकारणमुच्यते ।

प्रपत्तव्यं तथैवेति विभुर्विश्वसृगित्यपि ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

End:

कार्पण्ययाचितबद्धमूलफलका विश्वासकीलाचिता
यांचांबन्धनरज्जुकृष्टिवशगा निक्षेपसत्क्षेपणीः ।
संसारार्णवतारिणी तनुभृतां न्यासात्मनोः तामिमाम्
अच्छिद्रामथ पारयिष्णुमभयाः सद्योऽधिरूढा जनाः ।।
अशेषापेक्षितं यत्र परितो जायते सताम् ।
प्रपन्नपारिजाताख्यः प्रबन्धः कथितो भुवि ।।

Colophon:

इति फलपद्धतिः ।

इति श्रीवत्सकुलतिलक वरदराजसूरिविरचित प्रपन्नपारिजातः सम्पूर्णः ।।

327 B – प्रपन्नविजयम्

Beginning:

प्रपन्नविजयः श्रीमान् प्रणतार्तिविभंजनः ।
जयतां जयतां लोके साधु ब्रह्मेरभिष्टुतः ।।
न निन्दन्ति महात्मानो विजयज्ञानयोगिनाः ।
यथा सुधां सुमनसो ब्रह्मेशा न पुरोगमाः ।।
प्रपन्नविजयं मूढाः विनिन्दन्त्यविपश्चिताः ।
सुकंचुकं विनिन्दन्ति शुष्कस्तनो यथासिद्धः ।।

पांचरात्रे भगवतैवोक्तम् -

अनेनैव तु मात्रेण सात्मानं यो न क्षिपेत् ।
मयि निक्षिपत कर्तव्यः कृतकृत्यो भविष्यति ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कपिंजलसंहितायां भगवतैवोक्तम् -

मयि विन्यस्तभारस्य प्रपन्नस्य महात्मनः ।
दर्शनं प्रतिकांक्षन्ति ब्रह्मरुद्रादि देवताः ।।
मयि विन्यस्तभारस्य मम पादाब्जसेविनः ।
अग्निष्टोमादि कर्माणि कलान्तावन्तिषोडशीम् ।।

कपिंजलसंहितायां भगवतैवोक्तम् ----

मयि विन्यस्तभारस्य सर्वलोकहितैषिणः ।
वास्यन्ति दर्शनन्देवा स्वात्मपापविशुद्धये ।।
विधिमुल्लंघ्य वर्तन्ते ऋषयो ब्रह्मवादिनः ।
विधिस्तु तेषां वचनं वेदास्तेषां वशानुगाः ।।

End:

ये नृशंसा दुरात्मानो पापाचाररतास्तथा ।
तेऽपि यान्ति परं स्थानं नारायणपरायणाः ।।
निर्वाणकालसंप्राप्ते काष्ठपाषाणसन्निभम् ।
अहं स्मरामि मद्भक्तं न यामि परां गतिम् ।।
परित्यक्ताहारौ भक्तिं कर्म यस्तु निषेवते ।
विहाय जाह्नवीं मूढः कूपं खनति दुर्मतिः ।।
जित्वा ज्ञानं हरौ भक्तिं कर्म यस्तु निषेवते ।
त्यक्त्वासौ यं यथावृक्षं सुप्तः पतति तत्क्षणात् ।।
विज्ञानममलं त्यक्त्वा कर्म यस्तु निषेवते ।
हित्वा शीतहृदं कोऽयं भजते समरीचिकाम् ।।
आच्चि श्रीरंगवर्येण विजयस्सर्वसम्मतः ।
बादरायकृते प्रश्ने प्रपन्नानां कृतः क्षणात् ।।

Colophon:

प्रपन्नविजयः समाप्तः ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

15 A - प्रमाणसंग्रहः

Beginning:

श्रीमान् वेंकटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ।।
परत्वं च सर्वस्मात् परत्वं ब्रह्मणः परम् ।
तेनान्यसमबुद्धिश्च दोषहेतुत्वमुच्यते ।।
विष्णोस्स्वरुपमाहात्म्यादज्ञेयत्वं ततः परम् ।
ब्रह्मादीनां च सृज्यत्वं तेषां तस्य सहायता ।।
तेषां च कर्मवश्यत्वं तेषामैश्वर्यकारणम् ।
विष्णोराराधनायत्तं तेषां आपन्निवारणम् ।।
तेषामप्यनुपास्यत्वं संशयच्छेदपूर्वकम् ।
ब्रह्मरुद्रादिसृष्ट्यादेः विष्ण्वधिष्ठितकारणम् ।।

End:

ओमित्येकाक्षरं पूर्वं द्व्यक्षरं नम इत्यथा ।
तथा नारायणायेति पंचवर्णान्यथाक्रमम् ।।
एवमष्टाक्षरो मन्त्रो ज्ञेयस्सर्वार्थसाधकः ।
सर्वं --------------- मन्त्रात्मकश्शुभः ।।
ऋचो यजूंषि सामानि योऽधीते सकृदंजसा ।
सकृदष्टाक्षरं जप्त्वा फलं तस्य समश्नुते ।।
नास्ति नक्षत्रसम्बन्धो न निमित्तपरीक्षणः ।
श्रद्धैव कारणं पुंसां अष्टाक्षरपरिग्रहे ।। इत्यादि ।

Colophon:

इति प्रमाणसंग्रहः सम्पूर्णम् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

406 – प्रमेयमाला

Beginning:

नमः श्रीविष्णुचित्तार्यपदपंकजपांसवे ।
रामानुजमुनीन्द्रोक्तिरहस्यज्ञानहेतवे ।।
जंगतामुपकाराय जातं यतिवरात्मना ।
प्रागुणीकृतसन्मार्गं भजामह पुरुषं परम् ।।
सच्चेतोमधुकरबृन्दसेवनीयां
सौरभ्यं श्रुतिशिरसः समादधानाम् ।
वत्सानां कुलपतिरद्भुतामतानीत्
अम्लानां वरदगुरुः प्रमेयमालाम् ।।

--------मीमांसाध्ययनस्य वैधत्वरागप्राप्तत्वविवेकार्थमध्ययनविधिर्निरूप्यते । किं अध्ययनविधिरर्थज्ञानपर्यवसायी, आहोस्वित् अक्षरराशिग्रहणमात्रपर्यवसायीति । अर्थज्ञानपर्यवसायीति- पूर्वःपक्षः । तथाहि - अध्ययनविधेरक्षरराशिग्रहणमात्र पर्यवसायित्वे मीमांसाश्रवणस्य प्रवर्तकाभावात् अनारम्भणीया मीमांसा स्यात् ।

End:

नरके रौरवे घोरे कर्मत्यागात् पतन्ति ते ।
तस्मात् तान्नालपेत् प्राज्ञो न निरीक्षेत वापि तान् ।।
आलोकनेन तेषां तु शुध्यते भानुदर्शनात् ।
नग्नं वानुपनीतं वा यः श्राद्धे भोजयेद्द्विजः ।।
रेतोमूत्रपुरीषाणि स पितृभ्यः प्रयच्छति ।। इति ।

अत उपवीतत्रिदण्डशिखादिकमवश्यं यतीनां धार्यमिति स्थितम् ।

Colophon:

इति श्रीमद्वत्सकुलतिलक श्रीमद्वरदार्यसूरिविरचितायां प्रमेयमालायां यतिलिंग-समर्थनम् । प्रमेयमाला समाप्ता ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

86 – बृहदारण्यकभाष्यम्

Beginning:

व्यासं लक्ष्मणयोगीन्द्रं प्रणम्यान्यान् गुरुनपि ।
बृहदारण्यकव्याख्यां करोमि विदुषां मुदे ।।

अष्टाध्यायात्मके बृहदारण्यके प्रवर्ग्योपसत्प्रतिपादक प्रथमद्वितीयाध्यायौ उपेक्ष्य उत्तरोऽध्यायगणो व्याख्यायते । यद्यपि 'उषावा अश्वस्य' इत्यादिकमपि अश्वमेधादिकर्मविषयकमेव । तथाऽपि ब्रह्मदृष्टिविधिरूपतया ब्रह्मात्मकत्व-प्रतिपादनपरतया यथाकथंचित् ब्रह्मसंबन्धित्वेन तद्व्याख्यानस्योचितत्वात् ।

End:

-------याज्ञवल्क्याद्याज्ञवल्क्य उद्दालकादुद्दालकोऽरुणादरुण उपवेशे-रुपवेशिः कुश्रेः कुश्रिर्वाजश्रवसो वाजश्रवा जिह्वावतो जिह्वावान् बाध्योगात् बाध्योगो असितादृार्षगणादसितो वार्षगणो हरितात्कश्यपाद्धरितः कश्यपः शिल्पात्कश्यपाच्छिल्पः कश्यपः कश्यपान्नैध्रुवेः कश्यपो नैध्रुविर्वाचो वागम्भिण्या अम्भिण्यादित्यात् ।

2202 A – ब्रह्मपदशक्तिवादः

Beginning:

इह तावद्ब्रह्मशब्दस्य प्रवृत्तिनिमित्तं विचार्यते । स्वावच्छिन्नाश्रयत्व स्वावच्छिन्नाश्रयाश्रयत्वस्वावच्छिन्नज्ञानजनकसंकल्पवत्त्वैतत्त्रितयसंबन्धेन परम-महत्परिमाणत्ववत्त्वरूपं बृहत्त्वमेव ब्रह्मपदप्रवृत्तिनिमित्तम् ।

End:

----जन्माद्यधिकरणटीकासिद्धतया प्रकृतेर्थसामान्यपदेन ब्रह्मोद्देश्यकाचेतन-त्वाद्यवच्छिन्नभेदकूटविधेयकानुमितिजनकतावच्छेदकप्रकारताश्रयत्वस्यैवविवक्षणेन

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

जगत्कारणत्वे तदभावेन व्यभिचाराभावात् तादृशजन्माद्यधिकरणटीकावाक्यं च सोपपत्तिकं व्याख्यातं लक्षणवादे इत्यलमतिविस्तरेण ।

Colophon:

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोयं विजृम्भताम् ।।
इति ब्रह्मपदशक्तिवादः ।।

2540 – ब्रह्मपदशक्तिवादः

Beginning:

अखिलभुवनबन्धोन्मोचने बद्धदीक्षं ।
प्रकृतिमनपहाय स्वेच्छयेहावतीर्णम् ।
वृषगिरिशिखरस्थैस्स ----- भुज्यमानं
कमपि पुरुषमी ---- नित्यजुष्टम् ।।
नत्वा यतिपतिचरणौ स्मृत्वानन्तार्यपादुकाधूलीः ।
ब्रह्मपदशक्तिवादं तनुते श्रीशै -------जसुधीः ।।
श्रुतिस्मृतिपुराणज्ञाः संप्रदाये सुशिक्षिताः ।
श्रीशादनन्यगं प्राहुर्ब्रह्मशब्दं निमित्ततः ।।
तदेतदपरिज्ञाय शब्दजालं प्रयुंजताम् ।
मौनमुद्राविधानेन -------- कृतिर्मम ।।

ब्रह्मशब्दो हि 'बृह बृहि वृद्धौ' इति धातोरौणादिककर्त्रर्थकमनिन्प्रत्ययान्तः। तत्र धातूक्तो वृद्धिर्नामः सूक्ष्मावस्थाप्रहाणपूर्वकस्थूलावस्थायोग एव चन्द्रकला वर्धत इत्यादौ ---- प्रयोगात् । तत्र सूक्ष्मावस्थाप्रहाणस्य भावा --- इति न्यायेन स्थूलावस्थारूपत्वात् स्थूलावस्थायोग एव धात्वर्थ इत्युक्तं भवति ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

End:

इत्यर्थकत्वेन तादृशशब्द ---- त्यस्य धातुरुपपरत्वेपि ब्रह्मशब्दस्य यौगिकत्वे विरोधाभावात् 'यानि नामानि गौणानि' इति वचन --- तत् बाह्यशब्दस्य योगरूढत्वेपि बृहतीत्यात् अनिष्ठवचनेन योगप्राबल्यात् निमग्नरूढत्वेन रुढिनिरपेक्षत्वयोगार्थबोधकत्वरूपयौगिकत्वविरुद्धमेव ब्रह्मशब्दरुढिरिति ।

2425 A – ब्रह्मलक्षणवादः

Beginning:

भुवनजननस्थेमध्वंसादिलीलमनाकुलं
यदुगिरितटाधारं नत्वा श्रियःपतिमंजसा ।
यतिपतिपदाम्भोजे धृत्वाऽन्तरंगमचंचलं
कलयति मुदाऽनन्तार्यो ब्रह्मलक्ष्मनिरुपणम् ।।

जगज्जन्मादिकारणत्वं ब्रह्मणो लक्षणमिति वेदान्तोदन्तः । तथा च सूत्रम् 'जन्माद्यस्य यतः' इति । ननु 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिलक्षणस्यापि श्रुतिसिद्धत्वात्तदेव कथं न सूत्रितमिति चेत् । अत्र श्रुतप्रकाशिकानुसारिणः यद्धर्मावच्छिन्नविषयतान्तःपातिविषयतामोक्षजनकतावच्छेदकविषयताव्यापिका तादृशधर्मावच्छिन्नमेव लक्षणं सूत्रकृता विवक्षितम् ।

End:

--जन्मनिरूपितकारणतात्वस्य समुदायनिरूपितकारणतात्वसामानाधिकरण्येऽपि तस्य समुदायनिरूपितकारणतात्वशरीरे घटकताविरहात्, जन्मस्थितिलयनिष्ठसमुदायत्वाश्रयनिरूपितकारणतात्वरूपोक्तलक्षणतावच्छेदकशरीरेजन्मादीनामाधेयतासम्बन्धेन समुदायत्वांशे विशेषणत्वेऽपि निरूपितत्वसम्बन्धेन कारणतांशे विशेषणताविरहात्, जन्मादिसमुदायनिरूपितकारणतात्वनिरूपिताविषयतांप्रति जन्मादिकारणतात्वनिरूपितविषयितायाः व्यापकताविरहात् . तद्विषयिताव्यापक-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विषयितानिरूपकत्वस्यैव तद्घटकतारूपत्वात्, जन्मादिसमुदायनिरूपितकारणतात्व-मित्याकारकज्ञाने जन्मादिनिरूपितकारणतात्वविषयिताविरहात्, इति संक्षेपः ।

Colophon:

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोयं विजृम्भताम् ।।

2354 – ब्रह्मविद्याविजयम्

Beginning:

श्रीनिवास------ भव्यरुपकल्याणगुणसिन्धवे ।
ममसर्वस्व-------- --------------------- ।।
तन्देशिकं परममूर्ध्ना प्रणमामि ---- वरदार्यम् ।
गुरोलब्ध वेदान्तज्ञान ------ उच्यते देवराज ।।

---- यत् भाष्यकारैस्सदेव ---- उपादान उपादेयतात्वेनशुचिरात्मभावेन च निर्व्यूढं तदुभयमपि न संभवतीति ---- उपादेयद्रव्यं नास्तीति ----- ब्रह्मणो विधदाति --- उपादानत्वे तस्य विदधाति ---- रुपैक्यमंगीकृतम् ।

End:

श्रुतिविरोधविशेषणस्योपादानत्वेतु न ब्रह्मणा उपादानत्वसिद्धिरिति न ब्रह्मोपादानमिति --- अनुसन्धानरूप --- श्रुतिमिति येन श्रुतेन ब्रह्मणाश्रुतं ब्रह्मणि तत् सादृस्यात् सर्वं ज्ञातं भवतीत्यर्थः । ब्रह्मज्ञानेन ---- सिद्धेरितरत् सर्वं ज्ञातप्रायमित्यर्थः ।।

1710 C – ब्रह्मसूत्राणि

Beginning:

हरिः ओम् । अथातो ब्रह्मजिज्ञासा । जन्माद्यस्य यतः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

End:

दर्शयतश्चैवं प्रत्यक्षानुमाने। भोगमात्रसाम्यलिंगाच्च। अनावृत्तिश्शब्दादनावृत्तिश्शब्दात्।

सम्पद्याविर्भावं बादरिर्दर्शयतश्चैव ----------------------------।

संपद्याविर्भावाविभागेनदृष्टत्वब्राह्मसंकल्पाभाव जगद्व्यापारवर्जष्ण्ट् ।। इति।

Colophon:

इति तुरीयाध्याये तुरीयः पादः। समाप्तश्चायं ग्रन्थः।

ब्रह्मसूत्रम् - 545, अधिकरणम् - 156.

1715 B, 1719 A – ब्रह्मसूत्रविवृतिः

Beginning:

अविघ्नमस्तु।

श्रीमन्नाथमुनियामुनमुनि रामानुजमुनिभ्यो नमः।

श्रीमदनिदंप्रथमफणितिशिखरगुरवे नमः।

ओम्। 'अथ' इति - अथ इत्यानन्तर्ये, अत इति च वृत्तस्य हेतुभावे, ब्रह्मणो जिज्ञासा - ज्ञातुमिच्छा। इच्छाया इष्यमाणप्रधानत्वादिष्यमाणं ज्ञानमिहाभिप्रेतम्। पूर्ववृत्तादल्पास्थिरफलकेवलकर्माधिगमादनन्तरं तत एव हेतोरनन्तस्थिरफलब्रह्माधिगमः कर्तव्यः।

End:

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः। सर्गेपि नोपजायन्ते प्रलये न व्यथन्ति च ।।

इति शब्दादेवैनं कदाचिदपि नावर्तयिष्यतीत्यवगम्यते। सूत्रावृत्तिः शास्त्रपरिसमाप्तिं द्योतयतीति सर्वं समंजसम्।

Colophon:

इति तुरीयाध्याये तुरीयःपादः समाप्तः। समाप्तश्चायन्ग्रन्थः ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

1719 A – ब्रह्मसूत्रादिनिर्णयक्रमः

Beginning:

अस्पष्टतरमस्पष्टं स्पष्टं छायानुसारि च ।
जीवप्रधानयोराद्ये वाक्यजातं विचिन्तितम् ।।
स्मृतिन्यायविरोधश्च परपक्षपराहतिः ।
कार्यता वियदादीनामक्षादेश्च द्वितीयतः ।।
सदोषत्वमदोषत्वं जीवस्य च परस्य च ।
तृतीयेन परोपास्तिरितिकर्तव्यतापि च ।।
उपास्त्यनुष्ठानविधिः गत्युपक्रमणक्रिया ।
गतिमार्गप्रकारश्च फलं चापि चतुर्थतः ।।
प्रमाणता तत्प्रतियोगिभंगास्संराधनं तस्य फलोपभोगः ।
एतानि सम्यक्परिचिन्तितानि शास्त्रेत्विहाध्यायचतुष्टयेन ।।
व्युत्पत्त्यभावः प्रतिपत्तिदौस्थ्य मन्ये न लभ्यत्वमथाफलत्वम् ।
एतानि वै सूत्रचतुष्टयेनानारम्भमूलानि निराकृतानि ।।
अथातो ब्रह्म सर्वत्र द्युभ्वाद्यप्यानुमानिकम् ।
स्मृत्यनवकाशरचना न वियच्च तथा तथा ।।
तदन्तराथसन्ध्येचाथ सर्वपुरुषार्थ च ।
आवृत्तिर्वाङ्मनस्यर्चिः सम्पद्याविरिति क्रमः ।।
अथातो ब्रह्मजन्मादि शास्त्रतत्तुसमन्वयात् ।

End:

अध्यायानां चतुर्णामधिकरणगणाः पादशोत्रानुपूर्व्या
रुद्राः सारावतारायसव इह रथादिक्ववादादिगीशाः ।
पश्चात्सारादिगीशातदनुषडधिकाविंशतिश्चार्थमासाः
पश्चादुद्देशबाणारस इति गणितापादसंख्याा कलास्यात् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

पाद्यैस्तस्यमिदं तथाधिकरणैः क्षेमाय संख्योन्मितं
सूत्रैश्चापि शुभेशसम्मितमथान्वध्यायमात्रक्रमात् ।
सालोक्य - धवयोर्गजस्यतसिना संख्यानि सूत्राण्यथ
क्षागोपाबालमणी बलाधिकरणान्याहुः क्रमात्सूरयः ।।

1026 – भगवद्गुणदर्पणम् (विष्णुसहस्रनामभाष्यम्)

Beginning:

श्रीपराशरभट्टार्यः श्रीरंगेशपुरोहितः ।
श्रीवत्सांकसुतः श्रीमान् श्रेयसे मेऽस्तुभूयसे ।।
वन्दे गोविन्दतातौ मुनिमथ मनवै लक्ष्मणार्यं महान्तं
ध्यायेयं यामुनार्यं मम हृदि तनवे राममेवाभियायाम् ।
पद्माक्षं प्रेक्षिशीय प्रथममपि मुनिं नाथमीढे शठारिं
स्तौमिप्रेक्षेय लक्ष्मीं शरणमशरणः श्रीधरं संश्रयेयम् ।।
ओं नमो गजवक्त्राद्यैः पारिषद्यैः प्रशासते ।
श्रीरंगराजसेनान्ये सूत्रवत्या समेयुषे ।।
नमो नारायणायेदं कृष्णद्वैपायनात्मने ।
यदामुष्यायणा वेदा महाभारतपंचमाः ।।
जातो लक्ष्मणमिश्रसंश्रयधनात् श्रीवत्सचिह्नात् ऋषेः
भूयो भट्टपराशरेति फणितः श्रीरंगभर्त्रा स्वयम् ।
श्रीश्रीरंगपतिप्रसादतृषया श्रीरंगनाथाह्वयः
श्रीरंगेश्वरकारितो विवृणुते नाम्नां सहस्रं हरेः ।।
संसारोऽयमपण्डितो भगवति प्रागेव भूयः कलौ
पूर्णमन्यतमे जने श्रुतिशिरोगुह्य ब्रुवेसाहसात् ।
तत्र स्तोत्रमिदं प्रकाशयति यः स्तुत्यश्च यस्तावुभौ
व्यासः कारुणिको हरिश्च तदिदं मौख्यं सहेतां मम ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अर्थे हरौ तदभिधायिनि नामवर्गे तद्व्यंजके मयि च बन्धविशेषमेत्य ।
सेवध्वम् एतदमृतं प्रणिपत्य याचे मध्यस्थमत्सरिजना इह मा च भूवन् ।।

ओं इह खलु निखिलोऽपि चेतयमानः प्रमाणतः प्रमेयं परिच्छिन्दन् तच्चेत् प्रमेयम् अनुकूलं तदुपाददीत, यथा स्रक्चन्दनकनकादिकम्, तच्चेत् विपरीतम् अपोहेत, यथा क्षुरकण्टकादिकम्, तच्चेत् अनुभूय रुपम् उपेक्षेत, यथा काष्ठलोष्टादिकम् । तत्र प्रत्यक्षादिप्रमाणान्तरगोचरयोः ----

End:

अक्षोभ्यः-प्रपन्नाभयदान दाढर्यात् स्वमहिम्नाऽपि अक्षोभ्यः । सर्वप्रहरणायुधः-स्वनिष्ठानां सर्वनिष्टोन्मूलयितॄणि असंख्येयानि अमर्याद सामर्थ्यानि आत्मोचितानि अनन्तानि आभरणविकल्प्यानि सदा सर्वत्र सर्वथा सर्वप्रकारसमाश्रित-संरक्षादीघसूत्रदीक्षितानि सर्वैश्वर्यधुन्धराणि अन्यान्यपि दिव्यायुधानि अस्येति सर्वप्रहरणायुधः ।

एवम् अशेषदोषप्रत्यर्थि उपाधिसंख्यावधि विरोधि तुंगमंगलस्वरूप-रुपगुणविभवचेष्टितम् अनंकुशैश्वर्यसौशील्यम् आपत्सखम् अर्थिकल्पकं प्रपन्नैक जीवातुं श्रियःपतिं भगवन्तं पुरुषोत्तमम् आश्रितानाम् आश्चर्यः सर्वसंपत्समुदायः ।

Colophon:

इति श्रीहरितकुलतिलक श्रीवत्सांकमिश्रसूनोः श्रीरंगराजदिव्याज्ञालब्ध श्रीपराशरभट्टापरनामधेयस्य श्रीरंगनाथस्य कृतौ श्रीमद्विष्णुसहस्रनामविवरणे भगवद्गुणदर्पणे दशमं शतकं संपूर्णम् ।।

2278 – भावप्रकाशिका

Beginning:

येनोपनिषदां भाष्यं रामानुजमतानुगम् ।
रम्यं कृतं प्रपद्ये तं रंगरामानुजं मुनिम् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अतसीगुच्छसच्छायमंचितोरः स्थलं श्रिया ।
अंजनाचलशृंगारमंजलिर्मम गाहताम् ।।

प्रारीप्सितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं प्रचयगमनार्थं च स्वाचार्यस्य वरदगुरोरिष्टदेवतारूपं हस्तिगिरीश्वरं भगवन्तं वरदप्रणतार्तिहरनामाभ्यां प्रख्यापयितेष्टप्राप्त्यनिष्टपरिहारलक्षणपुरुषार्थदातृभावम्, अत एव शरण्यं शरणमुपगच्छति - 'वरदं द्विरदादीशम्' इति । द्विरदादीशमित्यनेन सौलभ्यमुक्तम् ।

दिङ् नागैरर्चितस्तत्र पुरा विष्णुः सनातनः ।
ततो हस्तिगिरिर्नाम ख्यातिरासीन्महागिरेः ।।

इति पुराणवचनेन दिङ् नागानां तिरश्चामप्यर्चनीयोऽभूत् तत्रेति प्रतीतेः । 'श्रीनिधिं करुणानिधिं' इतिः पदद्वयेन शरण्यत्वोपयुक्ते सामर्थ्यकारुणिकत्वे अभिहिते, श्रियः पतेर्हि देयद्रव्येषु न दुर्लभं किंचिद्वस्त्वस्तीति नेष्टप्रापणे देयद्रव्याभावकृतमसामर्थ्यमस्ति । 'अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा' इति श्रीनिधेरप्रमेयतेजोनिधित्वेन अनिष्टनिरसनेऽपि तेजोविरहलक्षणमसामर्थ्यं न सम्भवति । हरिः इत्यनेनाश्रितानां दुरितं हरतीत्यर्थसिद्धिः । एतन्मध्यस्थं परदेवतां स्वाभीष्ठां स्वस्य एतत्प्रबन्धनिर्माणौपयिकज्ञानशक्त्यादिगुणप्रदायिनीं सुदर्शनाख्यामपि देवतां प्रणमति- बहिरिति । उपबृंहितवेदाय - व्याख्यातवेदाय ।

End:

ननु सिद्धान्ते बिम्बप्रतिबिम्बभावयोरैक्यात् कथं तद्विरुद्धम् उच्यत इत्यस्वरसात् आह 'छायया आदर्शे' इति । तृतीयसूत्रेण अनुपपत्तिविशेषपरिहारायेति । 'इदमन्नं इमा आपः इदं तेजः' इति विशेष्यव्यपदेशहेतुं उत्तरसूत्रेण कीर्तयिष्यन् तदुपयुक्ततया 'अन्नमशितं त्रेधा विधीयते' इति श्रुतिप्रतिपन्नमेवार्थं 'मांसादिभौमम्' इति सूत्रेण कीर्तयतीत्यर्थः । वाचस्पत्युक्तिमाह - 'मनस आहंकारिकत्वनित्यत्वयोरिति' इदमुपलक्षणं वाचोऽपि द्रष्टव्यम् । सांख्यैः वाङ् मनसयोः द्वयोरपि आहंकारिकत्वस्याभिधानात् । वाचस्पतिपक्षे च सूत्रस्यायमर्थः - मांसादिभौममित्येतत् दृष्टान्तार्थम् । यथा मांसादिभौमं भवति, एवं वाङ् मनसी अपि तैजसभौमे इति ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

Colophon:

इति संज्ञामूर्तिक्लृप्त्यधिकरणम्। इति दशोपनिषद्भाष्यकारैः श्रीमद्रंगरामानुजमुनिविरचितायां श्रुतप्रकाशिकाव्याख्यायां भावप्रकाशिकायां द्वितीयाध्यायस्य चतुर्थः पादः।।

111 A – भेददर्पणम्

Beginning:

चिदचिद्विसजातीयमद्वितीयं गुणार्णवम् ।
अशेषशेषिणं शेषशायिनं तमुपास्महे ।।
भेदाभेदश्रुतिव्रातजातसन्देहसन्तताः ।
भेददर्पणमादाय निश्चिन्वन्तु विपश्चितः ।।
शब्दैकसमधिगम्ये वस्तुनि यच्छन्द आह ।
तदेवतत्त्वमिति प्रामाणिकानां ------- ।।

अलौकिके ब्रह्मणि शास्त्रमेव प्रमाणयन् सूत्रकारोपि शास्त्रयोनित्वादित्याह । शास्त्रंच नाम - अनादिनिधनाऽविच्छिन्नपातसंप्रदायानाघ्रातप्रमादादिदोषगन्धवेदाख्याक्षरराशिः । तद्योनित्वं च ब्रह्मणः ज्ञप्तिद्वारकमिति शास्त्रप्रमाणकत्वं तदर्थे पर्यवस्यति । अवधारणगर्भं चैतत् अब्भक्षादिवत्तेन शास्त्रैकप्रमाणकत्वं तदवधार्यते ।

End :

--भेदस्तु प्रत्यक्षादि बहुप्रमाणसिद्धश्रुतिस्मृतिशतावगतः सूत्रकारैरपि---अवगतो मुक्तिहेतुज्ञानविषयतया परमात्मा एवेति सर्वमवगतम् । विशिष्टाभेदस्थाश्रुतिरगुणितत्वम् । पदधृता विमुक्त्यर्थ-----गीताश्रुतिशतैः ।। स्वरूपाभेदोक्तितदिदमुपरूढेऽखिलतनुमपरमस्वान्मामुक्त्यैः सुमतिभिरुपास्यश्शुभगुणः। ----सिद्धयेऽखिलशरीरभूत तादात्म्यस्य च फलं कतिचिद्वदन्त्वित्येवं त्रयीभवति सार्थपदासदर्था ।।

Colophon:

इति भेददर्पणं नाम प्रकरणं सम्पूर्णम् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

3 – मितप्रकाशिका

Beginning:

अथ शास्त्रयोन्यधिकरणस्यावान्तरसंगतिमाह - जगदित्यादिना । उक्तमित्येतदधिकरणद्वयफलितार्थकथनम् । वाक्यपदं वेदान्तवाक्यपरम् । तथा च मानान्तरसिद्धं मानान्तरबाधितं च वैदिकं वाक्यं न प्रतिपादयतीति अनुमानेनैव तत्सिद्धया वेदान्तानां तत्राप्रामाण्यात्तैः ब्रह्मविचारारम्भो न युक्त इति उत्थानादाक्षेपितसंगतिरिति भावः इत्याशंक्याह - एवं शंकायामित्यनेन सूत्रेण तत्परिहारमाह सूत्रकार इत्यर्थः । 'शास्त्रयोनित्वात्' अनेन सूत्रेण शंकापरिहारप्रकारं सूत्रार्थं वदन् दर्शयति - शास्त्रं यस्येति । अनेन शास्त्रस्य योनिरिति तत्पुरुषसमासो व्युदस्तः । कारणत्वं नोत्पत्तिकारणत्वम्, असंभवात् । किन्तु ज्ञप्तिकारणत्वमित्याह - प्रमाणमिति । तथा च ब्रह्मज्ञानस्य शास्त्रजन्यत्वात् ब्रह्मणः शास्त्रयोनित्वमित्याह - तस्मादिति । कथमुत्थितशंकापरिहारमित्यत्राह - अत्यन्तेति ।

End:

भगवत्संकल्पस्य पुनरावृत्तिहेतुत्वं परिहरति - न च परमेति । मुक्तान् पुनर्नावर्तयिष्यामीति संकल्पो नान्यथा स्यादित्यभिप्रायेण सत्यसंकल्पः इत्युक्तम् । ज्ञानिनः अत्यर्थप्रियत्वाच्च तथासंकल्पः । अत्यर्थप्रियत्वे प्रमाणं दर्शयति - य एवमाहेति । इति सर्वं समंजसमिति सर्वशब्देन भेदश्रुत्यभेदश्रुतिघटकश्रुतिगुणादिभिः निषेधश्रुतिभगवत्कृपास्वातन्त्र्यादिपरवाक्यप्रत्यक्षादीन्यभिप्रेत्य तेषां सामंजस्यमुक्तम् । इतिशब्दः अखिलभुवनेत्यादिभाष्योक्ताशेषार्थपरामर्शी । सर्वशब्देनानुदाहृत-श्रुतिस्मृतीतिहासपुराणवचांसि तदनुग्राहकतर्कजातं च विवक्षितम् । उक्तार्थबाधकत्वेन ये प्रमाणतर्काः परैः प्रयुक्तास्ते सर्वेपि परिहृताः । उत्प्रेक्षितानां तर्काणां उक्तविधया परिहारश्चानुसन्धेय इत्यभिप्रायेण च सर्वं समंजसमित्युक्तम् ।।

Colophon:

इति श्रीहरितकुलतिलकश्रीवाग्विजयसूनुना श्रीरंगराजदिव्याज्ञालब्धवेदव्यासापर-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

नामधेयेन वरदराजार्यपादसेवाधिगतभगवद्रामानुजविरचितशारीरकमीमांसाभाष्य-हृदयेन सुदर्शनसूरिणा विलिखितश्रुतप्रकाशिकासंग्रहमितप्रकाशिकायां श्रीरहस्यत्रय-व्याख्याकरणविख्यातवैभवघनगिरिश्रीनिवासाख्यगुरुवरकरुणाविषयेण तन्नामक-तत्पौत्रगुरुवरकरुणालब्धतत्वत्रययाथात्म्यविज्ञानेन वरदश्रुत्यन्तमुनिवरपदकमल-समाश्रयणसंजातयाथात्म्यविज्ञानदाढर्येन श्रीमद्वरददेशिककटाक्षैकलक्ष्यतामुपगतेन कविकथककण्ठीरवचरणयुगळविन्यस्तसमस्तभरेण श्रीमद्वेदान्तयतिराजस्वामिनः करुणैकभाजनेन परकालयतिना विलिखितायां चतुर्थस्याध्यायस्य चतुर्थःपादः ।।

566 B – मुकुन्दमाला

Beginning:

श्रीवल्लभेति वरदेति दयापरेति
भक्तप्रियेति भवलुंठनकोविदेति ।
नाथेति नागशयनेति जगन्निवासे-
त्यालापिनं प्रतिदिनं कुरु मां मुकुन्द ।।
जयतु जयतु देवो देवकीनन्दनोऽयं
जयतु जतयुकृष्णो वृष्णिवंशप्रदीपः ।
जयतु जयतु मेघश्यामलकोमलांगो
जयतु जयतु पृथ्वीभारनाशो मुकुन्दः ।।

End:

आनन्द गोविन्द मुकुन्द राम नारायणानन्त निरामयेति ।
वक्तुं समर्थोऽपि न वक्ति कश्चिदहो जनानां व्यसनानि मोक्षे ।।
क्षीरसागरतरंगसीकरासारतारकितचारुमूर्तये ।
भोगिभोगशयनीयशायिने माधवाय मधुविद्विषे नमः ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

1722 A – मुक्तिपदशक्तिवादः

Beginning:

अंजनघनमदभंजनमपि च कयाचित्सुरंजितं कलया ।
अंजनविधुरदृग्गंजनमंजनगिरिरंजनं भजे भावुकम् ।।
निजवकुलगलन्मधुललितकलालापनिगलितश्रीशम् ।
करकलितबोधमुद्रां किमपि यिनिद्रं समाश्रये भद्रम् ।।
निगमयुगलसारौ श्रावितौ येन धाम्ना
परमपि परतन्त्रं पात्रमेवोपकल्प्य ।
तदिह निखिलरक्षादीक्षितं नौमि नत्वा
वरवरयतिवर्येत्यादिनामाभिलापैः ।।
कलशजलधिकन्याकान्तवीक्षामृतौघैः
अनुकलमभिषिक्तामार्यगोष्ठीं विभाव्य ।
विपुलमिह विचारं मुक्तिशब्दस्य शक्तेः
कलयति कुतुकाच्छ्रीशैलयोगीशदासः ।।

अत्र तावन्मुक्तिशब्दशक्तिर्विचार्यते । तदिदं सर्वसंप्रतिपन्नं संसारनिवृत्तित्वमेव मुक्तिशब्दशक्यतावच्छेदकमिति ।

End:

तथा च मुक्तिमोक्षादिशब्दानां कैवल्यादिष्वपि मुख्यतायाः पाद्मोत्तरखण्डादि-सिद्धत्वेन तत्र सर्वत्रानुगतमनतिप्रसक्तं च यत्तदेव मुक्त्यादिशब्दरूढिनिमित्तं वक्तव्यमिति यथोक्तमेव तदुपपन्नतरमिति सर्वं समंजसम् ।।

Colophon:

श्रीवाधूलमहाचार्यचिन्तासन्तानजन्मना ।
श्रीश्रीनिवासदासेन कृतेयं कृतिरेधताम् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

2232 – मूलभावप्रकाशिका

Beginning:

श्रीमते हयग्रीवाय नमः

अतसीगुच्छसच्छायमांचितोरःस्थलं श्रिया ।
अंजनाचलश्रृंगारं अंजलिर्ममगाहताम् ।।
वरदं द्विरदाद्रीशं श्रीनिधिं करुणानिधिम् ।
शरण्यं शरणं यामि प्रणतार्तिहरं हरिम् ।।
बहिरन्तस्तमच्छेदि ज्योतिर्वन्दे सुदर्शनम् ।
येनाव्याहतसंकल्पं वस्तुलक्ष्मीधरं विदुः ।।
सम्यङ् न्यायकलापेन महता भारतेन च ।
उपबृंहितवेदाय नमो व्यासाय विष्णवे ।।
तस्मै रामानुजार्याय नमः परम योगिने ।
यः श्रुतिस्मृतिसूत्राणां अन्तर्ज्वरमशीशमत् ।।
प्रपचेप्रणवाकारं भाष्यं रंगमिवापरम् ।
परस्य ब्रह्मणो यत्र शेषित्वं स्फुटमीक्ष्यते ।।
अविस्तृताः सुगम्भीराः रामानुजमुनेर्गिरः ।
दर्शयन्तु प्रसादेन स्वं भावमखिलं दृढम् ।।

इह खलु भगवान् भाष्यकारः कुमतिकलुषितं शारीरकं शास्त्रं लोकानुजिघृक्षया पूर्वाचार्यमतानुसारेण व्याचिख्यासुः । भाष्यनिर्माणौपयिक शारीरकार्थ तत्त्वज्ञानस्य-

यस्य देवे पराभक्तिः यथादेवेतथा गुरौ ।
तस्यैते कथिताश्चार्थाः प्रकाशन्ते महात्मनः ।।
भक्त्यात्वनन्यया शक्य अहमेवं विधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुंच परं तप ।।

इत्यादि प्रमाणैः भगवद्भक्तिसाध्यत्वं मन्यमानः प्रारीप्सितस्य ग्रन्थस्य

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अविघ्नपरिसमाप्तिप्रचयगमनाय शिष्टाचारप्राप्तं भगवद्भक्त्या श्रीरूप मंगल-माचरति अखिलेत्यादिना ।

End:

---- स्फोटयते, व्यज्यते, वर्णैरितिवा स्फुटीभवत्यस्मादर्थ इति स्फोट इत्युच्यते । तत्राभिव्यंजकवर्णागतांगत्यादिकं आरोपितं अर्थ-------सत्यात् सत्यसिद्धि-रित्युदाहरणान्तरं आशंक्य ---- स्फोटसंकेतवशादर्थप्रतीतिहेतु ----

773 E – मूलमन्त्रन्यासः

Beginning:

अस्य श्रीमदष्टाक्षरमन्त्रराजस्य श्रीमद्बदरिकाश्रमवासि नारायणो ऋषिः । देवी गायत्रीच्छन्दः । परमात्मा देवता । आम् बीजम् । आयः शक्तिः । शुक्लो वर्णः । उदात्त स्वरः । श्रीवैकुण्ठं क्षेत्रम् । श्रीमन्नारायण प्रीत्यर्थे जपे विनियोगः। ओं ओं ज्ञानाय हृदयाय नमः। ओं ओं ऐश्वर्याय शिरसे स्वाहा । ओं ओं शक्त्यै शिखायै वौषट्। -------------। ओं नमः सुदर्शनायास्त्रायफट् इति दिग्बन्धः । ध्यानम् -

सव्यं पादं प्रसार्य श्रितदुरितहरं दक्षिणं कुंचयित्वा
जानुन्याधाय सव्येतरमितरभुजं नागभोगे निधाय ।
पश्चाद्बाहुद्वयेन प्रतिभटशमने धारयन् शंखचक्रे
देवीभूषादिजुष्टो नवजलदनिभः पातु वैकुण्ठनाथः ।।

अस्य श्रीशरणागतिमंत्रराजस्यान्तर्यामी नारायणो ऋषिः । देवी गायत्रीछन्दः । परमात्मा श्रीमन्नारयणो देवता । श्रीं बीजम् । नमःशक्तिः। परमात्मा तत्त्वम् । परप्रकाशो वर्णः । श्रीमन्नारायण प्रीत्यर्थे जपे विनियोगः ।

End:

----- विष्णवे करतलकरपृष्ठाभ्या नमः । एभिरेव अंगन्यासः । ध्यानम् -

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विष्णुं भास्वद्किरीटांगदूयगलाकल्पहारोज्वलांगं
श्रेणीभूषं सुवक्षोमणिमकुटमहाकुण्डलैर्मंडितांगम् ।
हस्तोद्यच्छंखचक्राम्बुजगदममलं पीतकौशेयवासं
व्यंद्योतंद्भासमुद्यन्दिनकरसदृशं पद्मसंस्थं नमामि ।।

1730 B – मोक्षकारणतावादः

Beginning:

मुक्तिप्रदं मुररिपुं मुनिबृन्दवन्द्यम्
मोहच्छिदं यतिपतिं च मुदाभिवन्द्य ।
श्रीमाननन्तगुरुरद्य गुरुं विचारम्
मोक्षैकहेतुविषयं कुतुकात्तनोति ।।

अत्र मोक्षस्य मुख्यसाधनम् विचार्यते । स्वसामानाधिकरण्यस्वसमानकालीनत्व उभयसंबन्धावच्छिन्नाविद्यातिरोधाननिष्ठावच्छेदकताकप्रतियोगिताकभेदविशिष्टानन्दत्वं मोक्षत्वम् । अत्र केवलानन्दत्वस्य बद्धानन्देऽपि तदानीं मोक्षव्यवहारवारणाय निरुक्तभेदवैशिष्टयनिवेशः । घटादिषु तद्वारणाय आनन्दत्वनिवेशः । बन्धकालीनतिरोधानमादाय मुक्तेष्वव्याप्तिवारणाय भेदीयप्रतियोगितायां समानकालीनत्वसम्बन्धावच्छिन्नत्वनिवेशः । व्यधिकरणतिरोधानमादाय असम्भववारणाय तत्र प्रथमसम्बन्धावच्छिन्नत्वनिवेशः इति विवेकः । अत्र अविद्यातिरोधानं नाम अविद्याजन्यतिरोधानं ग्राह्यम् ।

End:

एतदुक्तं भवति - यथा अद्यमानसामान्यवृत्तिकस्यापि अन्नशब्दस्य अन्नविशेषप्रसिद्धिप्रचुरत्वम्, मकरन्दसामान्यवृत्तिकस्यापि मधुशब्दस्य निन्द्यमधुविशेषेषु प्रसिद्धिप्रचुरत्वम्, यथा च निष्ठाद्यसामान्यवाचिनः फलशब्दस्य अनुकूलेषु प्रसिद्धिप्रचुरत्वम्, एवं कैवल्यादि मोक्षसामान्यवृत्तिकस्यापि मोक्षशब्दस्य

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

ब्रह्मविद्याफल भूतनिरुक्त मोक्षविशेषएव त्रय्यन्तप्रसिद्धिप्रचुरत्वमिति त्रय्यन्त-निष्णाताः तमेव प्रसिद्धं मोक्षपदवाच्यं वदन्तीत्यर्थः इति ।।

1730 C – मोक्षकारणतावादः

Beginning:

मुक्तिप्रदं मुररिपुं मुनिबृन्दवन्द्यम्
मोहच्छिदं यतिपतिं च मुदाभिवन्द्य ।
श्रीमाननन्तगुरुरुज्वलयुक्तियुक्तम्
मोक्षैकहेतु विषयं तनुते विचारम् ।।

इह तावन्मोक्षस्य मुख्यसाधनम् विचार्यते । मोक्षो नाम - स्वसामानाधिकरण्यस्वसमानकालीनत्वोभयसम्बन्धेन कर्मप्रागभावविशिष्टान्यः उक्तोभयसम्बन्धेन कर्मविशिष्टान्यो वा यः कर्मध्वंसः स्वसामानाधिकरण्यस्वोत्तरत्वोभयसम्बन्धेन तद्विशिष्टानन्दः ।

End:

तदिदं तत् भाष्यवचनम् - त्रय्यन्तनिष्णातास्तु निखिलजगदेककारणस्य अशेषहेयप्रत्यनीकानन्तज्ञानानन्दैकस्वरूपस्य स्वाभाविकानवधिकातिशयासंख्येयकल्याणगुणाकरत्वे सकलेतर विलक्षणस्य सर्वात्मभूतस्य परस्य ब्रह्मणः शरीरतया प्रकारभूतस्य अनुकूलपरिच्छिन्न----------

43 B – यतीन्द्रमतदीपिका

Beginning:

श्रीवेंकटेशं करिशैलनाथं श्रीदेवराजं घटिकाद्रिसिंहम् ।
कृष्णेन साकं यतिराजमीडे स्वप्नेऽद्य दृष्टान् मम देशिकेन्द्रान् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

यतीश्वरं प्रणम्याहं वेदान्तार्यं महागुरुम् ।
करोमि बालबोधार्थं यतीन्द्रमतदीपिकाम् ।।

श्रीमन्नारायण एव चिदचिद्विशिष्टाद्वैततत्त्वं भक्तिप्रपत्तिभ्यां प्रसन्नः स एवोपायोऽप्राकृतदेशविशिष्टः स एव प्राप्य इति वेदान्तवाक्यैः प्रतिपादयतां व्यास-बोधायनगुहदेवभारुचिब्रह्मनन्दिद्रविडार्यश्रीपरांकुशनाथयामुनमुनियतीश्वरप्रभृतीनां मतानुसारेण बालबोधार्थं वेदान्तानुसारिणी यतिपतिमतदीपिकाख्या शारीरकपरिभाषा महाचार्यकृपावलम्बिना मया यथामति संग्रहेण प्रकाश्यते ।

End:

अतश्चिदचिद्विशिष्टो ब्रह्मशब्दवाच्यो विष्ण्वाख्यपरवासुदेवो नारायण एव एकं तत्त्वमिति विशिष्टाद्वैतवादिनां दर्शनमिति सिद्धम् ।

इति विविधविचित्रं मानमेयप्रकाशं
घनगुरुवरदासेनोक्तमादाय शास्त्रात् ।
यतिपतिमतदीपं वेदवेदान्तसारं
स भवति मतिमन्यः सत्कटाक्षैकलक्ष्यः ।।

Colophon:

इति वाधूलकुलतिलक श्रीमन्महाचार्यस्य प्रथमदासेन श्रीमन्वेंकटगिरिनाथ-पदकमलसेवापरायण स्वामिपुष्करिणी श्रीगोविन्दाचार्यसूनुना श्रीनिवासदासेन विरचिता यतीन्द्रमतदीपिकाख्या शारीरकपरिभाषा समाप्ता ।।

2640 – रहस्यत्रयजीवातुः

Beginning:

प्रपद्ये जगदानन्दकन्दमिन्दीवरप्रभम् ।
इन्दिरामन्दिरन्तेजो वन्दनीयमनिन्दितैः ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कलयाम्यस्मदाचार्यान् तदाचार्यान् तथापरान् ।
प्रपद्ये कमलान्देवी कमलेक्षणवल्लभाम् ।।
अस्मदाचार्यवर्येभ्यः श्रुतस्यार्थस्य सादरम् ।
संग्रहः क्रियतेऽस्माभिर्मननायैव केवलम् ।।

मुमुक्षोः चेतनस्य रहस्यत्रयतत्वार्थो ज्ञातव्य इति आचार्याः प्रत्यवदत । रहस्यत्रयशब्देन श्रीमदष्टाक्षरो मनुः द्वयाख्यं मन्त्ररत्नं चरमश्लोकवर्यश्च कथ्यते । तत्र श्रीमदष्टाक्षरो मनुः श्रीमद्बदरिकाश्रमे परमकारुणिकेन भगवता नारायणेन स्वांशभूताय --- सर्वजनहिताय उपदिष्टैः पुराणेषु स्मरणात् विष्णुगायत्र्यां "नारायणाय विद्महे" इति प्रथमोपात्तत्वात् तथा ---' वेदेषु नास्ति चाष्टक्षरात् परः। व्यक्तं--वानेष साक्षान्नारायणस्स्वयम् । अष्टाक्षरस्वरूपेण मुखेऽपि परिवर्तते इत्यादि-वचनशतबलात्------- सर्वव्यापकमन्त्रान्तरोत्कृष्टः विज्ञायते ।

End:

तथापि रागविषयमंशं तदनुबन्धिदुःखं च भगवान् स्थापयति । तदुक्तम् - शोकास्पदमंशं अथ न श्रूयताम् । भवाब्धौ रागस्वांशसहजं ---- दुःखम् । --- जगति रंगधुरीणभूयः क्षोदिषु भोगरसिका स्ववचनं स्मरेयुरिति । निश्शेषवैराग्ये सति सर्वं - --राश्यश्चार्तस्यैव सम्भवति । -- वर्तमानदेहसाभिलाषत्वात्--- रागविषयोऽपि - --कृत्य ते विचित्रे----। आर्तदृप्तयोर्ल्लक्षणमुच्यते । ये खलु शरणागतिमन्त्रोच्चारणमेव प्रस्थानशंखनिनादकृत्यपरमपदं प्राप्नुवन्ति---तदन्ते ते दृप्ता इति ।

Colophon:

इति रहस्यत्रयजीवातौ द्वितीयः परिच्छेदः ।।

1253 A – रहस्यत्रयमीमांसाभाष्यम्

Beginning:

तत्र पूर्वपक्षः - उकारनमश्शब्दयोः प्रयोजनपर्यवसानं न संभवति । उकार-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

नमश्शब्दफलीभूतान्यशेषत्वनिवृत्तेः स्वयंप्रयोजनरूपत्वाभावात् । प्रत्युत, अन्यशेषत्वस्य त्रिवर्गादिषु प्रधानपुरुषार्थहेतुतायाः, अपवर्गादिषु विद्यानिष्पादनाद्याऽऽरोग्यकरणपाटवदीर्घायुष्यादिप्रयोजनहेतुतायाः, निष्पन्नविद्येष्वपि यावन्मोक्षभाव्याज्ञानुज्ञाकैंकर्याद्यर्थं तादृशपुरुषार्थहेतुतायाश्च 'आरोग्यं भास्करादिच्छेत् श्रियमिच्छेद्धुताशनात् । शंकराद्ज्ञानमन्विच्छेत्' 'पश्येम शरदश्शतं, जीवेम शरदश्शतम्' 'आयुराशास्ते । सुप्रजास्त्वमाशास्ते' 'अन्नवानन्नादो भवति' इत्यादि--

End:

किं च सिद्धान्ते अदृष्टकारकफलसाधनगोचरप्रवृत्तेरेव अनन्यशरणत्वसर्वलोकशरणत्वरूपस्वस्वरूपपरस्वरूपयोर्विरुद्धत्वात्। शास्त्रफलंप्रयोक्तरीतिन्यायेन भोक्तृत्वापादकतया केवलपारार्थ्यरूपपुरुषार्थस्वरूपविरोधित्वाच्चावश्यपरिहरणीयतया दृष्टसाधनप्रवृत्तेरनुपपत्तिभावाच्च । अपि च 'सर्वधर्मान् परित्यज्य' इत्यादिषु चोदनालक्षणार्थानामेव मोक्षसाधनानां निषेधादविधेयज्ञानानामनिषिद्धतया निरुक्तविरोधित्रयनिवृत्यात्मकज्ञानत्रयस्याविधेयतायाः पूर्वमेवोक्तत्वाच्च विरोधाभावात् ।।

1665 – रहस्यत्रयसारतात्पर्यकौमुदी

Beginning:

पूर्वोत्पन्नेषु भूतेषु कलौ प्रभुरित्यस्मिन् वचने आदिभक्तास्त्वनन्तगरुडादीनामिच्छावतारभेदा इति पुराणप्रसिद्धमिति ।

End:

प्राधान्येन शास्त्रवेद्यत्वविद्याविषयत्वादेः नित्योभयेच्छानियन्त्रितत्वमपि यथाप्रमाणं बहुमन्तव्यमिति हृदयम् ।

Colophon:

इति रंगरामानुजविरचितायां श्रीमद्रहस्यत्रयसारतात्पर्यकौमुद्यां अर्थपंचकाधिकारः।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

2202–लघुसामानाधिकरण्यवादः

Beginning:

श्रीरमणचरणयुगलं ध्यात्वा नत्वा च सम्यगाचार्यान् ।
सामानाधिकरण्ये वादं वितनोत्यनन्तार्यः ।।

इह खलु 'सर्वं खल्विदं ब्रह्म' 'अयमात्मा ब्रह्म' 'तत्त्वमसि' इत्यादिसामानाधिकरण्यवाक्यार्थो विचार्यते। सामानाधिकरण्यं नाम अभेदसम्बन्धावच्छिन्नप्रकारताकबोधजनकवाक्यत्वम् । स्तोकं पचतीत्यादिक्रियाविशेषणस्थले सामानाधिकरण्यमिष्टमेव । अत्र वाक्यत्वनिवेशात् न तादृशबोधजनकपदज्ञानादावतिव्याप्तिः ।

End:

सिद्धान्ते तु - तत्प्रकारयोग्यताज्ञानसत्वेन तदभावरूपविषयासत्त्वैव तादृशप्रत्यक्षवारणात् तद्वारणाय न तत् कल्पनीयम् । न च अपृथक्सिद्धेः संसर्गतामतेऽपि तत्संसर्गेण ब्रह्मप्रकारकज्ञानाभावप्रत्यक्षे तत्कल्पनीयमिति वाच्यम् । ब्रह्मशरीरकप्रकारकज्ञानकालेब्रह्मप्रकारकज्ञानस्यावश्यकतया सिद्धान्ते विषयासत्त्वैव तद्वारणात्, ब्रह्मप्रकारकज्ञानकाले च तच्छरीरकप्रकारकज्ञानस्याभावेन साम्याभावात् न च-सिद्धान्तेपिं ब्रह्मशरीरकप्रकारकयोग्यताज्ञानत्वादिना गुरुभूतरूपेण योग्यताज्ञानादेः गुरुशरीरतादृशपदंजन्यपदार्थोपस्थितेरपि हेतुत्वात् गौरवमिति वाच्यम् । अपृथक्सिद्धिसंसर्गतामतेऽपि ब्रह्मादिपदस्य ब्रह्मादिशरीरकत्वावच्छिन्ने लक्षणाग्रहदशायां तादृशयोग्यताज्ञानादीनां हेतुत्वस्य क्लृप्तत्वेन गौरवभावात् । अधिक-मन्यत्रानुसन्धेयम् ।।

Colophon:

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

1034 B – वरदराजस्तवव्याख्या

Beginning:

शेषाश्च -------रामानुजगुरुः वेंकटनिवासः ।

श्रीमन्त्ररत्नरीत्या श्रीवरदराजस्तवं हि विवृणोति ।।

श्रीमद्भाष्यकारसकाशानिशसंवासप्रकाशितसमस्तश्रुत्यन्ततत्त्वार्थाः श्रीवत्सचिह्नमिश्राः आनृशंस्यमनसः, सकलसुमनस्संचयस्संजीवनाय पंचस्तवव्याजेनार्थपंचकं प्रकाशयितुकामाः, प्रथमतः प्राधान्येन भगवतो वैकुण्ठनाथस्य अकुण्ठमहिम्नः स्वरूपरूपादिकं तदुपसर्जनत्वेन प्रत्यगात्माधिस्वरूपं च श्रीवैकुण्ठस्तवे गुरुवन्दनपुर्वकं प्रदर्श्य, व्यूहान्तर्यामिणोः अचिन्त्य वैभवतया तदन्तर्भावमेव विभावयन्तः, विभवावतारभावुकव्यापारविषयकमतिमानुषस्तवं विधाय, तथाविध कादाचित्कतामतिनिबन्ध संबन्धवर्जित अर्चावतारस्तवप्रस्तावे समस्तकांक्षितप्रदानदीक्षितं वनक्षितिधरमन्दिरं सुन्दरबाहुं बहुशस्वदेशिक रामानुजार्यचरणकमल संश्लेषैकफलास्तुत्या हस्तिशैलनिलयो भवानी इति प्रस्तुतं हस्तिगिरिनाथं शरणगतिमन्त्रप्रकारेण संप्रतितुष्टुवन्तसन्तः, प्रारीप्सितस्य निष्प्रत्यहपरिसमाप्त्यर्थमाशीर्वचनरूपं मंगलं निबध्नन्ति 'स्वस्ति' इति -- ।

End:

स च यामुनमुनिश्च नाथवंश्यः तत्पितामहत्वान्नाथमुनेः - सच नाथमुनिश्च परांकुशमुनेः वंश्यः - विद्यावंश्यः सोऽपि श्रीपरांकुशमुनिरपि तवदेव्या, सर्वजनजनन्याः 'देव्या कारुण्यरुपये' इत्युक्तायाः श्रियः दासै हेतोः ईक्षणीयोऽस्मि भवदीय दयारूपायाः श्रियो देव्याः परंपरासंबन्धात् रामानुजांघ्रिशरणोऽस्मि ततो हेतोः कटाक्षणीयोस्मि इति निष्कृष्टोर्थः ।

Colophon:

इति श्रीमदात्रेयगोत्रभूणायमाण शेषाचार्यपौत्रेण श्रीरामानुजगुरुसूनुना श्रीवेंकटनिवासदासेन विरचिता वरदराजस्तव व्याख्या परिसमाप्ता ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

1715 D – विशिष्टाद्वैतनिर्वचनम्

Beginning:

अशेषचिदचिद्प्रकारं ब्रह्मैकमेव तत्त्वम् । तत्र प्रकारप्रकारिणोः प्रकारणांच मिथोप्यत्यन्तभेदेपि विशिष्टैक्यादि विवक्षया एकत्वव्यपदेशः । तदितरनिषेधश्च ।

अशेषेति - अत्र च अशेषशब्देन चितान्मिथोभेदः, अचितान्मिथोभेदश्च विवक्षितः । अशेषपदस्य प्रत्येकमन्वितत्त्वात् । प्रकारः - शरीरम्, अपृथक्सिद्धविशेषणमिति यावत् । अनेन च प्रकारप्रकारिणोः मिथोभेदश्च विवक्षितः। शरीरशरीरिभावस्य भेदरूपत्वात् । ननु प्रकारप्रकारिणोःप्रकाराणांच अशेषप्रकारशब्दाभ्यां विवक्षितभेदसत्वे 'एकमेवाद्वितीयं', 'नेहनानास्ति किंचन' इत्यादि ऐक्यश्रुतयः भेदनिषेदश्रुतयश्च कुप्येयुरित्याशंक्य आह - तत्रेति । विशिष्टैक्यादिति, आदिपदेन प्राधान्यादिकं गृह्यते ।

End:

प्रतियोगिता वैशिष्टय्म् स्वावच्छेदकत्वस्वनिष्ठावच्छेदकताकप्रतियोगिताक भेदवत्त्वोभयसम्बन्धेन । स्वनिष्ठावच्छेदकतास्वनिरूपकभेदसमानाधिकरण भेदप्रतियोगितावच्छेदकत्वसम्बन्धावच्छिन्नभेदप्रतियोगितावच्छेदकता स्वाश्रयापृथक्सिद्धविशेषणतासम्बन्धावच्छिन्ना । तेन भावान्तराभाववादे भेदस्य तत्तधर्मरूपतया अखण्डत्वाभावात् स्वतन्त्रवस्तुद्वयसत्त्वेपि उक्तैकत्वोपपत्तावपि नक्षतिरिति ।

1484 A – विशिष्टाद्वैतमतविजयवादः

Beginning:

पायात्स वः स्वव्यनिरिक्तसर्वपुश्चयोऽन्तर्धिषणेतमः पुमान् ।
यस्मात्कटाक्षायत भाग्यदृष्ट्या सुनिर्गुणे भव्यगुणाकरोऽभून् ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अत्र खलु अखिलहेयप्रत्यनीककल्याणगुणैकतानस्वेतरसमस्तवस्तुविलक्षण-विशिष्टाद्वैतं ब्रह्म सर्वश्रुतिस्मृतीतिहासपुराणवेद्यमिति श्रीमद्रामानुजाचार्यैःभाष्ये राद्धान्तितम् । अत्र केचित्कुमतयस्त्वाहुः -

भेदाभेदविरुद्धं हि विशिष्टाद्वैतकल्पनम् ।
न युक्तं बुद्धिकुशलैः श्रौतयौक्तिकबाधतः ।।

तथाहि - 'नित्यो नित्यानां चेतनश्चेतनानां एको बहूनां यो विदधाति कामान्' 'उत्तमःपुरुषस्त्वन्यः परमात्मेत्युदाहृतः' इत्यादिभिः प्रकृतिजीवाभ्यां केवलभेदस्यैव प्रतिपादनात् । 'सर्वं खल्विदं ब्रह्म' 'आत्मैवेदं सर्वम्' 'भूतानि विष्णुर्भुवनानि विष्णुः' 'नद्यास्समुद्रागिरयश्च विष्णुः' 'सर्वे विष्णुमया वेदाः सर्वे विष्णुमया गणाः' इत्यादिभिर्जगद्ब्रह्मणोः केवलाभेदस्यैव प्रतिपादनात् ।

End:

तदर्थं ब्रह्मव्यतिरिक्ताधिष्ठानस्वीकारे अद्वैतहानिः । अधिष्ठानानंगीकारे आरोपानुपपत्तिः । तदुक्तम् -

अन्यत्राज्ञातधर्माणामारोपो नैव सिद्ध्यति ।
यदि सिद्ध्येत्तदा सिद्ध्येत्कूर्मरोमादिविभ्रमः ।।

इत्यादिकं तु भाष्यादावेव सुस्पष्टमुक्तम् इति विस्तरभयान्नेह लिख्यते ।

यतीश्वरसरस्वतीसुरभिताशयानां मुदे
प्रसंगरणमण्डले विजयनार्थमेतन्मया ।
कृतं सुकृतिना सता स्वगणयाशनावलं
सुधृत्य विजयं शुभं भगवते प्रयच्छन्तु वै ।।

Colophon:

इति श्रीनैध्रुवकाश्यपगोत्रपवित्रेण श्रीमद्राघवसूनुना सकलविद्वच्चूडामणिना नरहरिनाम्ना विरचितो विशिष्टाद्वैतविजयवादः समाप्तः ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

1715 C – विशिष्टाद्वैतसिद्धान्तः ।

Beginning:

पूर्वः पक्षः ।

ये पुनर्निर्विशेषकूटस्थस्वप्रकाशनित्यचैतन्यमात्रं ब्रह्म ज्ञातव्यमिति वदन्ति, तेषां 'जन्माद्यस्य यतः' 'शास्त्रयोनित्वात्' 'तत्तु समन्वयात्' 'ईक्षतेर्नाऽशब्दम्' इत्यादि, 'जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च' 'भोगमात्रसाम्यलिंगाच्च' 'अनावृत्तिश्शब्दादनावृत्तिश्शब्दात्' इत्यन्तस्य सूत्रगणस्य ब्रह्मणो जगत्कारणत्वबहुभवनसंकल्परूपेक्षणाद्यनन्तविशेषणप्रतिपादनपरत्वात् सर्वं सूत्रजातं सूत्रकारेण उदाहृतम् । 'यतो वा इमानि भूतानि जायन्ते' 'तदैक्षत बहुस्यां प्रजायेय' इत्याद्यास्सर्वाः श्रुतयश्च न संगच्छन्ते । अथोच्येत - 'येनाऽश्रुतं श्रुतं ' इत्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय - 'यथा सोम्येकेन मृत्पिण्डेन' इति एकमृत्पिण्डारब्धघटशरावादीनां तन्मृत्पिण्डादनन्यद्रव्यतया तद्ज्ञानेन तेषां ज्ञाततेव, ब्रह्मज्ञानेन तदारब्धस्य कृत्स्नस्य चिदचिदात्मकस्य जगतस्तस्मादनतिरिक्तवस्तुतया ज्ञाततासम्भवतीत्युपपाद्य -'सदेव सोम्येदमग्र आसीत्' 'एकमेवाद्वितीयं' इति इदंशब्दवाच्यस्य ---------

End:

'बहु स्याम्' इति बहुभवनसंकल्पोपि नामरूपविभागानर्हसूक्ष्मचिदचिद्वस्तुशरीरकतया एकधावस्थितस्य विभक्तनामरूपचिदचिच्छरीरकतया बहुप्रकारताविषय इति वेदवित्प्रक्रिया इति सर्वं समंजसम् ।।

2140 B – विषयतावादः

Beginning:

जननावनलयहेतुं जगतः श्रीशं समाराध्य ।
नन्ता गुरुचरणाब्जेऽनन्तार्यो वक्ति विषयतावादम् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

इह खलु ब्रह्मविषयकज्ञानस्य मोक्षहेतुत्वेन ब्रह्मण इव विषयताया अपि अवच्छेदकत्वात् अवश्यं ज्ञातव्येति सा विचार्यते। विषयता नाम - ज्ञानविषययोः सम्बन्धविशेषः। ज्ञानविषयो घटः, 'ज्ञातो घटः' इत्यादिप्रतीतिसाक्षिको दुरपह्नवः। सा किं रूपेति चेत् ;अत्र ब्रह्मानन्दः। विषयता हि विषयेषु ज्ञानस्य तादात्म्यम्। ज्ञानं च वृत्त्यवच्छिन्न चैतन्यम्। असत्त्वापादकाज्ञानाविषयत्वप्रयोजकत्वविशिष्टं वा चैतन्यम्। अज्ञानं तावत् द्विविधम्। एकमसत्त्वापादकमन्तःकरणावच्छिन्न-साक्षिचैतन्यनिष्ठम्। अन्यदभानापादकं विषयावच्छिन्नब्रह्मचैतन्यनिष्ठम्। 'घटमहं जानामि' इति उभयावच्छेदेनेह अनुभवात्। तत्र घटमिति विषयावच्छेदः। अहमिति साक्ष्यवच्छेदः।

End:

अत्र ज्ञानद्वारकव्याप्तेः सर्वज्ञत्वोपपादकतयोपात्तत्वात् संयोगादिरूपप्राप्तिरेव विषयतेति श्रुतेस्तात्पर्यमुन्नीयते। एतेन सर्वज्ञत्वस्य सर्वविषयकज्ञानवत्त्वरूपत्वे सर्वपदजन्यबोधवति बद्धपुरुषेऽतिप्रसक्तिः। प्रमेयत्वव्याप्यतत्तद्व्यक्तित्वावच्छिन्न-विषयताकज्ञानवत्त्वरूपत्वे प्रमेयत्वव्याप्यतत्तद्व्यक्तितावच्छिन्नेत्याद्युक्तवाक्यजन्य-बोधवति अतिप्रसंग इति परास्तम् इति प्राहुरिति निरवद्यम्।

Colophon:

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना।
अनन्तार्येण रचितो वादार्थोयं विजृम्भताम्॥
विषयतावादस्समाप्तः॥

2200 – विषयवाक्यदीपिका

Beginning:

अतसीगुच्छसच्छायमंचितोरस्स्थलं श्रिया।
अंजनाचलशृंगारमंजलिर्मम गाहताम्॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

व्यासं लक्ष्मणयोगीन्द्रं प्रणम्यान्यान्गुरूनपि ।
भाष्योदाहृतवेदान्तवाक्यार्थस्संप्रकाशते ।।
विस्तृतोपनिषद्भष्यप्रवेशाक्षमचेतसाम् ।
अनुग्रहेण साफल्यं कृतिरेषा प्रपत्स्यते ।।

'जन्माद्यस्य यतः' भृगुवल्ल्यां श्रूयते - 'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति, तद्विजिज्ञासस्व तद्ब्रह्मेति' । जीवन्ति- येनात्मभूतेन जीवन्तीत्यर्थः । प्रयन्ति सन्ति भूतानि यदभिसंविशन्ति, लीयमानानि सन्ति यदभिसंविशन्ति, यत्र लीयन्ते । समित्येकीकरणे । एकीकृततया प्रवेशः संवेशः। यद्वा, यत्प्रयन्तीति मोक्षः । अभिसंविशन्तीति प्रलयः । अस्मिन्पक्षे यच्छब्दस्यावृत्तिः । यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति इत्यत्र प्रतिवाक्यं तद्ब्रह्मेत्यनुक्तेः न जगज्जन्मादि प्रत्येकं लक्षणम् । प्रत्येकलक्षणत्वे लक्षणान्तरवैयर्थ्यप्रसंगाच्च । अतस्समुदितमेव लक्षणम् । न च जन्मादिसमुदायस्य लक्षणत्वे व्यावर्त्याभावेन निष्प्रयोजनत्वम् । लक्ष्याकारविपरीत- शंकानिवारणक्षमत्वेन सप्रयोजनत्वात् ।

End:

जगद्व्यापारवर्ज प्रकरणादसन्निहितत्त्वाच्च । बृहदारण्यके तृतीयाध्याये चतुर्थ- ब्राह्मणे - 'ब्रह्म वा इदमग्र आसीत् एकमेव तदेकं सन्नव्यभवत्' एकत्वादेव विवृद्धं नाभवत् । 'तत्क्षत्रं शरीरमत्यसृजत' क्षत्रं-क्षत्रियाख्यं श्रेष्ठं शरीरमसृजत् तदेव प्रपंचयति यान्येतानि देवत्राक्षत्राणीन्द्रोवरुण इत्यादि । देवत्रा-देवेषु । शिष्टं स्पष्टम्।

क्षेमाय यः करुणया क्षितानिर्जराणां
भूमावजृंभयत भाष्यसुधामुदारः ।
वामागमाध्वगवदावदतूलवातो-
रामानुजःसमुनिराद्रियतां मदुक्तिम् ।।

Colophon:

इति श्रीरंगरामानुजमुनेः कृतिषु श्रीभाष्योदाहृतोपनिषद्वाक्यविवरण समाप्तम् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

1756 – वेदान्तकौस्तुभः

Beginning:

श्रीमान्वेंकटनाथार्यःकवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ।।
प्रणामा मम गाहन्तां श्रीरंगगृहमेधिनम् ।
लक्ष्मीः प्रियतमा यस्य पुत्रा विधिशिवादयः ।।
अन्यत्रेशानता भ्रान्तिं वारयन्तमिवात्मनाम् ।
पाणिं श्रीरंगराजस्य स्मराम्यभयमुद्रितम् ।।
वक्षस्थले महति रंगपतेः स्फुरन्ता
पुष्णन्त्यभीप्सितफलैः प्रणतानशेषान् ।
सामोदनैक सुमनोगणसेवनीया
भद्राणि मे दिशतु काचन कल्पवल्ली ।।
जाता यद्वक्त्रचन्द्राद्वचननवसुधासारपारम्परी सा
सूते निर्धूतदोषाः विबुधपरिषदामप्रमादं प्रमोदम् ।
उद्‌गच्छन्त्या नता यत्पदसरसिजयोरुन्नते धाम्नि तस्मिन्
तन्यादन्यादृशा नः शठमथनमुनिस्सम्पदोघान् सदिव्यान् ।।
नानादुर्वादिवादाहवदहनमहावारिवाहो यदीयो
वाणीगुम्भो महीयानखिलजनभवाम्भोधिकुम्भीतनूजः ।
पातिव्रत्यं परस्मिन् परमुपनिषदां पुंसि पुष्णाति नित्यं
सोऽयं रामानुजार्यः श्रियमतिशयिनीं शान्तिधन्यां वितन्यात् ।।
काणादाः काणभावं कपिलमतविदः कश्मलं जैनवादाः
मौनं बौद्धाश्च प्रौढ्यं दधाति पशुपतिव्याहृतं व्याहतत्त्वम् ।
अग्रे यद्वाग्विलासभ्रममुदितहृदो यस्य कस्यापि पुंसो
भद्रं निर्निद्रमेशप्रदिशतु भवतां व्यासनामार्यवर्यः ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

जिह्वासिंहासनाग्र स्थितिरसिकहयग्रीवसाठोपहेशा
घोषून्मेषप्रनष्ठाखिलकुमतिगणाखर्वगर्वातिरेकः ।
संसाराम्बोधि मज्जत्सकलतनुभृदुज्जीवनैकान्तजन्मा
पायदस्मानपायादनवधि महिमा विष्णुघण्ठावतारः ।।

वेंकट्टेशगुरुं भक्त्या नमाम्यस्मत्पितामहम् ।
अनवद्यगुणैर्यस्य च्छात्रैः पृथ्वी परिष्कृता ।।

पुण्यायतस्मै परवस्तु नाम्ने कुर्वे प्रणामान् कुलदैवताय ।
वसुन्धरायां यदुपज्ञमिन्दे वेदान्तविद्यागुरुवाक्प्रपंचः ।।

अस्मद्देशिकमस्मदीयजनकं वन्दे दयाम्भोनिधिं
योऽसावादिवराहदेशिक इति ख्यातस्सतामग्रणीः ।
तातो यस्य जगद्गुरुर्विजयते श्रीवेंकटेशाह्वयो
जीवातुः निगमान्तदेशिकगिरां पात्रं गुणानां सताम् ।।

जयतु निगमचूडा पुण्डरीकाक्ष सक्तो
जयतु मनुमुखानां सूक्तिरस्पृष्टदोषा ।।
जयतु जगति वेदः पंचमः प्राज्ञसेव्यो
जयतु मुषितमोहो व्यासतातः प्रबन्धः ।।

आत्मैक्यं दैवतैक्यं त्रिकसमधिगता तुल्यदैक्यं त्रयाणां
अन्यत्रैश्वर्यमित्याद्यनिपुण फणितिरादृियन्ते नसन्तः ।
त्रय्यन्तैरेककण्ठैः तदनुगुण मनुव्यासमुख्योक्तिभिश्च
श्रीमान्नारायणो नः पतिरखिलतनुः मुक्तिदो मुक्तभोग्यः ।।

इत्यस्मद्देशिकाः प्राहुः दृष्ट्वा भावं त्रयी गिराम् ।
चक्षुष्मन्तो मनुव्यास पराशरमुखोक्तिभिः ।।
आचार्याणां प्रसादेन मीमांसाद्वयवारिधेः ।
पारंगत्वा मया तेषां भावं सम्यक् प्रकाशते ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अस्मद्देशिकसिद्धान्ते नव्यैः कैश्चिद्धताक्षमैः ।
उत्प्रेक्षित शिवोत्कर्षो भावः श्रुतिगिरामपि ।।
त्रय्यन्तदेशिककृपाबल लब्धबोधः
तन्नामरत्नवहनेन पवित्रितोऽहम् ।
प्राचीन्यतीन्द्रपदवीं तमुपेत्यशुद्धाम्
वाचालनव्य कुमतीन् व्यसनं नयामि ।।
तीक्ष्णैः न्यायायुधव्रातैः व्यासजैमिनिदर्शितैः ।
निहतं पश्यतःप्राज्ञाः कुदृष्टिजनजल्पितम् ।।
सत्तर्कादिप्रवरमधिगतादागमान्ताम्बुराशेः
जातः श्रीमान् प्रशमिततमाः कौस्तुभो वाङ् मयोऽयम् ।
जीयाल्लक्ष्मीरमणहृदयं रंजयन् आयुगान्तं
प्रीयन्तां मे यतिपतिमुखादेशिकाश्चास्मदीयाः ।।

इह खलु भगवान् श्रियःपतिः स्वभावतो निरस्तनिखिलदोषः अनवधिकातिशय असंख्येयकल्याणगुणगणः सर्वेश्वरः परमकारुणिकः अपारदुस्तरभवपयोधिनिमग्नान् पुरुषानुद्दिधीर्षुःअतिगहनगम्भीरवेदान्तबृन्दोपदर्शितपरतत्त्वपरमहितपरमपुरुषार्थ-गोचरविशदप्रतिपत्तिं प्रापय्यताननुग्रहीतुकामः श्रीमत्तः पराशरात् कृष्णद्वैपायन-रूपेणावतीर्य वेदान्तस्य इतिकर्तव्यताभूतं शारीरकं शास्त्रं निबबन्ध ।

End:

अर्धालकमवस्त्रार्धमस्त्युत्पलदलस्रजम् ।
अर्धपुंलक्षणं वन्दे पुरुषं कृष्णपिंगलम् ।।

इति भविष्यत्पुराणवचनेन कृष्णपिंगलशब्दस्य उमा शाबल्यपरत्वेन विवरणात् 'विरूपाक्ष विश्वरूप श्रुतिभ्यां नमस्कुर्यान् महादेवं श्रुतं सत्यमितीश्वरम्' इति कौर्मे शिव--

Colophon:

इति श्रीवत्सजलधिकौस्तुभ वैदिकसार्वभौमवेदान्तदेशिकपरवस्तु वेदान्त-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

देशिकसुकृत परिपाकवेदान्ताचार्यानुज श्रीमदादिवराहाचार्यतनयस्य तच्चरणारविन्दचंचरीकस्य तत्प्रसादलब्धब्रह्मविद्यावैशद्यस्य कोनेटयाम्बागर्भसम्भवस्य निजहृदयकमलविहरमाण श्रीरंगराजप्रेरितस्य वेदान्ताचार्यस्य कृतिषु वेदान्तकौस्तुभे द्वितीयपरिच्छेदः ।।

121 – वेदान्तदीपः

Beginning:

श्रियः कान्तोनन्तो वरगुणगणैकास्पद वपुः
हताशेषावद्यः परमपदो वाङ् मनसयोः ।
अभूतिर्भूमिर्योनतजनदृशामादिपुरुषो
मनस्तत्पादाब्जे परिचरणसक्तं भवतु मे ।।
प्रणम्यशिरसाचार्यास्तदाधिष्ठेन वर्त्मना ।
ब्रह्मसूत्रपदान्तस्थ वेदान्तार्थः प्रकाश्यते ।।

अत्रेयमेवहि वेदविदांप्रक्रिया - अचिद्वस्तुनः स्वरूपतस्वभावतश्च अत्यन्तविलक्षणस्तदात्मभूतचेतनः प्रत्यगात्मा । तस्मान् बद्धान्मुक्तान्नित्याच्च निखिलहेयप्रत्यनीकतया, कल्याणगुणैकताननतयाच सर्वावस्थचिदचिद्व्यापकतया, धारकतया, नियन्तृतया, शेषितयाच अत्यन्तविलक्षणः परमात्मा ।

End:

इदं ज्ञानमुपाश्रित्य ममसाधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलयेन व्यथन्ति च ।।

इति शब्दादेवैनं कदाचिदपि नावर्तयतीत्यवगम्यते । सूत्रावृत्तिः शास्त्रसमाप्तिं द्योतयति इति सर्वं समंजसम् ।

Colophon:

इति भगवद्रामानुज विरचिते वेदान्तदीपे चतुर्थस्याध्यायस्य चतुर्थःपादः ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

504 – वेदान्तदीपः

Beginning:

श्रीश्रीनिवासकृपया विनयादियुक्तम्
श्रीपादुकास्तुतिजपेन पवित्रगात्रम् ।
आत्रेयवंशकुमुदस्य निशाधिनाथम्
श्री श्रीनिवासगुरुवर्यमहं प्रपद्ये ।।
योनित्यमच्युतपदाम्बुजयुग्मरुक्म
व्यामोहतस्तदितराणि तृणाय मेने ।
अस्मद्गुरोर्भगवतोस्य दयैकसिन्धोः
रामानुजस्य चरणं शरणं प्रपद्ये ।।

1796 C – वेदान्तन्यायमालिका

Beginning:

त्रय्यन्त चिन्तनस्वान्तचर्या पर्याय वेधसे ।
निष्कल्मषाय शेषाय गुरवे करवै नमः ।।
कर्म ब्रह्मात्मकं शास्त्रमेकं लोकहितं च यत् ।
तत्र कर्म विचारः प्राक् प्रोक्तः षोडशलक्षणः ।।
प्रमाणभेदशेषित्व प्रयुक्ति क्रमसत्फलै ।
अतिदेशद्वयाभ्यूह बाध तन्त्र प्रसंजनैः ।।
शेषसंकर्षतश्चैवं सांगं कर्म निरूपितम् ।
अथ तद्धेतुको ब्रह्मविचारः प्रतिपाद्यते ।।
समन्वयाविरोधाभ्यां साधनेन फलेन च ।
[illegible]

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

End:

तृतीये तत्प्रकारोक्तिस्सत्यसंकल्पकोत्तरे ।
शरीरत्वाशरीरत्वसंगतिः पंचमोदिता ।।
जगद्व्यापाररूपत्वं षष्ठे सम्यगुदीरितम् ।
चिन्मयी शब्दितन्यायैः सर्वं शास्त्रं समापितम् ।

Colophon:

इति श्रीशैलवंश्येन श्रीनिवासविपश्चिता ।
निर्मिता विदुषां प्रीत्यै वेदान्तन्यायमालिका ।।

2309 A – वेदान्तरत्नमाला (सव्याख्या)

Beginning:

-------- श्रितानामगणितगुणकोशो ---- ---------भावी ।
चिदचिदधिपतिर्यो रंग --- आद्यो ---मम चित्ते श्रीविवासो मुकुन्दः ।।
असुरकुलनिहता पुण्यकीर्तितसुधीश-
मनुकुलतिलकोऽसौ रामचन्द्रः----- ।
--- करकमलान्यां लालितश्रीपदाब्जो
विलसतु मम चित्ते भूमिजाभूषणश्रीः ।।
श्री श्रीनिवासदासेन श्रीयतीन्द्रकृपालुना ।
वेदान्तरत्नमालेयं श्रीरंगायार्प्यते मया ।।
श्रीश्रीनिवासदासेन नत्वा श्रीलक्ष्मणं मुनिम् ।
वेदान्तरत्नमालालंकारादर्शो विरच्यते ।।
श्रीभाष्यकारवाक्यानां संग्रहः क्रियते मया ।
---------------- क्षम्यन्तां मम साहसम् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

'अथातो ब्रह्मजिज्ञासा '।

क्रियाफलक्षयिष्णुत्वात् ब्रह्मज्ञानफलाक्षयात् ।
अथातो ब्रह्मजिज्ञासा कर्तव्यात्र मुमुक्षुभिः ।।

क्रियाफलेति केवलकर्मणां क्षयिष्णुत्वं दर्शयन्ति श्रुतयः- 'तद्यथेह कर्मचितो लोकः क्षीयते, एवमेवामुत्र पुण्यचितो लोकः क्षीयते ' 'अन्तवदेवास्य तद्भवति' 'नह्यध्रुवैः प्राप्यते हि ध्रुवं तत्' 'परीक्ष्य लोकान् कर्मचितान् ब्रह्मणो निर्वेदमायात् नास्त्यकृतःकृतेन' -------- तथा ब्रह्मज्ञानस्याक्षयफलत्वं 'ब्रह्मविदाप्नोति परम्' -----पश्यति न पश्यो मृत्युं पश्यति, सस्वाराट् भवति' इत्यादयः श्रुतयो दर्शयन्तीति । अथ पूर्ववृत्तात् केवल------ अनन्तरं अतैव हेतोः ब्रह्मजिज्ञासा कर्तव्येति पूर्वोत्तरमीमांसयोः ऐकशास्त्र्यं वृत्तिकारवाक्येनोक्तम् ।

End:

यथा - 'यतो वा इमानि भूतानि जायन्ते', 'यः पृथिवीमन्तरोयमयति' इति शब्दात् परमपुरुषस्य स्रष्टृत्वं, नियन्तृत्वं च अवगम्यते । तथा एते 'स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसम्पद्यते, न च पुनरावर्तते' इत्यादि शब्दादेव मुक्तस्यानावृत्तिः अवगम्यते इति ।

श्रीमद्यतीन्द्रकरुणारसनिर्भरेण श्री श्रीनिवासवर------------ भव्या ।
वेदान्तरत्नरचिता वरदिव्यमाला श्रीरंगधामरमणोरसि या ----सेयम् ।।
श्रीरंगराजमुनिम्ना शरणागतानां श्रीरंगमंगलमहोत्सवलंपटानाम् ।
संसारभोगरस--- रसमानसानां स्वांध्य-- ब्रह्ममनसामिह यान्तनोतु ।।

Colophon:

इति श्रीगोवर्धनकृतवासानां वादि----म्बुदानाम् उभयवेदान्तप्रवर्तकानां श्रीमद्वेंकटाचार्याणां चरणारविन्दभ्रमरायमाणमानसेन------सूरिणा श्रीनिवासदासेन विरचितायां श्रीशारीरकवेदान्तरत्नमालायां चतुर्थाध्यायस्य चतुर्थः पादः ।

श्रीयतीन्द्रस्य कटाक्षोद्भवचेतसा । वेदान्तरत्नमालालंकारादर्शः कृतो मया ।।
इति श्रीवेदान्तरत्नमालालंकारादर्शे चतुर्थाध्यायस्य चतुर्थःपादः ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

2513 – वेदान्तवादार्थमाला

Beginning:

-------ते च ब्रह्मण्येव हि कल्पनाम् ।

अथ विंशतितमी ब्रह्मणस्सर्वहेतुत्वभाव-----चेदिति----स्वभावे हि सर्वस्य------रज्जुसर्पादिहेतुत्वं -----नाधिक्ये नावगच्छन्ति विद्वांसो व्यवहरन्ति च ।

कारणत्वश्रुतीनां हि संकोचास्मन्मतो भवेत् ।
गुणसत्यत्ववचसां त्वन्मते बाध्यता भवेत् ।।
न च संकोचवात्मापि गुणानां नित्यतैव हि ।
प्रजाधीनेति वचनप्रामाण्यात् परिगृह्यते ।।
अपृच्छे------------ निषेधगतिवर्णनात् ।
व्यावहारिकसत्यत्वलाघवान्ते निरासतः ।।
गुणास्सत्यत्वयुक्तानां प्रसंगात् कारणे सति ।
तस्मात् ब्रह्मण ----------------------- ।।
------------- ---सत्यं इति सिद्धान्तनिर्णयः ।
कथा चात्र प्रयोगस्स्यात् सत्यादब्रह्मणा इति ।।
गुणब्रह्मान्योन्यभावादुक्तिश्च प्रतिपादिता ।
इति स्यादविंशतितमो विशिष्टाद्वैतवादिनाम् ।।

End:

तथानन्दमयं जीवमुक्त्वा ब्रह्म ततोवदत् । षष्ट्यान्यस्यविज्ञान----साध्यत्वसंगतेः।।
एवमादिभिरात्मैव स्यादानन्दमयाभिधः । उपक्रमोपसंहारादि----युक्तमेवमुदीरितम् ।।

ततो मदनुमान---------------------------- ।
इति कक्ष्यपंचमी स्यात् मिथ्या वेदा ---------- ।।

Colophon:

इति जीवब्रह्मभेदवादः ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

343 – वेदान्तसारः

Beginning:

समस्तचिदचिद्वस्तुशरीरायाखिलात्मने ।
श्रीमते निर्मलानन्दोधन्वते विष्णवे नमः ।।

परमपुरुषप्रसादात् वेदान्तसारः उद्धीयते । 'अथातो ब्रह्मजिज्ञासा' । अत्रायमथ-शब्दः आनन्तर्ये वर्तते । अतश्शब्दशिरस्कत्वात् । अतश्शब्दश्च पूर्ववृत्तस्य हेतुभावे। पूर्ववृत्तं च कर्मज्ञानमिति विज्ञायते । आरीप्सितस्य ब्रह्मज्ञानस्य वेदार्थ-विचारैकदेशत्वात् ; अधीतवेदस्य हि पुरुषस्य कर्मप्रतिपादनोपक्रमत्वात्, वेदानां कर्मविचारः प्रथमं कार्य इति 'अथातो धर्मजिज्ञासा' इत्युक्तम् । कर्मणां च प्रकृति-विकृतिरूपाणां धर्मार्थकामरूपपुरुषार्थसाधनतानिश्चयः - 'प्रभुत्वादार्त्विज्यम्' इत्यन्तेन सूत्रकलापेन संकर्षणेन कृतः । एवं वेदस्यार्थपरत्वे कर्मणां च तदर्थत्वे तेषां च केवलानां त्रिवर्गफलत्वे निश्चिते सति वेदैकदेशभूतवेदान्तभागे केवलकर्मणां अल्पास्थिरफलत्वं ब्रह्मज्ञानस्य च अनन्तस्थिरफलत्वं आपाततो दृष्ट्वा अनन्तरं मुमुक्षोः अवधारितपरिनिष्पन्नवस्तुबोधजननशब्दशक्तेः पुरुषस्य ब्रह्मबुभुत्सा जायते इति 'अथातो ब्रह्मजिज्ञासा' इति, कर्मविचारानन्तरं तत एव हेतोः ब्रह्मविचारः कर्तव्य इत्युक्तं भवति ।

End:

अनावृत्तिश्शब्दादनावृत्तिश्शब्दात् । 'स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकं अभिसम्पद्यते न च पुनरावर्तते' इति शब्दात् निवृत्तसमस्ततिरोधानाविर्भूतापहत-पाप्मत्वादिगुणगणः अनवधिकातिशयानन्दं परं ब्रह्मानुभवति, नच पुनरावर्तते इति निश्चीयते इति । सर्वं समंजसम् ।

Colophon:

इति श्रीभगवद्रामानुजविरचितवेदान्तसारे चतुर्थाध्यायस्य चतुर्थःपादः ।
।। समाप्तश्चाध्यायः ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

59 – वेदार्थसंग्रहः

Beginning:

शुभमस्तु । निर्विघ्नमस्तु । हरिः ओम् ।

अशेषचिदचिद्वस्तुशेषिणे शेषशायिने ।
निर्मलानन्तकल्याणनिधये विष्णवे नमः ।।

परं ब्रह्मैवाऽज्ञं भ्रमपरिगतं संसरति तत्
परोपाध्यालीढं विवशमशुभस्यास्पदमिति ।
श्रुतिन्यायापेतं जगति विततं मोहनमिदं
तमो येनापास्तं स हि विजयते यामुनमुनिः ।।

अशेषजगद्धितानुशासनश्रुतिनिकरशिरसि समधिगतोऽयमर्थः । जीवपरमात्मयाथात्म्यज्ञानपूर्वकवर्णाश्रमधर्मेतिकर्तब्यताकपरमपुरुषचरणयुगलध्यानार्चनप्रणामादिः अत्यर्थप्रियः तत्प्राप्तिफलः अस्य जीवात्मनोऽनाद्यविद्यासंचितपुण्यपापरूपकर्मप्रवाहहेतुकब्रह्मादिसुरनरतिर्यक्स्थावरात्मकचतुर्विधदेहप्रवेशकृततत्तदात्माभिमानजनितावर्जनीयभवभयविध्वंसनाय, देहातिरिक्तात्मस्वरूप-------- ।

End:

यथोक्तं भगवता द्वैपायनेन मोक्षधर्मे, सर्वोपनिषद्व्याख्यानरूपम् -

न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् ।
भक्त्या च धृत्या च समाहितात्मा ज्ञानस्वरूपं परिपश्यतीह ।।

धृत्या समाहितात्मा भक्त्या पुरुषोत्तमं पश्यति-साक्षात्करोति-प्राप्नोतीत्यर्थः । 'भक्त्या-त्वनन्यया शक्यः' इत्यनेनैकार्थ्यात् । भक्तिश्च ज्ञानविशेष एवेति सर्वं उपपन्नम् ।

सारासारविवेकज्ञाः गरीयांसो विमत्सराः ।
प्रमाणतन्त्रास्सन्तीति कृतो वेदार्थसंग्रहः ।।

Colophon:

इति श्रीमद्भगवद्रामानुजविरचितोऽयं वेदार्थसंग्रहः समाप्तः ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

1055 A – वैकुण्ठस्तवव्याख्या

Beginning:

योनित्यमच्युतपदाम्बुजयुग्मरुक्म-
व्यामोहतस्तदितराणि तृणाय मेने ।
अस्मद्गुरोर्भगवतोस्य दयैकसिन्धो
रामानुजस्य चरणौ शरणं प्रपद्ये ।।

व्याख्या- यो भगवान् रामानुजः , नित्यं अच्युत पदाम्बुजयुग्ममेव व्यामोहतः रुक्मं - स्वर्णं भोग्यमिति यावत् । तत्र व्यामोहतः- अभिनिवेशादित्यर्थः । तदितराणि वस्तूनीति शेषः । प्रयोजनान्तराणीति यावत् । तृणाय मेने, तृणवद्---अमन्यत । ---- इत्यादिना चतुर्थी । दयैकसिन्धोः- एकशब्देन --- गुणान्तरेभ्यो दयायाः प्राचुर्यं सूच्यते । अत एव अस्मद्गुरोः कृपामात्रप्रसन्नाचार्य इति । भगवतः कल्याणगुणगण --- कस्य चरणौ शरणं अनिष्टनिवृत्तिपूर्वकेष्टप्राप्तिसाधनं प्रपद्ये ।

End:

हे वरद !वरं श्रेष्ठं पुरुषार्थ इत्यर्थः अनेन सिद्धोपाय ------ । ----- वेधसं - ------विद्युक्तसमस्तसाधनानुष्ठान ------रहसि इतरान् न रक्षसि --- । यत् एण - --तर्हि तदा त्वमेव मयि शक्त्यधिकारा ---शक्तिभ्यां तत्कार्ये उद्योगानुष्ठाने लक्ष्यते। प्रत्युत ---- किं विघ्नशमनं इतरद्विश्वं च अंगोपांगवृत्तिरूपमन्यत्सर्वं च विधेहि । अत्र 'सुदुष्करेण शोचेद्यो-----नेष्टहेतुना सह । तस्याहमेवेति----चरमश्लोक संग्रहः' इत्यभियुक्तोक्तिरनुसन्धेया ।।

3118 B – वैकुण्ठस्तवव्याख्या

Beginning:

श्रीवाधूलकुलोद्भूतं वरदार्यं समाश्रये ।
यदपांगानुषंगेण ममापि विमलं मनः ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रीमान् शेषाचलाचार्य श्रेयांसि विधातु नः ।
यस्य सर्वेषु --------------- भजते मतिः ।।
श्रीमद्रामानुजगुरूं चिन्तयामि निरन्तरम् ।
विद्याजन्म च मे ---------पावने ------ ।।
तदनुज्ञावशेनेह सप्तस्तवपयोनिधिम् ।
अवगाह्यो --------------- महद्विषयः ।।
यदि सप्तस्तवव्याख्यो मध्ये ----- भवेत् ।
स्खलनन्तत् क्षमालक्ष्मीं कुर्युरार्या ------ ।।
अनपेक्षितविक्षेपसंक्षेपोपेक्षितस्य च ।
ग्रन्थव्य---------तथैव हि विधीयते ।।
श्रीवत्सचि -------------------------- ।
वैकुण्ठस्तवस्ताविल्लिख्यते व्याख्यया सह ।।

इह खलु भगवद्रामानुजनिर्हेतुककटाक्षनिरन्तरपात्र ---- समधिगतकुलवृत्यन्त-तत्त्वार्थसंजातश्रीवत्सांकमिश्रान्वंशस्यैकायत्तचित्ततया-----जनसमुज्जीवनाय पंचस्तव-व्याजेन भगवत् (भाष्यकारोपदिष्टं) सांप्रदायिकं वेदान्तराळचिन्तनीयमर्थं------- श्रीवैकुण्ठनाथविषये श्रीवैकुण्ठस्तवे 'भगवद्वन्दनं स्वाद्यगुरुवन्दनपूर्वकं ' इति न्यायेन भगवद्रामानुज ----- रूपं मंगलं निबध्नन्ति ।

End:

ब्रह्मविदां तत्त्वनिर्णयोपायप्रकारमाह -

रूपश्रिया परमया परमेण धाम्ना
चित्रैश्च कैश्चिदुचितैर्भवतश्चरित्रैः ।
चिह्नैरनिह्नवपरैरपरैश्च कैश्चित्
निश्चिन्वते त्वयि विपश्चित ईशितृत्वम् ।।

विपश्चितः-ब्रह्मविदः, विविधं पश्यत् चित्त्वं विपश्चित्त्वं इति निर्वचनम् । स्वरूपतस्वभावतश्च तत्त्वत्रयमपि विविच्य जानन्त इति निष्कृष्टार्थः । भवतः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

परमया रूपश्रियारूपस्य स्वरूपस्य विग्रहस्य वा श्रिया उभयत्र प्रमाणं 'तस्य भासा सर्वमिदं विभाति' ।

दिविसूर्यसहस्रस्य भवेद्युगपदुत्थिता ।
यदि भास्सदृशीसा स्यात् भासस्तस्य महात्मनः ।। इति ।।

परमेण धाम्ना स्थानेन 'आदित्यवर्णन्तमसः परस्तात्' 'तदक्षरे परमे व्योमन्' 'योऽस्याध्यक्षः परमे व्योमन्' इत्यादि ।

2324 – शतदूषणी

Beginning:

समाहारस्साम्नां प्रतिपदमृचां धाम यजुषां लयः प्रत्यूहानां लहरिविततिर्बोधजलधेः।
कथादर्पक्षुभ्यत्कलिकथककोलाहलभवं हरत्वन्तर्ध्वान्तं हयवदनमीडीमहिमः ।।

इदम्प्रथमसम्भवत्कुमतिजालकूलंकषाः
मृषामतविषानलज्वलितजीवजीवातवः ।
क्षरन्त्यमृतमक्षरं यतिपुरन्दरस्योक्तयः
चिरन्तनसरस्वती चिकुरबन्धसैरन्ध्रिकाः ।।
प्राचीमुपेत्य पदवीं यतिराजदृष्टां
तत्सन्निकृष्टमपि वा मतमाश्रयन्तः ।
प्राज्ञा यथोदितमिदं शुकवत्पठन्तः
प्रच्छन्नबौद्धविजये परितो यतध्वम् ।।
वादाहवेषु निर्भेत्तुं वेदमार्गविदूषकान् ।
प्रयुज्यतां शरश्रेणी निशिता शतदूषणी ।।

तत्र तावत् शास्त्रारम्भे -

विचारविषयत्वेन सूत्रकृत् यदसूत्रयत् ।
परोक्ता ब्रह्मशब्दस्य वृत्तिरत्र निरस्यते ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

निर्विशेषब्रह्मवादे ब्रह्मशब्दस्य क्वचिन्मुख्यवृत्तत्वमस्ति वा । न चेत् असाधुत्वापत्तिः ।।

End:

उक्तं च संवित्सिद्धौ

'स्वैः स्वैर्व्यवस्थितैः रूपैः पदार्थानां तु या स्थितिः ।
सा सत्ता न स्वतन्त्रा स्यात् तत्राद्वैतकथा कथम्' ।। इति ।

पारतन्त्र्यभ्रमोऽयमिति चेत् -स किं सत्ताया, उत सतः? आद्ये विरोधः, सतां हि भावः सत्ता । द्वितीयेऽपि विरोधः । न हि सतां स्वधर्मभूता धीरस्ति । न चैतावता तेषामैक्यसिद्धिः ।

अपि च जीवैक्यं सत्यम्, मिथ्या वा? पूर्वत्रापसिद्धान्तः ; अविद्या-तत्संबन्धिजीवभावतदेकत्वादीनां मिथ्यात्वाभ्युपगमात् । उत्तरत्र जीवबहुत्वमपि तथैवेति किमन्यत्पक्षपातेन तत्साधनेन वा ? प्रतीत्यनुसारेण जीवभेदपक्षे वा किं न पतसि ? न च जीवैक्यं प्रातिभासिकम् ; सर्वधीव्यवहारविरोधात् । नापि यौक्तिकम् ; धर्मधीविरोधात् । प्रवृत्त्यादिभेदैर्हि परानुमानम् । न च स्वात्म(स्वाप्नपराऽत्म) धीन्यायः; 'वैधर्म्याच्च न स्वप्नादिवत्' इति सूत्रोक्त ---- ।

Colophon:

इति शतदूषण्यां सत्यासत्त्वविवेकः षष्टितमः ।।

2385 – शतदूषणीव्याख्या (चण्डमारुतम्)

Beginning:

विश्वं बिभ्रति वीर्यखण्डितमहादैत्ये समस्तात्मनि
ज्योतिर्मण्डलभासितत्रिभुवने सर्वे स्वतो द्रष्टरि ।
अस्तुश्रीनृहरौ स्वभीतिविहितस्वाज्ञानिलार्कानले
---- श्रितमृत्यु-----चतुरे धीर्मे सदा ब्रह्मणि ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्रायश्छादयितुं विनम्रजनता नानापराधज्ञतां
वात्सल्यैकवशंवदेन कुहना निद्रां दधद्धर्मणा ।
--------------- पुळिनं रंगेशयं काशयत् ।
लक्ष्मीभूमिनिषेव्यमाणचरणं तत्त्वं परं मन्महे ।।

पद्मावीरुदुपाश्रयस्स्तबकितस्स्रग्भूषणास्त्रांबरैः
भास्वत् ---- पल्लवधरो दोस्कन्धविभ्राजितः ।
भक्तानाँफलितोर्थितैर्मरकतश्यामत्विषापत्रळो
भद्रा यस्तु मुकुन्द (कल्प) विटपी शेषाद्रिसंगी स नः ।।

------ ---------कमलया नित्यानपायर्धये
भक्तानामभिलाषपूरमखिलान् संवर्धुकायार्थितान् ।
वेतंडाचलशृंगसंगिवपुषे भव्याय ----------
जीमूताय चतुर्मुखाध्वरफलीभूताय तस्मै नमः ।।

चरणयुगळमेव यस्य लब्ध्वा धनमनपायि सुनिर्वृता महान्तः ।
तृणमिव विजहुः पुरान्यदर्था -------- घटिकाधराधरेन्द्रः ।।

सीदन्तीनां श्रुतिपरिषदां साधुतत्त्वावबोधे
पीडां लुंपन्कुमतिकलितां भाष्यपीयूषवर्षैः ।
विश्वत्राणे हरिमभि ------ कामं वितन्वन्
------- दस्मान्यतिपरिबृढश्श्रेयसामेकसूतिः ।।

तुरगवदनतेजो + लम्भितो रंगभर्त्रा ।।

अव्याजसौहृद + गुरुवेषमहं भजामि ।।

वेदान्तार्योक्तिभावं + श्रीनिवासार्यचेतः ।।

क्व वेदान्ताचार्यः + गिरां तस्य विवृतौ ।।

चिकीर्षितस्य ग्रन्थस्य कुदृष्टिजनोद्भावितचित्तान्धतमसविध्वंसनार्थत्वात् तस्य च तत्त्वज्ञानद्वारकत्वात् तत्त्वज्ञानस्य च भगवत्प्रसादात्-----तेन विना स्वग्रन्थेनापि

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

उत्पादयितुमशक्यत्वाच्च छात्रानुजिघृक्षया तेषु तत्त्वज्ञानोत्पादनद्वारा कुदृष्टिजन-संधुक्षितान्धतमसविध्वंसनं भगवन्तं प्रार्थयते - समाहार इति ।

End:

अस्तु वाङतिरिक्तोऽपि सत्यः कश्चित्प्रकाशः, तथापि तस्य पूर्वोक्त-स्वतस्त्वौपाधिकत्वविकल्पायोगात् बाह्यानुभवायोगः, तदभावे च प्रतिभाधीनसत्ताका न बाह्यानुभवलक्षणभेदाः, तदभावे चानुल्लेखपक्षः परिशिष्यते, स च दूषित एवेत्याह-सिद्धावपीति, दुरन्तम् - व्यवसनमिति शेषः ।

Colophon:

इति श्रीवाधूलकुलतिलकश्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्वयाथात्म्येन तदेकदेयतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्धमहाचार्यापरनामधेयेन रामानुजदासेन विरचितायां शतदूषणीव्याख्यायां, चण्डमारुताख्यायां बाह्यप्रकाशानुपपत्तिः ।।

1742 – शतदूषणीव्याख्या (नृसिंहराजीयम्)

Beginning:

श्रियैस्सततमस्तु मे भुजगराजशैलाधिपः
श्रियं वहति वक्षसा श्रितजनैकरक्षाकरः ।
दयासहचरस्सदा विहितवाजिवक्त्राकृतिः
जगज्जननरक्षणक्षपणकेळिदीक्षागुरुः ।।

ऋषीणां सप्तानां सुकृतपरिपाकेन महता
समाविर्भूतोऽयं महति घटिकाशैलशिखरे ।
महाचार्याद्यान्यैरमरगुरुकल्पैरधिगतः
स नः श्रेयोदेयादमृतफलवल्लीसहचरः ।।

प्रारीप्सितस्य ग्रन्थस्य अविघ्नपरिसमाप्तिप्रचयगमनार्थं शिष्टाचारप्राप्तम्

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

इष्टदेवताप्रार्थनात्मकं मंगलं शिष्यशिक्षायै निबध्नाति - समाहार इति ।

End:

ननु कर्ममूलत्वाभावे सुखाद्यवस्थापि न स्यादित्याह - आगमिके चेति । 'स एको ब्रह्मण आनन्दः' 'लोकवत्तु लीलाकैवल्यम्' इत्यादिश्रुतिसूत्रादिभिर्निर्णीतेऽर्थे शुष्कतर्कस्यानवतारात्सुखमात्रे न कर्ममूलत्वमिति भावः ।

Colophon:

इति शतदूषणीव्याख्यायां संविन्निर्विकारत्वानुभंगो द्वाविंशः ।।

2540 C – शरीरवादः

Beginning:

श्रीकान्तकान्तपदपंकजसौरभश्रीपारीणचित्तनिभणट्चरणः प्रवीणः ।
श्रीलक्ष्मणार्यमभिवन्द्य शरीरवादं सारार्थसंगतमनन्तसुधीर्विधत्ते ।।

(इह) तावच्छरीरशब्दप्रवृत्तिनिमित्तं विचार्यते । शरीरपदप्रवृत्तिनिमित्तभूतं शरीरत्वं हि न तावज्जातिः ; प्रमाणाभावात्, न च 'इदं शरीरमिदं शरीरम्' इत्याद्यनुगत प्रतीतेरेव तत्साधिका, अनुगतप्रतीतेर्बाधकविरहे जातिसाधकत्वादिति वाच्यम् । सिद्धान्ते अनुगतप्रतीतेः संस्थानविषयकत्वेन तदतिरिक्तजातिसाधकत्वासम्भवात् । न च संस्थानस्यावयवसंयोगादिरूपत्वेन प्रतिव्यक्तिभिन्नत्वात्कथमनुगतप्रतीति-विषयत्वमिति वाच्यम् ।

End:

'अथ तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वा---- शरीरदेशेभ्यः' इत्युत्क्रान्तिप्रतिपादकश्रुत्या, 'ये वैके चास्माल्लोकात्प्रयन्ति, चन्द्रमसमेव ते सर्वे गच्छन्ति' 'तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे' इति गत्यागतिप्रतिपादकश्रुतिभ्यां च ---- रूपक्रियानुकूलकृतेरेव आत्मनि बोधेऽपि --- स्वरूपासिद्धिः इति चेन्न । नैयायिकादिनये उत्क्रान्त्यादिकाले शरीराभावेन निष्क्रामतीत्यादिना 'रथो गच्छति

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

इत्यादिवत् क्रियाश्रयत्वस्यैव बोधावश्यकतया क्रियावत्वरूपहेतोः आत्मनि सिद्धेरिति सूत्राभिप्रायात्। अधिकमन्यत्र विवेचितम् ।।

Colophon:

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ।।

2140 A – शास्त्रारम्भसमर्थनवादः

Beginning:

श्रीमाननन्तगुरुरेष + जलधेरकलंकचन्द्रम् ।।
हेतवे सर्वजगतां हेयपापाब्धिसेतवे ।
शान्ताय यादवगिरौ कान्तायास्तु नमः श्रियः ।।
श्रीमद्रामानुजार्यैः श्रुतिशिखरशिखाधाविमेधाविलासैः
प्रोद्यद्व्याहारगुम्भैर्विदलितकुमताडम्बरं तं भजामि ।
यद्भष्याम्भोधिगर्भप्रसृमरसुमहायुक्तिवीचीविहारा
वेलान्ते विक्षिपन्ति प्रतिकथकघटादूषणालीतृणानि ।।
मत्वा पूर्वगुरूणां सरणिं शेषार्यवंशवार्धीन्दुः ।
शास्त्रारम्भविचारं तनुते कुतुकादनन्तार्यः ।।

शास्त्रारम्भार्था चतुस्सूत्रीति सिद्धान्तः । अत्र शास्त्रशब्देन मीमांसा-शास्त्रैकदेशभूता शारीरकमीमांसा विवक्षिता । तेन चतुस्सूत्र्या विंशति-लक्षणीपूर्वत्वाभावेन विशिष्टशास्त्रारम्भार्थत्वासंभवेऽपि न क्षतिः ।

End:

एवं च- अविद्यानिवृत्तेरसत्त्वे पंचमप्रकारत्वे वा कालसम्बन्धित्वासम्भवात् कालसम्बन्धित्वघटितहेतुत्वं तस्या नोपपद्यत इति भावः - इत्याहुः । तस्मात् निष्प्रपंचीकरणनियोगवादस्यायुक्तत्वात् तादृशकार्यान्विततया वेदान्तानां ब्रह्मणि

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्रामाण्यमिति न युक्तमित्यादिकमन्यत्र प्रपंचितमिति दिक् ।।

Colophon:

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।

अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ।।

इति शेषार्यवंशमुक्ताफलस्य यादवाद्रिनिवासरसिकस्य अनन्ताचार्यस्य कृतिषु शास्त्रारम्भसमर्थनवादस्समाप्तः ।।

914 B – शास्त्रैक्यवादः

Beginning:

श्रीमद्वैनतेयाय नमः ।

निखिलभुवनहेतुं नित्यसेतुं भवाब्धे-

र्मुररिपुमभिवन्द्य श्रीयतीद्रं च नत्वा ।

परिचितगुरुधारागीरनन्तार्यवर्यैः

प्रथितविमलयुक्तिं वक्ति शास्त्रैक्यवादम् ।।

पूर्वोत्तरमीमांसायोरैकशास्त्र्यमिति तावत् संप्रदायः । ऐकशास्त्र्यं च एकग्रन्थत्वम्, एकवाक्यतापर्यवसितम् । साकांक्षत्वे सति एकार्थप्रतिपत्तिपरत्वम् । तथा च जैमिनीयवाक्यम् 'अर्थैकत्वादेकं वाक्यं साकांक्षं चेद्विभागे स्यात्' । तदुत्थाप्या-कांक्षानिवर्तकत्वतन्निवर्तनीयाकांक्षोत्थापकत्वान्यतररूपत्वमेव तत् साकांक्षत्वम् । प्रकृते च मीमांसापूर्वभागोत्थाप्यायाः आकांक्षायाः 'कर्माराध्यः कः' इत्याकारिकायाः 'कर्मांगकं किं' इत्याकारिकाया वा ब्रह्मविषयिण्याः तज्ज्ञानविषयिण्या वा आकांक्षाया विषयसिद्धिसम्पादनेन निवर्तकत्वमुत्तरभागस्येति निरुक्ततत्साकांक्षतानिर्वाहः ।

End:

तथा च जिज्ञासाधिकरणभाष्यम् - 'सत्यामपि विपरीतवासनायां आप्तोपदेश-लिंगादिभिः बाधकज्ञानोत्पत्तिदर्शनात्' इति । विपरीतवासनायां - तद्धर्मावच्छिन्न-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विशेष्यकाभावविषयकसंस्कारे बाधकज्ञानोत्पत्तिदर्शनात्, तद्धर्मावच्छिन्नविशेष्यक-प्रतियोगिप्रकारकज्ञानोत्पत्तिदर्शनात् इत्यर्थः । तस्मात् उक्तरीत्या वाक्यजन्यज्ञानस्य हेतुत्वासंभवात् कर्मांगकस्योपासनस्यैव मोक्षहेतुत्वेन ब्रह्मकाण्डप्रतिपाद्योपासनांग-भूतकर्मप्रतिपादकत्वात् कर्मकाण्डस्य ब्रह्मकाण्डेन ऐकशास्त्र्यं सिद्धमिति दिक् ।।

Colophon:

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोयं विजृम्भताम् ।।
इति शास्त्रैक्यवादस्समाप्तः ।।

979 B – श्रीगुणरत्नकोशः

Beginning:

श्रीपराशरभट्टार्यः श्रीरंगेशपुरोहितः ।
श्रीवत्सांकश्रुतश्रीमान् श्रेयसे मेऽस्तु भूयसे ।।
श्रियैः समस्तचिदचिद्विधानव्यसनं हरेः ।
अंगीकारिभिरालोकैः सार्थयन्त्यै कृतोंऽजलिः ।।
उल्लासपल्लवितपालितसप्तलोकी
निर्वाहकोरकितनेमकटाक्षलीलाम् ।
श्रीरंगहर्म्यतलमंगलदीपरेखां
श्रीरंगराजमहिषीं श्रियमाश्रयामः ।।
अनुकलतनुकांडालिंगनारम्भशुम्भत्
प्रतिदिशभुजशाखश्रीसखानोकहर्धिः ।
स्तननयनगुळुच्चस्फारपुष्पद्विरेफा
रचयतु मयि लक्ष्मी कल्पवल्ली कटाक्षान् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

End:

इत्युक्तिकैतवशतेन विडम्बयामि
तानम्बसत्यवचसः पुरुषान् पुराणान् ।
यद्वा नमे भुजबलं तवपादपद्म
लाभे त्वमेव शरणं विधितः कृतासीत् ।।
श्रीरंगे शरदश्शतं सहसुहृद्वर्गेण निष्कण्टकं
निर्दुःखं सुसुखं च दास्यरसिकां भुक्त्वा समृद्धिं पराम् ।
युष्मत्पादसरोरुहान्तररजस्यामत्यमम्बा पिता
सर्वं च त्वमपि त्वमेव भव नः स्वीकुर्वकस्मात् कृपाम् ।।

Scribe:

वाधूल श्रीनिवासेन वेंकटेशस्य सूनुना ।
अयं ------------ लिखितं -------- ।।

1210 A – श्रीगुणरत्नकोशव्याख्या

Beginning:

श्रीपराशरभट्टार्यः श्रीरंगेशपुरोहितः ।
श्रीवत्सांकसुतश्रीमान् श्रेयसे मेऽस्तु भूयसे ।।

श्रीपराशरभट्टारकः श्रीगुणरत्नकोशं करिष्यमाणस्सन् नमस्काररूपं मंगलं आदौ आचरति --- 'श्रियैः समस्तचिदचिद्विधानव्यसनं + कृतोऽञ्जलिः । इति । हरेः आश्रित दुरित ---- श्रीरंगनायकस्य समस्त चिदचिद्विधानव्यसनं - समस्तयोः निखिलयोः चिदचिदोः चेतनाचेतनयोः विधाने सृष्टौ व्यसनं परिश्रमं अंगीकारिभिः भवता ---- इत्यंगीकारिभिः आलोकैः - कटाक्षैः सार्थयन्त्यैः श्रियैः परिष्कारतया समस्तचेतनाश्रयिण्यार्यायैः लक्ष्मैः अंजलिः । ततः पुनस्तामेवाश्रयति - उल्लासपल्लवित + श्रियमाश्रयामः ।। इति ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

End:

-----आत्मनः प्रारब्धकर्मपर्यन्तं शरीरास्थितिमालोच्य स्व---- शेषं प्रार्थयते - - 'श्रीरंगे शरदश्शतं +स्वीकुर्वकस्मात् कृपाम्' । निष्कंटकादिपदत्रयं क्रियाविशेषणम्, रसिका दास्यरससमृद्धमिति यावत्, सुहृद्भिस्सह 'शतायुः पुरुषः' इति श्रुत्युक्त आयुरवसानपर्यन्तं दास्यमेव अनुभुज्य ततः परमपि युवयोः पादपद्मनिरता भवेम । अस्माकं मातापितृप्रभृति सर्वमपि सर्वज्ञ त्वमेव, तस्मात् अकस्मात् कृपा - निर्हेतुककृपां, अस्मद्विषये स्वीकुरुष्व इति सर्वं समंजसम् ।।

Colophon:

इति श्रीगुणरत्नकोशव्याख्यानं समाप्तम् ।।

1247 – श्रीगुणरत्नकोशव्याख्या

Beginning

श्रीमते रामानुजाय नमः

श्रीगुरु --------- पादसरोरुहं संविनतः

श्रीगुणरत्नकोशविवृतिर्वसुराश्यभिधाम् ।

श्रीनगदेशिकेन्द्रतनयश्शुभवात्स्यकुल-

श्रीयुतवीरराघवगुरुर्वितनोतितराम्।।

श्रीमत्कूरकुलपयःपारावारसुधाकरश्रीमद्रामानुजमुनीन्द्रकृपालब्धश्रीभाष्यादि-प्रबन्धपरिचयमहिमोल्लासबुद्धिः द्रविडोपनिषद्गभीरार्थविवरणश्रीरंगराजकमलापति-लालितः श्रीरंगनाथदिव्याज्ञालब्धपराशरभट्टारकनामधेयः कैशिकपुराणश्रवण-समुदितमहिमोल्लासभासुररंगरमणकरुणाप्रसाद (समासादित) ब्रह्मवैभवः यतिवर-चरणाम्भोरुहप्रवणान्तेवासिजनाग्रेसरकूरेशतनूभवसकलशास्त्र विदग्रेसरः श्रीभट्टाख्य-देशिकः निखिलजगदुदयविभव-- लीलाशालिभगवत्प्रापकभूतं श्रियं तत्कृत-महोपकारातिशयानुसन्धानेन---दयावात्सल्यादिगुणातिशयपरिशीलनेन(स्तोतुकामः)

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्रारीप्सितग्रन्थनिर्विघ्नपरिसमाप्त्यर्थं शिष्टाचारपरम्पराप्राप्तं मंगलमाचरन् तामेव स्तौति ।

End:

सर्वविधोपि बन्धस्त्वमेवेत्यर्थः । ननु मम सर्वबन्धुत्वेपि मत्प्राप्त्युपायाननुष्ठाने तव कथं मत्प्राप्तिसिद्धिः इत्यत आह - सर्वमिति, त्वमेव नः अस्माकं सर्वमपि धर्ममलौकिकश्रेयस्साधनं कर्मज्ञानभक्तिप्रपत्यादिकं भव । 'स्याद्धर्ममस्त्रियां पुण्यम्' इत्यमरः । सर्वधर्मस्थाने पुरुषकारतया त्वमेव सिद्धत्वात् सिद्धोपायेन भगवता मदिष्टं प्रापयेत्याशयः । त्वयि गुणलेशाभावे कथं मम तथाभाव इत्यत आह - स्वीकुर्विति । - अकस्मात् कृपां - निर्हेतुकदयां स्वीकुरु - (अंगीकुरुष्व) । मद्गुणलवनिरीक्षणे कृपायाः निर्हेतुकता न सिद्ध्येदिति तदनपेक्षमेव मामं रक्षयतीति भावः ।

Colophon:

इति श्रीवत्सकुलतिलकस्य श्रीमदहोबलाचार्यतनयतिरुमलाचार्यतनूभवस्य वाधूलभावनाचार्यचरणनलिनचंचरीकस्य श्रीमद्वाधूलशरण्याचार्यतनयरामानुजाचार्यप्रसन्नवेंकटाचार्यप्रसादलब्धवेदान्तयुगलविज्ञानवैशद्यकन्दाडैवीरराघवाचार्यस्य कृतिषु श्रीगुणरत्नकोशव्याख्यानं सम्पूर्णतामगमत् ।।

999 B – श्रीतत्त्वसिद्धांजनम्

Beginning

श्रीरंगनाथगुरुपादसरोजहंसं वेदान्तदेशिकपदाम्बुजभृंगराजम् ।
श्रीमद्यतीन्द्रशठकोप ---- वेदान्तलक्ष्मणमुनिं शरणं प्रपद्ये ।।

अस्येशानेति निस्सीमसमृ ---शो यः ।
पौरुषे सूक्त उक्तस्तौ दम्पती भजे ।।
----बाह्वर्यामुपनिषंचि ----यच्च घुष्यत ।
जगता जनकौ शेषिदम्पती मामकौ गती ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सेनैशाद्यैश्वरी गौणी कृ ---- चार्या यदैश्वरीम् ।
स्वोत्कृष्टावधिशून्येति व्याचख्युः श्रीर्जयत्यसौ ।।
तत्र नानामतिक्षोभतिमिरौघैरुपप्लुते ।
आलोकसिद्ध्यै श्रीतत्त्वसिद्धांजनमुदन्यते ।।

End:

----- देव्या मुख्यैश्वरत्वविवक्षया सर्वावस्थैः --- सपत्नीकानिति तस्या सर्वावस्था ---- निर्दिष्टे दण्डधरत्वस्यापि प्रसक्त्या तस्या मातृत्वपुरुषकारत्वादि-विरोधो दण्डधरत्वभावे सर्वकार्यहेतुत्वाभावेन मुख्येश्वरत्वासिद्धित --- शंकायां तत् परिहारार्थमियं विभागोक्तिरिति सम्यक्प्रयोजनमस्ति । दण्डधरत्वं भगवत एव भाग इति देव्यास्तदभावान्न मातृत्वादिविरोधः । दण्डधरत्वाभावश्च न-------- तत्र प्राप्त्य-------- भावकृतः । अपि तु यथा लोके प्राप्ति --- शिष्टत्वेऽपि दम्पत्योर्यथोचित------ भागमात्रं क्रियते तद्वदत्रापीति दण्डधरत्व --- एव ।।

160 – श्रीभाष्यम्

Beginning

---- तस्यास्सर्वपुरुषसाधारणत्वात् सर्वाणि कर्माणि सर्वेषां भोगाय स्युः । नैव वा कस्यचित् । आत्मनो विभुत्वाभ्युपगमात् सन्निधानमपि सर्वेषामविशिष्टम् । अत एव चान्तःकरणादीनामपि नियमो नोपपद्यते । यदायत्ताव्यवस्था स्यात् । 'शक्ति-विपर्ययात्'(2-3-37) बुद्धेः कर्तृत्वे कर्तुरन्यस्य भोक्तृत्वानुपपत्तेः भोक्तृत्वशक्तिरपि तस्या एव स्यादित्यात्मनो भोक्तृत्वशक्तिः हीयेत । भोक्तृत्वं च बुद्धेरेव सम्पद्यत इति आत्म- सद्भावे प्रमाणाभावश्च स्यात् । पुरुषोऽस्ति भोक्तृभावादिति हि तेषामभ्युपगमः ।

'समाध्यभावाच्च' (2-3-38) बुद्धेः कर्तृत्वे मोक्षसाधनभूतसमाधावपि सैव कर्त्री स्यात् । स च समाधिः प्रकृतेरन्योऽस्मि इत्येवंरूपः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

End:

'उपस्थितेतस्तद्वचनात्' - उपस्थितिः - उपस्थानम्, ब्रह्मोपसंपत्तिः । उपस्थिते ब्रह्मोपसम्पन्ने सर्वबन्धविनिर्मुक्ते स्वेनरूपेणाभिनिष्पन्ने प्रत्यगात्मनि अत एव उपसम्पत्तेरेव हेतोः सर्वेषु लोकेषु कामचार उच्यते । 'परं ज्योतिरुपसंपद्य स्वेन-रूपेणाभिनिष्पद्यते, स उत्तमः पुरुषः । स तत्र पर्येति ---- '

180 – श्रीभाष्यम्

Beginning:

अखिलभुवनजन्मस्थेमभंगादिलीले
विनतविविधभूतव्रातरक्षैकदीक्षे ।
श्रुतिशिरसिविदीप्ते ब्रह्मणि श्रीनिवासे
भवतु मम परस्मिन् शेमुषी भक्तिरूपा ।।
पाराशर्यवचस्सुधामुपनिषद्दुग्धाब्धिमध्योधृतां
संसाराग्निविदीपनव्यपगतप्राणात्मसंजीविनीम् ।
पूर्वाचार्यसुरक्षितां बहुमतिव्याघातदूरस्थिता-
मानीतां तु निजाक्षरैस्सुमनसो भौमाः पिबन्त्वन्वहम् ।।

भगवद्बोधायनकृतां विस्तीर्णां ब्रह्मसूत्रवृत्तिं पूर्वाचार्यास्संचिक्षिपुः तन्मतानुसारेण सूत्राक्षराणि व्याख्यास्यन्ते । 'अथातो ब्रह्मजिज्ञासा' ।

End:

न च परमपुरुषस्सत्यसंकल्पोऽत्यर्थप्रियं ज्ञानिनं लब्ध्वा कदाचिदावर्तयिष्यति ।य एवमाह -

प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ।
उदारास्सर्व एवैते ज्ञानीत्वात्मैव मे मतम् ।।
आस्थितस्स हि युक्तात्मा मामेवानुत्तमां गतिम् ।
बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वासुदेवस्सर्वमिति स महात्मा सुदुर्लभः' इति,

सूत्राभ्यासः शास्त्रपरिसमाप्तिं द्योतयतीति सर्वं समंजसम् ।। जगद्व्यापारवर्जाधिकरण समाप्तम् ।।

Colophon:

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये चतुर्थाध्यायस्य चतुर्थःपादः।। समाप्तश्चाध्यायः । शास्त्रं च परिसमाप्तम् ।।

2192 – श्रीभाष्यव्याख्या - श्रुतप्रकाशिका

Beginning

यतीन्द्रकृतभाष्यार्थाः यद्व्याख्यानेन दर्शिताः ।
वरं सुदर्शनार्यं तं वन्दे कूरकुलाधिपम् ।।
वरदं द्विरदाद्रीशं + प्रणतार्तिहरं हरिम् ।
बहिरन्तस्तमच्छेदि + वस्तुलक्ष्मीधरं विदुः ।।
सम्यङ् न्यायकलापेन + नमो व्यासाय विष्णवे ।
तस्मै रामानुजार्याय + अन्तर्ज्वरमशीशमत् ।।
वन्देहं वरदार्यं तं + संजीवयतिमामपि ।
प्रपद्ये प्रणवाकारं + शेषित्वं स्फुटमीक्ष्यते ।।
श्रुत्यन्तेषु श्रुतं + दृष्टं श्रीरंगधामनि ।
प्रमाणं च प्रमेयं च + सह सर्वत्र सर्वधा ।।
अविस्तृताः सुगम्भीराः+ स्वभावमखिलं दृढम् ।
श्रीरंगेशाज्ञयालब्ध + भाष्यभक्तिरचूचुदत् ।।
गुरुभ्योऽर्थश्रुत + संकलय्य प्रकाश्यते ।
कःकृत्स्नं वेत्ति भाष्यार्थं + भाष्यवित्तमैः ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

भाष्यं चेद्व्यवृणोत्स्वयं + सम्यक् प्रसीदन्तु नः ।।

सर्वेषां पुरुषाणां प्रमाणाधीनप्रमेयनिश्चयानाम् उपाधित्सितजिहासितेष्टानिष्ठ-तत्साधनानाम् अलौकिकपुरुषार्थतत्साधनरूपे वस्तुनि शब्दैकसमधिगम्ये तत्राप्यपुरुष-शेमुषीदोषमशीमालिन्यस्य वेदाख्याक्षरराशेरेव प्रधानतरप्रमाणतयाश्रयणीयत्वे सिद्धे--

End:

---समर्थितस्यार्थस्य सार्वत्रिकत्वमुक्तमष्टमे । एवं जगतः तदधीनत्वतत्कार्यत्वादि---प्रतिपादनमुखेन अतादधीन्या तत्कार्यत्वादिव्युदासात् ब्रह्मैककारणत्वं स्थिरीकृतं चतुर्थपादेनेति । अयं च विभागः संप्रदायसिद्धत्वात् उपपन्नश्चानुसन्धेयः ।

Colophon:

सर्वव्याख्यानाधिकरणं समाप्तम् ।।

4 – श्रीभाष्यव्याख्या - श्रुतप्रकाशिका

Beginning:

' न वियदश्रुतेः' । पादसंगतिमाह - सांख्यादीति । अयमर्थः । द्वितीयाध्यायस्य प्रथमे पादे कारणविषये परोक्तदोषाः परिहृताः । अत्र तृतीये कार्यविषये परोक्तदोषाः परिह्रियन्ते । तस्मात् तृतीयः पादः प्रथमेन संगतः ।

End:

सर्वशब्देनानुदाहृतश्रुतिस्मृतीतिहासपुराणवचांसि तदनुग्राहकतर्कजातं च विवक्षितम्। तेषामनयादिशा सामंजस्यं द्रष्टव्यम् । उक्तार्थबाधकत्वेन ये प्रमाणतर्काः परैः प्रयुक्ताः तेषां सर्वेषां परिहारोऽत्रास्त्येव एतदनन्तर्भूतार्थो नास्ति । तस्मादुक्तप्रकारेण बाधकप्रमाणतर्कपरिहारश्चानुसन्धेय इत्यभिप्रायेण 'इति सर्वं समंजसम्' इत्युक्तम् । जगद्व्यापारवर्जाधिकरणं समाप्तम् ।।

Colophon

इति हरितकुलतिलक वाग्विजयिसूनुना श्रीरंगराजदिव्याज्ञलब्धवेदव्यासापर-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

नामधेयेश्रीमद्वरदार्यपादसेवासमधिगतश्रीमद्भगवद्रामानुजविरचितशारीरकमीमांसा-भाष्यहृदयेन श्रीसुदर्शनसूरिणा विलिखितायां श्रुतप्रकाशिकायां चतुर्थस्याध्यायस्य चतुर्थःपादः ।।

समाप्तश्चाध्यायः ।। शास्त्रं च परिसमाप्तम् ।।

2617 B – श्रीभाष्यभावांकुरः

Beginning

श्रीमते रामानुजाय नमः ।

पूर्वोत्तरद्विकभेदभिन्नशारीरकशास्त्रे पूर्वद्विकेन प्रमेयत्वव्यापककार्यतानिरुपित-कारणत्वस्य ब्रह्मलक्षणत्वं व्यवस्थापितम् । तथा च तादृशकारणत्वस्य ब्रह्म-लक्षणत्वोपपादनपरत्वं पूर्वद्विकस्योपाधिः । तस्य लक्षणत्वोपपादनं चासम्भवाति-व्याप्तिशंकानिरासकतया तादृशकार्यतायां प्रमेयत्व व्यापकत्वोपपादनेन चेति द्वेधा भवति । तत्र असम्भवातिव्याप्तिशंका च श्रुतिविप्रतिपत्तिप्रयुक्ता वादिविप्रति-पत्तियुक्ता चेति द्विविधा । तत्र श्रुतिविप्रतिपत्तिप्रयुक्तासम्भवशंका प्रथमपादेन तादृशातिव्याप्तिशंका च त्रिपाद्या, वादिविप्रतिपत्तिप्रयुक्तासम्भवातिव्याप्तिशंका च द्वितीयाध्यायगतेन प्राथमिकेन पादद्वयेन च निराक्रियत इति षट्पाद्याः तादृश-शंकावारकत्वम्, तदनन्तरपादद्वयस्य च कार्यतायां प्रमेयत्वव्यापकत्वोपपादन-परत्वमिति अध्यायद्वयस्य उक्तोपाध्युपपत्तिः ।

End:

--न च दुरुपपादात् पदॢधातोः कर्त्रर्थे डप्रत्यये सति दुर्निष्प्रपतमिति रूपसिद्धौ ततस्तरप्प्रत्यये दुर्निष्प्रपतरमिति रूपसिद्धिः । तथा च विशेषणीभूतनिष्क्रमणे तरपा अतिशयबोधसम्भवः, धूमोभवतीत्याद्युपक्रमानुरोधात्, पुंस्त्वस्यावश्यकत्वेऽपितदभूय एव भवतीत्युत्तरवाक्ये स इत्य ध्याहृततच्छब्दार्थे इष्टादिकारिणि नपुंसकतच्छब्देन रेतस्सिग्योगी भवतीत्यर्थप्रतीतेः, तथाऽत्रापि नपुंसकलिंगोपपत्तिरिति वाच्यम्----

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

Colophon:

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोयं विजृम्भताम् ।।

719 – श्रीभाष्यादिपारायणक्रमः

Beginning:

शुभमस्तु । अविघ्नमस्तु । श्रीतिरुमलार्यमहादेशिकाय नमः । श्रीनिवासमहादेशिकाय नमः । श्रीमते वेदव्यासाय नमः । श्रीमते क्रतुनाथाय नमः । श्रीमते वेदान्तमहादेशिकाय नमः । हरिः ओम् ।

अखिलभुवनजन्मस्थेमर्भंगादिलीले-
विनतविविधभूतव्रातरक्षैकदीक्षे ।
श्रुतिशिरसिविदीप्ते ब्रह्मणि श्रीनिवासे
भवतु मम परस्मिन् शेमुषी भक्तिरूपा ।।
पाराशर्यवचः सुधामुपनिषद्दुग्धाब्धिमध्योद्धृतां-
संसाराग्निविदीपनव्यपगतप्राणात्म संजीवनीम् ।
पूर्वाचार्यसुरक्षितां बहुमतिव्याघात दूरस्थिता-
मानीतां तु निजाक्षरैस्सुमनसो भौमाः पिबन्त्वन्वहम् ।।

भगवद्बोधायनकृतां विस्तीर्णां ब्रह्मसूत्रवृत्तिं पूर्वाचार्याः संचिक्षपुः तन्मतानुसारेण सूत्राक्षराणि व्याख्यास्यन्ते ।

'अथातो ब्रह्मजिज्ञासा' । अत्रायमथशब्दः आनन्तर्ये भवति । अतश्शब्दोवृत्तस्य हेतुभावे ।

End:

'अकृत्रिमत्वच्चरणारविन्द + अचिन्तयित्वा ।
यदिपरमपुरुषायत्तं + अनावृत्तिश्शब्दादनावृत्तिश्शब्दात् ।।'

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

यत्र योगेश्वरः + मतिर्मम ।

यत्र योगेश्वरः कृष्णः स्वेच्छारूपेणावस्थितस्य चेतनस्याचेतनस्य च वस्तुनो ये ये भावयोगाः तेषां सर्वेषां योगानाम् ईश्वरः स्वसंकल्पायत्त स्वेतरसमस्तवस्तुस्वरूप-स्थितिप्रवृत्तिभेदः कृष्णः वसुदेवसूनुः यत्र च धनुर्धरः तत्पितृष्वसुः पुत्रः तत्पाद-द्वन्द्वैकाश्रयः तत्र श्रीर्विजयो भूतिः नीतिश्च ध्रुवा निश्चला इति मतिर्मम इति ।

इति श्रीभगवद्रामानुजाचार्यविरचित श्रीगीताभाष्ये अष्टादशोऽध्यायः ।।

ततो भगवता स्वयमेवात्म + सुखमासीत ।
रहस्यत्रयसारोऽयं वेंकटेशविपश्चिता ।
शरण्य दम्पतिविदां सम्मतः समगृह्यत ।।

295 D – श्रीरंगराजस्तवः

Beginning

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ।।
श्रीवत्सचिह्नमिश्रेभ्यो नमउक्तिमधीमहे ।
यदुक्तयः त्रयीकण्ठे यान्ति मंगलसूत्रताम् ।।
रामानुजपदच्छाया गोविन्दाह्वानपायिनी ।
तदायत्तस्वरूपा सा जीयान्मद्विश्रमस्थली ।।
रामानुजमुनिर्जीयात् यो हरेर्भक्तियन्त्रतः ।
कलिकोलाहलक्रीडा मुधाग्रहमपाहरत् ।।
विधाय वैदिकं मार्गं अकौतस्कुतकण्टकम् ।
नेतारं भगवद्भक्तेः यामुनं मनवामहै ।।
नौमि नाथमुनिं नाम जीमूतं भक्त्यवग्रहे ।
वैराग्य भगवत्तत्त्व ज्ञान भक्त्यभिवर्षुकम् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

End:

गुणतुंगतया तव रंगपते भृशनिम्नमिमं जनमुन्नमय ।
यदपेक्ष्यमपेक्षितुरस्यहि तत् परिपूरणमीशितुरीश्वरता ।।
त्वं मीनपानीयनयेन कर्म धीभक्तिवैराग्यजुषोबिभर्षी ।
रंगेश मां पासि मितपंच यत् पानीयशालं मरुभूषु तत् स्यात् ।।

Colophon:

इति हरितकुलतिलकश्रीवत्सांकमिश्रसूनोः श्रीरंगराजदिव्याज्ञालबध श्रीपराशरभट्टा-परनामधेयस्य श्रीरंगनाथस्य कृतिषु श्रीरंगराजस्तवं सम्पूर्णम् ।।

622 – श्रीरंगराजस्तवव्याख्या

Beginning:

संसारतोमुक्तानां विदीप्तं विशेषेण प्रकाशमानं आहुः - श्रुतय इति शेषः, पुण्यम् - पवित्रम् , तत् - पूर्वोक्तं पुलिन- विरजानदी सैकतम्,अद्य- संसार-दशायामपि, इदं तया-- प्रत्यक्षीकृत्य इदमिति निर्देशार्हतया, मध्ये कावेरी -कावेर्या मध्येः, 'पारेमध्ये षष्ट्यावेति' समासः स्फुरति --- प्रकाशते, तत्कावेरी मध्यं, नित्यमीक्षिषीय - ईक्षण विषयम् कुर्याम्, 'ईक्षतेर्धातोः आत्मने पदाशिषि लिङ् उत्तमैकवचनम्' 'तद्विष्णोः परमं पदम्' 'सदा पश्यन्ति सूरयः' इति नित्यसूरिभिः नित्यद्रष्टव्यस्य परमपदस्यैव कावेरीद्वीपतया सर्वजनसाक्षात्काराय अवतीर्णत्वात् इदमेव अस्माकं नित्यं द्रष्टव्यं भूयादिति भावः ।

End:

इति यत् तत् – मरुभूषु- निर्जलभूमिषु, पानीयशालं स्यात् - पानीयप्रधानाय कल्पिता शाला, पानीयशालं - 'विभाषासेनासुराच्छायाशालानिशालामिति' नपुंसकत्यम् । अनुष्ठित साधन रक्षणापेक्षयाननुष्ठित साधनरक्षणमेव भवदीय दयादिगुणानाम् अत्यौन्नत्यावहमिति भावः । एवं शलकद्वयेन परमदयालुभिः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रीपराशरभट्टार्यैः मन्त्ररत्नखण्डद्वयमेव विवृतमिति सांप्रदायिकानां पन्थानमनुरुध्य यथामतिलिखितमिति मतिमद्भिः क्षन्तव्यम् ।

Colophon:

इति श्रीमदात्रेय गोत्रभूषायमाण शेणाचलाचार्यपौत्रेण श्रीरामानुजगुरुवरसूनुना श्रीवेंकटनिवासदासेन विरचिता श्रीरंगराजस्तवव्याख्या परिसमाप्ता ।।

221 – श्रीवैष्णवधर्मप्रमाणसंग्रहः

Begining:

वैष्णवेष्टिः वैकुण्ठनाथीय कृतिषु धर्मसमुच्चये यस्य पित्रादयोहि अवैष्णवा एव मृताः यस्तु तेषां वैष्णवत्वं सद्गतिं च वांछन्ति स वैष्णवेष्टिं कुर्यात् ।

End:

पुरुषस्थं पुरुषपुरीशये निवेशयिता । नास्य प्रजावत्सरात् भ्रश्यते । संवत्सरादेव जायत इति ।।

2332 – श्रीवैष्णवसमयाचारनिष्कर्षः

Beginning:

यो नित्यमच्युतपदाम्बुजयुग्मरुक्मव्यामोहतस्तदितराणि तृणाय मेने ।
अस्मद्गुरोर्भगवतोस्य दयैकसिन्धोरामानुजस्य चरणौ शरणं प्रपद्ये ।।
माता पिता युवतयस्तनयाविभूतिस्सर्वं यदेव नियमेन मदन्वयानाम् ।
आद्यस्य नः कुलपतेर्वकुलाभिरामम् श्रीमत्तदंघ्रियुगलं प्रणमामि मूर्ध्ना ।।
भूतं सरश्च महताह्वय भट्टनाथश्रीभक्तिसारकुलशेखरयोगिवाहान् ।
भक्तांघ्रिरेणु परकाल यतीन्द्रमिश्रान्श्रीमत्पराकुशमुनिं प्रणतोस्मि नित्यम् ।।
श्रीशं पद्मांचगूराट्वकुलधरमुनी नाथपंकेरुहाक्ष
श्रीरामान् यामुनार्यं तदनुचर महापूर्ण रामानुजार्यौ ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitizatioh: eGangotri.

ध्यायन् गोविन्दभट्टारक निगमशिरोयोगिलोकार्य कृष्णान्
तत्पुत्र श्रीनगेशौ वरवरमपि तं भाति लोकार्ययोगी ।।
यःश्रीसौम्य वरेशयोगिचरण श्रीभट्टनाथो मुनिः
तद्भृत्यः परवस्तु वेंकटसुहृत् कान्तोपयन्ता मुनिः ।
तच्छिष्यशठकोपदेशिकवरश्श्रीगार्ग्यवंशोत्तमः
तत्पादाब्ज मधुव्रतं मुनिवरं लोकार्यवर्यं श्रये ।।
श्रीरामानुजदेशिकेन्द्र + स्वाकारसंपत्त्रयः ।
वन्देलोकार्ययोगीन्द्रं + वेदाद्यास्तद्विदुत्तमाः ।।
सन्ति प्राचां गुरुणां + समयसुनियताचार निष्कर्षमार्गे ।

End:

'वरवरमुनिवर्य संबन्धसंबन्धसंबन्धिनः प्रतिदिनमनुभूयभूयोनभूयासमायासभूः एन्नु अरुळिच्चयुदरुळिनारायित्तु ।

Colophon:

इति श्रीमद्यतीन्द्रप्रवणप्रभाव श्रीलोकाचार्यमुनीन्द्रप्रसादलबध श्रीवैष्णवाचारनिष्कर्षे शिष्टाचारप्राधान्यप्रकरणन्नाम दशमो विवेकः ।।

566 M – श्रीस्तवः

Beginning

श्रीवत्सचिह्नमिश्रेभ्यो नम उक्तिमधीमहे ।
यदुक्तयस्त्रयीकण्ठे यान्तिमंगलसूत्रताम् ।।
स्वस्तिश्रीदिशतादशेषजगतां सर्गोपसर्गस्थिती
स्वर्गं दुर्गतिमापवर्गिकपदं सर्वं च कुर्वन् हरिः ।
यस्यावीक्ष्यमुखं तदिंगितपराधीनोविदत्तेखिल
क्रीडेयं खलु नान्यथास्य रसदास्यादैकरस्यात्तया ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

End:

यस्याः कटाक्षवीक्षाक्षण लक्ष लक्षिता महेशास्युः ।
श्रीरंगराजमहिषी सा मामपि वीक्षतां लक्ष्मीः ।।
उल्लासपल्लवितपालित सप्तलोकी निर्वाहकोरकित नेमकटाक्षलीलाम् ।
श्रीरंगहर्म्यतलमंगलदीपरेखां श्रीरंगराजमहिषीं श्रियमाश्रयामः ।।

Colophon:

इति श्रीस्तवः परिसमाप्तः ।।

1034 C – श्रीस्तवव्याख्या

Beginning:

श्रीवत्सचिह्नमिश्रेभ्यो नमउक्तिमधीमहि ।
यदुक्तयस्त्रयीकण्ठे यान्तिमंगलसूत्रताम् ।।
व्यासशेषाचलार्य-----रामानुजगुरुजवेंकटनिवासः ।
श्रीवत्सांकार्यविहितं श्रीस्तवमत्यादरेण विवृणोति ।।

इह खलु निखिलश्रुत्यन्ततत्त्वार्थं यागुनमुनिकुलतिलक रामानुजमुनेरधिगतवन्तः श्रीवत्सांकमिश्राः प्रथमतो --

नमोचिन्त्याद्भुताक्लिष्ट ज्ञानवैराग्यराशये ।
नाथाय मुनयेऽगाध भगवद्भक्तिसिन्धवे ।।

इत्युपक्रम्य 'पितामहं नाथमुनिं विलोक्य प्रसीदमद्वृत्तमचिन्तयित्वा', इति स्तोत्ररत्न परिसमाप्य, चतुश्लोकमुक्तवतो यामुनमुनेः पन्थानमनुसृत्य प्रथमतो 'योनित्यमच्युतपदाम्बुज' इत्यारभ्य 'रामानुजस्य चरणौ शरणं प्रपद्ये', इत्युपक्रम्य प्रबन्धचतुष्टयं सृष्ट्वा 'रामानुजांघ्रिशरणोऽस्मि - वरदास्मि तवेक्षणीय', इति परिसमाप्य, भगवत्समाश्रयणोद्युक्त समस्तचेतन ---- पुरुषकारतया प्रथमतः समाश्रयणीयां श्रियम् एकादशभिः श्लोकैः स्तोतुकामाः आशीर्वचनरूपं मंगल

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अन्तरायपरिहाराय निबध्नन्ति - 'स्वस्ति श्रीर्दिशतात्' ।

End:

'यस्या' इति । प्राक्प्रलयकाले - विपर्ययेन, कटाक्षाभावेन - समुत्थः - संजातः - विपर्ययः- अभावः यस्य तत्तथोक्तं - विश्वं जगत् यस्याः कटाक्षरूप- यत् मृदुवीक्षणं - तस्य वीक्षणेन संकल्पेन - सद्यस्समुल्लसितपल्लवं - संजातांकुरं यथातथा - उल्लास आविर्भभूवतान्देवदेव महिषीं श्रियम् आश्रयागः ।

इत्थं स्वव्यतिरिक्तविषये सुलक्षितं लक्ष्मीकटाक्षवैलक्षण्यवैभवं स्वस्मिन्नपि प्रार्थयित्वा स्तोत्रं परिसमापयति - 'यस्याः' इति । यस्याः कटाक्षवीक्षायाः क्षणलक्षणं - क्षणमात्रं लक्ष्यं - ये लक्षिताः जनाः- ते महेशास्युः - अत्यन्तैश्वर्यवन्तो भवेयुः । श्रीरंगराजमहिषी सा लक्ष्मीः मामपि वीक्षताम् - तत एव कृतकृत्यो भवेयमिति भावः।।

Colophon:

इति श्रीमदात्रेयगोत्र भूषायमाण शेषाचलार्यपौत्रेण श्रीरामानुजगुरुसूनुना श्रीवेंकटनिवासदासेन विरचिता श्रीस्तवव्याख्या परिसमाप्ता ।।

779 B – श्रीस्तुतिः

Beginning

मानातीतप्रथितविभवां मंगलं मंगलानां
वक्षःपीठीं मधुर्विजयिनो भूषयन्तीं स्वकान्त्या ।
प्रत्यक्षानुश्रविकमहिमप्रार्थिनीनां प्रजानां
श्रेयोमूर्तिं श्रियमशरणस्त्वां शरण्यां प्रपद्ये ।।
आविर्भावः कलशजलधावध्वरे वाऽपि यस्याः
स्थानं यस्याः सरसिजवनं विष्णुवक्षःस्थलं वा ।
भूमा यस्या भुवनमखिलं देवि दिव्यं पदं वा
स्तोकप्रज्ञैरनवधिगुणा स्तूयसे सा कथं त्वम् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

End:

कल्याणानामविकलनिधिः काऽपि कारुण्यसीमा
नित्यामोदा निगमवचसां मौलिमन्दारमाला ।
संपद्दिव्या मधुविजयिनः सन्निधत्तां सदा मे
सैषा देवी सकलभुवनप्रार्थना कामधेनुः ।।
उपचितगुरुभक्तेः उत्थितं वेंकटेशात्
कलिकलुषनिवृत्त्यै कल्पमानं प्रजानाम् ।
सरसिजनिलयायाः स्तोत्रमेतत्पठन्तः
सकलकुशलसीमा सार्वभौमा भवन्ति ।।

Colophon:

श्रीस्तुतिः समाप्ता ।।

166 – श्रीस्तुतिव्याख्या

Beginning:

आत्रेयं वरदाचार्यं श्रीनिवासार्यशेखरम् ।
वेदान्तार्यं यतीन्द्रं च शठारिं परमां क्षमाम् ।।
वासुदेवं कुल --- भूवराहं प्रणम्य च ।
करिष्ये श्रीस्तुतिव्याख्यां बालानां बोधसिद्धये ।।

इह खलु जगदुज्जीवनाय कलिविलसितभ्रम --- निरसनाय च समुदितश्रीनिवास-घण्टावतारतया प्रसिद्धः सर्वतन्त्रस्वतन्त्रो भगवान् वेदान्ताचार्यः भवत्युपाया-दधिकारिणामुज्जीवनाय प्रपत्त्युपायानुष्ठानं सप्रकारं प्रबन्धान्तरेषु -- प्रतिपाद्यते । तत्र पुरुषकारतया भगवता भाष्यकारेण गद्यादौ 'भगवन्नारायणेत्यादिना' दर्शिता श्रीशरणागतिं मध्यगद्यगतासंख्येयकल्याणगुणगणश्रीवल्लभ इत्यादिना गद्यान्तरे श्रीमन्नारायणेत्यनेन च सिद्धोपायकोटावनुप्रवेशेन सूचितां श्रीस्तुतिं श्रीविशिष्ट-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शरणागतिं स्वयं विशदीकर्तुं लोकमातुर्विष्णुपत्न्या जीवत्वाणुत्वाद्यभ्युपगमेन निष्कर्षमिच्छतां पक्षान् ---- शरण्यत्वोपेयत्वौपयिकान् गुणांश्च प्रकटयितुं श्रीस्तुति - --------- इत्यादिना ।

End:

नन्विह प्रत्यगात्माह -'विस़मर्पणं यज्ञे भगवत एव संप्रदाना तावसुरण्योऽपि प्रार्थना कामधेनुः' भुवनशब्देन------सकलजनप्रार्थनायाः कामधेनुः प्रार्थनाशब्देन प्रार्थनाविशेषो लक्ष्यते । तस्य कामधेनुः तत्प्रार्थने कामधेनुरित्यर्थः---कल्याण-गुणतया प्रसिद्धा एषा एवंविधदिव्यमंगलविग्रहा देवी सदा मे-मह्यं सन्निधत्तां-सन्निधानं करोत्विति, प्रार्थनामात्रे सन्निधाने हि प्रजायाः पुष्टिरिति भावः ।

उपचितगुरुभक्तेरुत्थितं वेंकटेशात्
कलिकलुषनिवृत्त्यैकल्पमानं जनानाम् ।
सरसिजनिलयायाः स्तोत्रमेतत्पठन्तः
सकलकुशलसीमाः सार्वभौमा भवन्ति ।।

2237 – श्रुतप्रकाशिकाव्याख्या (तूलिका)

Beginning:

जयति कमलकन्याकान्तविश्रान्तिभूमा
जगति विधिशिवादित्राणिजोत्कर्णसीमा ।
अघटितघटनानामदभुतानां विधाता
प्रघटितघनसम्पन्मंगलानां विधाता ।।
कल्याणमावहतु कल्पसहस्रकोटी
श्रीकेशवस्य महिषी यतिराजवल्ली ।
उदभूतभूतपुरपुण्यकृतावतारा
माद्दृग्जनप्रवणमान्यकटाक्षधारा ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

लक्ष्मीरमणसंकल्प ---- विष्वक्सेनं भजाम्यहम् ।
पारमैश्वर्यनिर्वाह ---- दुरन्तकमनोल्बणाः ।।
शठारातिमुखास्सर्वे ---- निरवग्रहसम्पदे ।
पाराशर्यपदाम्भोजे ---- ब्रूयते ब्रह्मवित्तमाः ।।
विनश्वरसरस्वती --- सकलमप्यतस्स्वस्थये ।
परीष्टिपथिदूरक ---- द्विलनिदं न निश्चेतति ।।
व्यासाचार्यो विपश्चित् ------ ता शान्तिशीलः ।

श्रीरंगराजदिव्यानुग्रहनिबन्धनव्यासाचार्यापरनामा निरतिशयमहिमा सुदर्शनमहार्यो भवभयाभितप्तबुधभागधेयवैभवभावितावतरण भगवद्रामानुजमुनिभणितशारीरकभाष्यमखिलजगदुज्जीवयिषया व्याचिख्यासुः शिष्टाचाराद्यवधृताभीष्टसाधन --- इष्टदेवतानमस्काररूपमंगलं सच्छात्रपरित्राणाय वाचनिकमारचयति 'वरदम्' इत्यादिना ।

End:

कल्प्यत इति । अथवा कारणत्वप्रयुक्तसर्वज्ञानात्मकस्वज्ञानकतारूपातिशयप्रतिपादकपरे तथा प्रतिपादन --- न इति श्रुतिस्वारस्स्यमनुग्राहकन्याय --- लिंगवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादित्यर्थः । वस्तुसामर्थ्यरूपलिंगस्य प्रकरणात् प्राबल्यप्रतिपादनादस्थूलत्वादिविशेषितानन्दत्वादीनामिव दु --- सर्वत्रोपसंहार इत्याशयेनाह - वस्तुसामर्थ्येनेत्याद्यपमोक्षरूपत्वं वै विशेष -- दृशिव्यवहारप्रयोजक इति भावः ।

2306 – श्रुतप्रकाशिकाव्याख्या (तूलिका)

Beginning :

वन्देहं वेंकटाधीशं वात्सल्यादिगुणाकरम् ।
वारिजासनया सार्धं वांछितार्थप्रदं नृणाम् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रुतप्रकाशिकां श्रुत्वा गुरोस्समरपुंगवात् ।
वाधूलश्रीनिवासेन क्रियते तूलिका मया ।।
स्खलितन्तु यदज्ञानात् अत्र लेखकदोषतः ।
तत्समाधाय विद्वद्भिः ग्राह्येयं वीतमत्सरैः ।।

वाग्विजयिसूनुः सुदर्शनापरनामा भट्टार्यवर्यः श्रीमच्छारीरकभाष्यं व्याचिख्यासुः प्रारिप्सितस्य ग्रन्थस्य अविघ्नपरिसमाप्तिप्रचयगमनार्थं इष्टदेवतोपासनात्मकं मंगलमाचरति - वरदमिति । यद्यपि श्रीरंगनिवासिनस्तस्य श्रीरंगनाथसमाश्रयणमेव - ------------ । ------करिगिरिपतेः अर्थितार्थप्रधानभूषितत्वेन स्वाभिमताऽ-विघ्नसमाप्तिप्रचयगमनरूपार्थसिद्धिः । तत्समाश्रयणे अमोघेऽतिमनीषया स्वस्य भाष्यार्थप्रवक्तृत्वेन उपकारार्थत्वेन करिगिरिपतिसमाश्रयणमुच्यते । वरदं इत्यनेन अपेक्षितप्रदत्वमुक्तम्, द्विरदाद्रीशमित्यनेन --सौलभ्यादिगुणजातः सूचितः ।

End:

-----केवलेतिकरणमात्र---वाक्यसमाप्तिद्योतक---सारेण --- कश्चिदित्यादिना । केवलेति सर्वात्मकत्वप्रकारप्रतिपादनपरत्वं ------- ष्टमिति प्रयोजनवत्वेकार्थम् अंगीकृत्य व्यवहिता --- व्याचष्टे । यद्वा इति शब्दस्य वाक्यसमाप्तिद्योतकत्व-प्रसिद्ध्यनुसारेण अन्यथा व्याचष्टे । -------- ।

Colophon:

इति श्रीमद्वाधूलकुलतिलकसमरपुंगवाचार्य ---- भाष्यतत्प्रकाशिकाहृदयेन तत्कुलीनेन श्रीनिवासविदुषा महार्यापरनामधेयेन विरचितायां श्रुतप्रकाशिका-तूलिकायां प्रथमाध्यायस्य चतुर्थः पादः । समाप्तश्चाध्यायः ।।

2179 - श्रुतप्रदीपिका (श्रीभाष्यव्याख्या)

Beginning :

वरदं द्विरदाद्रिशेखरं कमलाया दयितं दयानिधिम् ।
सकलार्थिजनार्थितप्रदं प्रणमामि प्रणतार्तिहारिणम् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वेदान्तसूत्रभाष्यार्थमाचार्योपासनाच्छ्रुतम् ।
तद्गिरादीपिकेवाहं दर्शयिष्ये यथामति ।।

प्रारीप्सितस्य प्रबन्धस्याविघ्नपरिसमाप्तिप्रचयगमनार्थं इष्टदेवतोपासनारूप मंगलं श्रुत्या कुर्वन्नार्थं प्रतिपाद्यं संक्षेपतः श्रोतृबुद्धिसमवधानाय दर्शयति अखिलेति । प्रथमेन पादेन प्रथमद्विकार्थसंक्षेपः, द्वितीयेन तु उत्तरस्य । भवतीति भुवनं, कार्य-जातम् । कतिपयकारणचतुर्मुखादिव्यावृत्त्यर्थमखिलशब्दः ।

End:

नामरूपभेदाभाव एकत्वम् । भाव्यवस्था विशेषस्य प्रागवस्थायोग उपादानता । अन्यथाऽनिष्ठमाह - सर्वेति । सर्वशाखानयनस्य परमत वैपरीत्यमाह - सर्वशाखा इति। निगमयति - अत इति । शोधकान्तरैकार्थ्यं व्युदस्यति न चेति । विषयविभागादविरोधमाह - प्राकृतेति । ज्ञानस्वरूपतोक्तिरूपं, आर्थगुणनिषेध परिहर्तुमाह ज्ञानेति । ततः किं इत्यत्राह - न तावदिति । किं ज्ञान-वन्नियतधर्मधर्मिभावयोगः, उत एकजातीय विषयत्वादिति विकल्पे प्रथमे व्युदस्यति (ज्ञातुः इति) ।

2165 – संकल्पसूर्योदयः

Beginning :

श्रीमान्वेंकटनाथार्यः + सदा हृदि ।।
प्राची सन्ध्या + वासुदेवाख्यमूर्तिः ।।
विशुद्धविज्ञान + हयग्रीवमहं प्रपद्ये ।।

यद्भक्तिप्रचयात्मके दिनमुखे दृष्टिक्षमः क्षेत्रिणः
क्षिप्रं संसृतिशर्वरी क्षिपति यत्संकल्पसूर्योदयः ।
तत्त्वैरस्त्रविभूषणैरधिगतः स्वाधीननित्योन्नतिः
श्रीमानस्तु स मे समस्तविपदुत्ताराय नारायणः ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

लक्ष्ये यत्र श्रुतिमितगुणाकृष्टिलब्धावधानैः
प्रत्यग्बाणः प्रणवधनुषा सत्त्ववद्भिः प्रयुक्तः ।
मध्ये वक्षः स्फुरति महसा पत्रलः कौस्तुभात्मा
पद्माकान्तः स भवतु दयादुग्धसिन्धुश्रियै वः ।।

End:

तदेतदखिलं यन्मुखेन मया समधिगतम्, तमसहायवीरं विवेकं विचित्रमहिमशालिनीं विष्णुभक्तिं च अमोघवांच्छितं संद्रष्टुमिच्छामि । अत्र च एतौ तुलसीवननिवासिनौ द्वादशीमुपसेवमानौ नूनम् उपस्थास्येते । यावदिमावुपसर्पामि । ततः प्रविशति विवेकसुमतिः, विष्णुभक्तिश्च । विष्णुः - महाराज ! दिष्टया त्वया जिताः शत्रवः पुरुषश्चाशेषविकृतिप्रसूत्या प्रकृत्या अनिदं प्रथमबम्भ्रम्यमाणगर्भजन्मजरामरणादि -----

2185 B – संप्रदायचन्द्रिका

Beginning:

श्रीशैलार्यमनन्तदेशिकमपि श्रीश्रीनिवासं गुरुं
श्रीमद्वेंकटदेशिकं च पितरं नत्वा मुहुस्सादरम् ।
तुष्टोऽहं हरिणार्चितार्द्रहृदयः श्रीवेंकटार्याभिधः
स्वच्छां सद्गुरुसम्प्रदायजलधेस्फूर्त्यै स्फुरच्चन्द्रिकाम् ।।
श्रीमान्कृष्णः प्रपन्नानां फल-----शरणं फलम् ।
प्राचामाचार्यवर्याणामिह सिद्धान्तपद्धतिः ।।

ननु शरणपदेनोपायत्वमुच्यते । उपायत्वं च भगवतः फलप्रदत्वमेव । अतः फलश्चेति पदन्निरर्थकमिति एव - नैवं शरणचरणाधिकारिणं प्रति भगवतः फलप्रदत्व -- रैकेण उपायभावस्य दुरपह्नवत्वात् । तथा चोक्तमर्हिबुध्न्यसंहितायां सप्तदशाध्याये -

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

उपाये गृहरक्षित्रोश्शब्दश्शरणमित्ययम् ।
वर्धते साम्प्रतम्मोक्ष उपायार्थैकवाचकः ।। इति ।

अधि --- व्यतिरेकेण भगवतः उपायत्वभावस्य वचनसिद्धत्वेपि तस्य -- उपायात् शरणपदस्य कर्माद्युपायान्तरनिरपेक्षाफलप्रदत्वप्रतिपादकत्वं लक्षणया --- इति ।

End:

------ कथं प्रतिपादितमिति चेत्सिद्धं केवलो द्विविधः । ब्रह्मविद्यायां प्रतिपादित --- अचिन्मिश्रात्मोपासनतः कश्चन । वृन्दाग्नि --- त्मोपासकः कश्चन । अचिन्मिश्रात्मो --- केवलस्य प्रकृति ---भावश्च वेदान्तदेशिकैः -- इति । तदन्यकेवलस्य प्रकृतिविनिर्मुक्तात्मानुभवस्सूरिदृश्यपरमपदसमीप एवेति तत्तात्पर्यवर्णने विरोधाभावात् । अन्यथा बहुप्रमाण -- इत्यलमतिचर्चया । तस्मात् सर्वदुःखनिवृत्तिपूर्वकभगवदनुभवजनित - निजप्रीतिकारित - कैंकर्यसाम्राज्यप्राप्तिरेव परमपुरुषार्थ इति स्थितम् ।

Colophon:

इति श्रीशैलकुलतिलकश्रीमद्वेंकटनाथतातसूरिविरचितायां
सम्प्रदायचन्द्रिकायां सप्तमः प्रकाशः सम्पूर्णः ।।

2422 A – संप्रदायचन्द्रिका

Beginning:

श्रीमते रम्यजामातृमुनये नमः ।
कमलास्तनक--------कलंकांकितवक्षसं
श्रीशैलवंशसन्तानं श्रये श्रीशैलनायकम् ।
अलंकृतकराम्भोजमतुला--------मुद्रया
अस्मत्कुलधनं श्रीशमाश्रये वरदं प्रभुम् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रीशैलार्यमनन्तदेशिकमपि श्रीश्रीनिवासं गुरुं
श्रीमद्वेंकटदेशिकं च पितरं नत्वा मुहुस्सादरम् ।
तुष्टोऽहं हरिणार्चितार्हहृदयः श्रीवेंकटार्याभिधः
स्वच्छां सद्गुरुसम्प्रदायजलधेस्फूर्त्यै स्फुरत् चन्द्रिकाम् ।।
श्रीमान् कृष्णः प्रपन्नानां फल---शरणं फलम् ।
प्राचामाचार्यवर्याणामिह सिद्धान्तपद्धतिः ।।

End:

इति तदन्यकेवलस्य प्रकृतिविनिर्मुक्तात्मानुभवस्सूरिदृश्यपरमपदसमीप एवेति तत्तात्पर्यवर्णने विरोधाभावात् । अन्यथा बहुप्रमाण -------त्यलमतिचर्चया । तस्मात् सर्वदुःखनिवृत्तिपूर्वकं भगवदनुभवजनितनिजप्रीतिकारितं कैंकर्यसाम-----प्राप्तिरेव परमपुरुषार्थ इति स्थितम् ।

Colophon:

इति श्रीशैलकुलतिलकश्रीमद्वेंकटनाथतातसूरिविरचितायां
सम्प्रदायचन्द्रिकायां सप्तमः प्रकाशः ।।

232 – सच्चरित्रपरित्राणम्

Beginning:

कालो देशोऽधिकारोऽर्थः द्रव्यं कर्ता च यन्मयाः ।
सर्वकर्मसमाराध्यं तं विष्णुं प्रणतोस्म्यहम् ।।
श्रीमान् विजयतामार्यो भूयसी शरदो भुवि ।
नरकण्ठीरवो वादी करिकण्ठीरवो गुरुः ।।
प्रमाणपरतन्त्राणां परमैकान्तिनां-------।
सम्यक्प्रमाणोपन्यासैः समाचारोनुपाल्यते ।।

इदमिह सन्तोयिदां कुर्वन्तु ।

प्रायः प्राचां प्रबन्धेषु स्मृतिरत्नाकरादिषु ।
अष्टकालक्रियाभेदाः दक्षाद्युक्ताः प्रपंचिताः ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शाण्डिल्यादिभिरादिष्टाः पंचकालक्रियाः पुनः ।
उक्ता वैकुण्ठनाथेन पंचोक्ताः पंचसंस्क्रियाः ।।
तथापि तत्रानुक्तानामाचाराणा महीयसाम् ।
परित्राणं विधास्यामः प्रमाणादिप्रपंचकैः ।।

------स्मृतिरत्नाकरादिशु हि प्रायेण वैष्णवावैष्णवसाधारणा धर्माः प्रदर्शिताः। प्रपन्नधर्मास्तु केचिदेव परामृष्टाः ।

End:

यो वृत्तिमवमन्येत न तस्याहितनिष्कृतिः ।
न देवतान्तरपरा न च तस्यापि साधनम् ।।
परं प्रसाद एवैषा वृत्तिर्विश्वात्मनो हरेः ।
देहस्यात्यन्तिकलये मोक्षाख्ये सति सा ---।।
निश्श्रेयसं परं ब्रह्म निर्वाणम् इति चोच्यते । इति ।

स्वयं प्रीतिरूपा वृत्तिं प्रसाद इति च 'आयुर्घृतम्' इति-----व्यपदेशः । अन्ते च स एव उपासनविधौ -

----धर्मा ये चाद्ये परिकीर्तिताः । न्यस्तात्मनस्तु तान्सर्वान्फलान्येव निबोधय ।।

इति------प्रपन्नस्य -----प्रयोजनानि । अन्यदपि उक्तदिशा अनुसन्धेयम् ।

Colophon:

इति श्रीवाधूलकुलतिलक श्रीनिवासराघवगुरुकृत सच्चरित्रपरित्राण समाप्तम् ।।

वीरराघवदासेन वाधूलान्वयजन्मना ।
सच्चरित्रपरित्राण सतां सम्प्रीतये कृतम् ।।

112 A – सच्चरित्ररक्षा

Beginning:

श्रीमान्वेंकटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

चक्रादिलांछनभृतः सुभगोर्ध्वपुण्ड्रान्
न्यस्तात्मनो भगवतश्चरणारविन्दे ।
तद्भक्तभोगरसिकास्त्रिदिवेन्द्रवन्द्यान्
पुंसः प्रमाणशरणान् शिरसोद्वहामः ।।
यतिपतिचरणाम्भोरुहरजःप्रभावेण संनिवृत्तरजाः ।
विदधाति वेंकटेशः स्थिरामिमां सच्चरित्ररक्षाम् ।।
सद्भिर्धृतेषु सततं विमतिं गता ये
प्रत्युः समस्तजगतां परमायुधेषु ।
तैरेव तान्निगमशाणनिघर्षदीप्तै-
स्तर्कात्मनां परिणतैः प्रहरामि मूर्खान् ।।

इह कतिचित् अतिचिरसमुपचितविविधदुरितावलीमलीमसमनसः परमपुरुष-चरणारविन्दवैमुख्यमुषितदर्शनाः सुदर्शनादिधारणे विमन्यन्ते ।।

End:

भोज्याभोज्यव्यवस्थायां शास्त्रमेव निबन्धनम् ।
तच्चेद्भोज्यमिदं ब्रूते किं वयं विदधीमहि ।।
अथानुष्ठानतन्त्रत्वं नित्यकाम्याग्निहोत्रयोः ।
एवं प्राणाग्निहोत्रेऽपि नैवेद्याशनतन्त्रता ।।

इति । अतः सिद्धं भगवन्निवेदितेनैव पावनतमेनानादिकालसंचितानन्तस्वान्त-ध्वान्तविध्वंसिना विश्वेषां वैदिकानां वैश्वदेवप्राणाग्निहवनपूर्वकं वैश्यानरमूर्तेर्भगवतः समाराधनमनुयागाभिधानमनुदिनं कर्तव्यमिति ।

श्रीमद्वेंकटनाथेन सतामित्थं समर्थितम् । पावनं भगवद्भुक्तप्रापणादिनिषेवणम् ।।

शमितभवभयानां शंखचक्रादिचिह्नैः
दिविषदधिकभूम्नां दीव्यतामूर्ध्वपुण्ड्रैः ।
प्रचितगुणगणानां प्रापणप्राशनाद्यै-
रयमहमनघानामस्मि पात्रं दयायाः ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

Colophon:

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेंकटनाथस्य वेदान्ताचार्यस्य कृतिषु सच्चरित्ररक्षायां भगवन्निवेदितोपयोगाधिकारस्तृतीयः ।।

2943 A – सदनुष्ठानदर्पणम्

Beginning:

श्रीकौशिकान्वय वरप्रदवर्य सूनुं
तत्पादयुग्म सरसीरुहराजहंसम् ।
श्रीशुद्धसत्व गुरुलब्ध समस्तबोधम्
श्रीमन्वरप्रदगरुं शरणं प्रपद्ये ।।
श्रीशं भक्तान् गुरून्नत्वा ज्ञात्वा ग्रन्थान् सदीरितान् ।
कुर्वे वरददासोऽहं सदनुष्ठानदर्पणम् ।।

श्रियः पतिचरणारविन्दयुगलं स्वार्थतागन्धराहित्येन उपायोपेयत्वेन उपगतः परार्थ कैंकर्यपरप्रपन्नः ब्राह्मे मुहूर्ते श्रीहरिर्हरिर्हरिरित्युच्चार्य शयनादुत्थाय पाणिपादौ प्रक्षाल्याचम्य गुरुपरम्परापूर्वक मूलमन्त्र-मन्त्ररत्न- चरमश्लोकोक्त अनुसंधानपूर्वकं भगवध्यान प्रातर्नित्यानुसन्धेयश्लोक प्राबोधकगाधा, त्रिंशत्गाधा भक्ताङ्घ्रिरेणुप्रणीत-श्रीमालागाधानुसन्धानं च कुर्यात् । वस्त्र प्रावृतशिरस्कः दक्षिणकर्णवेष्टितब्रह्मसूत्रः दिवा सन्ध्ययोरुदङ्मुखः, रात्रौ दक्षिणामुखः वल्मीकादिरहिते देशे मलमूत्र उत्सर्जनं कुर्यात् । ततः पल्वलादीन् गत्वा प्रथमतः दक्षिणकरेण उत्सर्जनात् पूर्वं निक्षिप्तायां स्वदक्षिणपार्श्वस्थायां मृदिप्रसृतिमृदमादाय वामकरे निक्षिप्य शौचंकृत्वा द्वितीयादौ अर्धप्रसृतिमृदमादाय द्वात्रिंशद्वारं गुदशौचं षड्लिंगशौचं कृत्वा मध्ये मध्ये हस्तशौचं विशिष्य विंशति सव्यकरशौचं दक्षिणसव्यकरयोः प्रत्येकं विंशतिशौचं सव्यदक्षिणपादयोः प्रत्येकं मृदा दशशौचं कुर्यात् । पुण्यनद्यादीन् गत्वा षोडश गण्डूषान्कृत्वा त्रिराचामेत् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

End:

'चन्द्रवन्मुखम्' इति महाकविप्रयोगदर्शनात् । मर्कटवन्मुखं, मार्जालवन्मुखम् इत्यादि प्रयोगाभावात् । स्थितस्य गतिकल्पनन्यायात् स्वसम्बन्धापेक्षस्य सजातीय-सम्बन्धापेक्षोभयनिष्ठकविसमयसिद्धिधर्मवत्वमिति च अत्र स्वलक्षणपरिष्कारात् काचिदनुपपत्तिः । स्वसम्बन्धः- चन्द्रसम्बन्धः आह्लादकरत्वरूपः, स्वसजातीय-सम्बन्धः- मुखसम्बन्धः - आह्लादकरत्वरूपः उभयनिष्ठः - चन्द्रमुखोभयनिष्ठः, धर्मः - आह्लादकरत्वरूपधर्मः । अत्र धर्मशब्देन वस्त्वन्तरसमवेतदुःखकाठिन्यादि-विजातीयवैलक्षिकोपमानव्यतिरिक्तगताह्लादकरत्वभिन्नप्राचीनकविमतप्रसिद्धाह्लाद-करत्वं विवक्षितम् ॥

46 – सद्विद्याविजयः

Beginning:

वेद्यता ब्रह्मविद्याभिर्हरेरिति निरूपितम् ।
तेन तत्रैव जिज्ञासा सद्विद्यालक्ष्मशोधिनी ॥

उक्तं भगवतः सर्वविद्यावेद्यत्वम् । अतस्स एव जिज्ञास्यः । जिज्ञास्यलक्षणमुक्तं 'यतो वा इमानि' इति । तत्र च जगत्कारणत्वं लक्षणमभिसंहितम् । तच्च सद्विद्यया प्रतिपन्नम् । तत्र चोपोद्घातेन प्रथमखण्डेन पितापुत्राख्यायिकया प्रतिपिपाद-यिषितार्थोयतार्यते । अनन्तरं षड्भिः खण्डैः प्रतिपिपादयिषितार्थः प्रतिपाद्यते । अनन्तरं च नवभिः स एवार्थः स्थाप्यते । तेन सिद्धोऽयं विभागः उच्यते । सद्विद्यान्त इव सप्तमखण्डेनापि 'तद्धास्य विजज्ञौ' इति । 'विजज्ञौ' इति पित्रा पुत्रस्योत्पिपादयिषितं ज्ञानं सम्यगेव निर्वृत्तमिति हि अवगम्यते । न चावान्तरार्थस्य ज्ञातव्यतापरमिदमिति वक्तुं शक्यम् । पूर्वोत्तरखण्डेष्ववान्तरार्थेषु तददर्शनात् 'उद्दालको हारुणिः' इति पुनरुपदेशारम्भः प्रतीतेश्च पूर्वप्रक्रान्तोपदेशः परिसमाप्त इत्यवगम्यते ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

End:

किंच - प्राप्तताज्ञानं न मोक्षदशायाम् । किन्तु तत्त्वज्ञानदशायामेवेति मोक्षस्य कथं पुरुषार्थता, स्वरूपप्रकाशस्यैव प्राप्तताबुद्धिरूपत्वे मुक्तिसंसारयोरविशेषः । अप्राप्तताबुद्धिनिवृत्त्यापि न मोक्षस्य पुरुषार्थता । निवृत्तेस्त्वदुक्तरीत्या संसारकालीनत्वात् मोक्षदशायामप्राप्तताबुद्ध्यभावान्मोक्षस्य पुरुषार्थतेति चेत् ; न, किमभावपदेन प्रतियोगिविरोधी कश्चित् बोध्यते, उत न । आद्ये अद्वैतहानिः । मिथ्यार्थानुवृत्तिप्रसंगो वा । न च ब्रह्मस्वरूपमनादितः संस्काराविनाभूतं कस्यापि विरोधीति वक्तुं शक्यम् । अन्त्ये कथं चोद्यस्य परिहार इति । यदुक्त-निवृत्तेरतिरिक्ताभावविकारत्वाभावे चिरनिवृत्तेपि घटे निवर्तत इति व्यवहारप्रसंग इति-तन्न । धात्वर्थविशिष्टकर्तरि धात्वर्थरूपफलोपहिते व्यवहारे वा वर्तमान-त्वाद्यन्वयादिति । इति सद्विद्याविजये अविद्यानिवृत्तिभंगः ।

Colophon:

इति वाधूलकुलतिलक श्रीनिवासाचार्यपादसेवासमधिगत परावरतत्वयाथात्म्येन तदेकदेवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्धमहाचार्यापरनामधेयेन रामानुजदासेन विरचिते वेदान्तविजये सद्विद्याविजयः तृतीयः ।।

640 C - सन्मार्गदर्पणम्

Beginning:

श्रावण्यां पौर्णमास्यामध्यायमुपाकृत्य सम्प्रदोषो नाधीतेतु आपस्तम्बः । तत्रत्य श्रावणीशब्दस्य चान्द्रश्रावणीमात्रपरत्वम् ।

End:

अनेन नित्यमुक्तस्याचार्यपर्यन्तनिवेदितेन भगवत्प्रसादेन प्राणाग्निहोत्रवैश्वदेव पैतृकादीनि अनुष्टेयानि इति निरवद्यम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

Colophon:

इति श्रीवात्सयदेवराजगुरुकृतौ सन्मार्गदर्पणे सम्प्रदायप्रतिफलनं नाम तृतीयः परिच्छेदः ।।

1695 C – समासवादः

Beginning:

श्रीसम्पत्कुमाराय नमः ।

मुनिरिपुचरणसरोजे नत्वा स्मृत्वा च लक्ष्मणमुनीन्द्रम् ।

तनुते समासवादं विशदं कुतुकादनन्तार्यः ।।

इह तावदाद्यसूत्रघटकीभूतस्य ब्रह्मजिज्ञासेति समासस्य प्रतिपाद्यार्थो विचार्यते । तत्र 'ब्रह्मजिज्ञासा इति समासस्थले ब्रह्मपदस्य ब्रह्मविषयके लक्षणामभ्युपगम्य निर्वाहपक्ष एकः ; लक्षणाया अभावेऽपि लुप्तषष्ठीविभक्तिस्मरणमभ्युपगम्य, विषयविषयिभावस्य संसर्गतयाभासमभ्युपगम्य, समासे शक्तिम् अभ्युपेत्य वा निर्वाहपक्षास्त्रयः । एतत् पक्षचतुष्टयमपि श्रुतप्रकाशिकायां स्थितम् । अत्र कस्मिन् पक्षे भाष्यादिस्वारस्यं कस्मिंश्च नेति अयमंशो विवेचनीयः ।

End:

नन्वेवं - 'ब्रह्मजिज्ञासा' इत्यादौ सनर्थप्रकारकधात्वर्थविशेष्यकबोधव्यवस्थापनम् 'इच्छायाम् इष्यमाणप्रधानत्वादिति' भाष्यस्य इष्यमाणधात्वर्थप्रधानत्वाद्धात्वर्थविशेष्यकत्वादित्यर्थकथनं च दर्पणकृतां विरुध्यते - इति चेन्न । पूर्वं सनर्थविशेष्यतापक्षं प्रतिपाद्य तदनन्तरं धात्वर्थविशेष्यतापक्षस्य प्रतिपादनेन प्रथमकल्प एव तेषां निर्भरांगीकारात् - इति सर्वमवदातम् ।

Colophon:

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।

अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

3114 – सारप्रकाशिका

Beginning:

वन्दे हस्तिगिरीशस्य वल्लभां वारिजाननाम् ।
यदपांगे क्षणात्पुंसां वर्धन्ते सर्वसम्पदः ।।
वन्दे श्रीरंगधामानां हरिं वरवराभिधम् ।
यदवासस्थलं लोके मद्वंशानां निरूपकम् ।।
श्रीमद्राघवसंयमीन्द्र करुणा सम्प्राप्तसत्तं तथा
श्रीमत्कौशिकदेशिकेन्द्र वरदैः क्षिप्तात्मरक्षं पुनः ।
श्रीवाधूलकुलोद्भवात् गुरुवरात् श्रीवास विद्यानिधेः
वेदान्तद्वयमाप्तवन्तमनघं श्री श्रीनिवासं भजे ।।
भारद्वाजकुलाब्धीन्दु श्रीनिवासार्य सेवया ।
रहस्यत्रयसारार्थस्तत्सुतेन प्रकाश्यते ।।

श्रियःपतिः निखिलहेयप्रत्यनीकः कल्याणगुणैकतानः सर्वशेषी पुरुषोत्तमः नारायणः स्वशेषभूतानां ------------------।

End:

तैः निम्बपल्लवभक्षणान्तरापतितकोकिलास्वाद्यचूतपल्लवोद्गारो यथा चूतस्य दोषाय न भवति उष्ट्रस्यैव दोषाय भवति, एवमेव प्रबन्धस्यअस्वीकारोऽपि स्वीकाररहितानां तेषामेव दोषाय भवति, नत्यितरेषाम् इत्यर्थः ।।

1063 A - सारसंग्रहः

Beginning:

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रीरंगमंगलमहोत्सवदर्शनाय
वेदान्तपार्थ परमार्थसमर्थनाय ।
कैंकर्यलक्षण विलक्षणमोक्षमार्गे
रामानुजो विजयते यतिराजराजः ।।
श्रुतिस्मृतीतिहासेभ्यः पुराणं धर्मसंहिता ।
सर्वतः सारमोक्षपाषट्पदः कुसुमैः ---- ।।
वैभवं नारदीयं तश्च तथा भागवतं --- ।
गारुडं च तथा पाद्म वाराहं ----मदर्शनम् ।।
ब्रह्माण्डं ब्रह्म चैव तं मार्कण्डेयं तथैव च ।
------ वामनं ब्राह्म --- निर्निबोध मे ।।
मात्स्यं कौर्मन्त्वथा लैंगं ---- स्कान्दमेव च ।
आग्नेयं षडेतानि तामसा निर्निबोध मे ।।

End:

इति स्वार्थकामादिपरवशस्सन् यस्तिष्ठति स तु नास्तिकस्सन् दैवस्थस्सन् --- कथनादर्थकामौ त्याज्यौ तस्मादर्थपुत्रकलत्रादिषु निर्ममस्सन् -

त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव ।।

इति च माता महालक्ष्मीः पिता च श्री --- इति चेदस्ति- --जगत्त्रये इति । पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियाया -- देव सोढुम् । इति च -

गच्छतां दर्शनं पुंसां तृष्णामूर्च्छितचेतसाम् ।
पाथेयं पुण्डरीकाक्ष नाम संकीर्तनामृतम् ।।

इति च श्रियःपतेः सर्वविधबन्धुत्वं ज्ञात्वा स एव निर्हेतुकोपाय इति स्थितिः । इति आत्मारामत्वम् ।।

Colophon:

अष्टादशरहस्यं सम्पूर्णम् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

999 A – सारास्वादिनी संग्रहः

Beginning:

श्रीमान्वेंकटनाथार्यः + सन्निधत्तां सदा हृदि ।।

प्रारीप्सितस्य गुरुपरम्परासारप्रबन्धस्य विषयं प्रयोजनं च सूचयन् निष्प्रत्यूह-परिसमाप्तिसिद्ध्यर्थं मंगलमाचरति । 'गुरूभ्य' इति - स्वाव्यवहित-आचार्यपरम्। 'तद्गुरुभ्य' इति परमाचार्यप्रभृतिभगवत्पर्यन्तपरम् ।

End:

----- न केवलमुपपत्तिमात्रेणायमर्थः कल्प्यते । ---- प्रपदनविधिः प्रपदनानुष्ठानम् । निर्विशंकाः - यत् दोषाभावेपि समुदायप्रतियोगिका-भावरूपाकिंचित् च --- येन अनधिकारिकपरं --- रहिता इत्यर्थः ।

Colophon:

इति श्रीमद्रंगनाथयतिवरचरणारविन्द --- व्रतस्य वेदान्तरामानुजपतेः कृतिषु श्रीमद्रहस्यत्रयसारटीकायां सारास्वादिन्याः संग्रहे श्रीनिवासदासेन लिखिते प्रपत्ति-योग्याधिकारोदशमः ।

1252 – सिद्धधर्मप्रकाशिका

Beginning:

प्रणम्य भगवन्तो नः शुद्धां गुरुपरम्पराम् ।
गीतोपनिषदन्तस्थं तत्त्वमत्र प्रकाश्यते ।।

तत्र तावत् सदाचार संप्रदाय प्राप्तोयमर्थः पंचमवेदसारभूतगीतोपनिषत्-तात्पर्याभिधायी चरमश्लोकसिद्धोपायैकपर इति । युक्तं चैतत् -

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

स्वधर्मज्ञानवैराग्य साध्यभक्त्यैक गोचरः ।
नारायणः परंब्रह्म गीताशास्त्रे समीरितम् ।। इति ।

गीताशास्त्रस्य सिद्धोपायैकपरतया श्रीयामुनाचार्यैः अनुगृहीतत्वात् । अत्र स्वधर्मसंबन्धो यथावस्थितचेतनस्वरूपानुरूपकेवलभगवदाराधनात्मकधर्मपरः ज्ञान-सम्बन्धोपि यथावस्थितस्वस्वरूपज्ञानपरः। स्वशब्दस्य तत्राप्यन्वयात् । यथावस्थित-स्वस्वरूपस्य ब्रह्मपर्यन्ततयाज्ञानमपि ब्रह्मपर्यन्तमेव। वैराग्यशब्दः - 'परमात्मनि-योरक्तो विरक्तोऽपरमात्मनि' इत्युक्त भक्तियोगफलीभूततत्त्वद्वयवैराग्यपरः । एतेन भक्तिरर्थादुक्ताभवति । साध्यभक्तिशब्देन -

साधनं भगवत्प्राप्तौ स एवेति स्थिरामतिः।
साध्यभक्तिस्मृतासैव प्रपत्तिरितिगीयते ।।

इत्युक्ता साध्यभक्तिशब्दिता प्रपत्तिरुच्यते ।

End:

'साध्यभक्तिस्मृतासैव प्रपत्तिरिति गीयते' इयं केवल - लक्ष्मीरुपायत्व-प्रत्ययात्मिकास्वहेतुत्वधियारुन्धे किं पुनस्सहकारिणाम् । 'नारायणं सलक्ष्मीकं प्राप्तुं तच्चरणद्वयम् । उपाय इति विश्वासो द्वयार्थश्शरणागतिः।।' इत्याद्युक्त-प्रपत्तिस्वरूपविरुद्धत्वात् -

सुदुष्करेणशोचेद्यो येन येनेष्ट हेतुना ।
स सतस्याहमेवेति चरमश्लोकसंग्रहः ।। इति ।

केवलसिद्धोपायपरत्वग्राहक वेदान्ताचार्य सूक्तिविरोधाच्च अनादरणीय एवेति सिद्ध-धर्मभूतः परमपुरुष एव श्रीगीतोपनिषदन्तस्था जगद्धितं तत्त्वमिति सर्व समंजसम् ।

Colophon:

श्रीशैलयतिराजाख्यदासस्य कृतिरेधताम् ।
गीतोपनिषदन्तस्थ धर्मतत्त्वप्रकाशिका ।।
इति श्रीनिवासकृतिषु सिद्धधर्मप्रकाशिका समाप्ता ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

88 - सिद्धान्तचन्द्रिका

Beginning:

-------------------------------- तं भुवनमखिलं च विश्वं बिभर्ति ।

यत्संकल्पाद्दुरितनिकरैर्युज्यते कोऽपि जन्तुस्सानुक्रोश सम--- धत्तां मुकुन्दः।।

विष्वक्सेनो भवतु शरणं स्यात्प्रसन्नः शठारिः
नाथोनाथः स भवतु भजे पुण्डरीकाक्षसूरिम् ।
वन्दे रामं प्रथितविभवं यामुनाचार्यं पूर्णम्
चित्तेऽस्माकं शमितकलुषः सन्निधत्तां यतीन्द्रः ।।
द्वितीयं लक्ष्मणं नौमि यस्य वा गम्यतेजगत् ।
क्रमतक्ष्वेळविध्वस्त जीयितं जीयितं पुनः।।
अन्तस्तमिस्रपरिणच्छ्वेपुत्रबन्धो-
राम्नायमस्तक गुरोश्चरणारविन्दम् ।
ये संश्रिता भुवि जनाः प्रणतेनमूर्ध्ना
तेषामदक्षिणपद्माम्बुजमुद्वहामः ।।
पुण्यायतस्मै परवस्तु नाम्ने प्रणीमवाचं परिशीलयामः ।
वसुन्धरायां यदुपगन्यमिन्दे वेदान्तविद्यागुरुवाक्प्रपंचः ।।
त्रय्यन्तार्यो वसति हृदये यस्य नित्यं प्रसन्नो
यस्याचार्यो जयति परवस्त्वाख्यया मुख्यवृत्त्या ।
यस्मादन्यो निगमशिरसां वेत्तिभावं न कश्चित्
वेदान्तार्यो जयति भगवान् सोयमस्मत्पितृव्यः ।।
श्रीमदादिवराहार्यान् परवस्तुगुरोस्सुतान् ।
वन्दे येषां पदाम्बोजं शरणं ममनिस्समः ।।
श्रुतिस्मृतिसदाचारैः भगवच्छिन्नधारणम् ।
न्यायैश्च विविधैः अत्र धर्म इत्यभिदद्महे ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

आम्नायशिखराचार्यः कुदृष्टीन्मे जिगीषतः ।
जिह्वा भद्रासनमिदमारोहतु दयाम्बुधिः ।।
न्यायरूपैः प्रहरणैः भेत्स्यामि कुमतीन्परान् ।
अनुसृत्यागमान्तार्य सूक्तिं कामपि साधवः ।।

स्थितं तावत् 'चोदनालक्षणोर्थो धर्मः' इति । अस्ति च सुदर्शनादिधारणे चोदना तथाहि शथपथे श्रूयते ।।

End:

एवं कुतर्कनिहताः समस्ताः न्यायायुधैरागमशाणदीप्तैः ।
सुधीश्च वेदान्तगुरोः कृतान्तो दर्शोऽप्ययं कार्तयुगप्रवृत्तः ।।
सिद्धान्तचन्द्रिकासेयं सतां आमोददायिनी ।
कुतर्कतिमिरं हन्ति सिद्धान्तस्य प्रकाशिका ।।
आद्याकृतिरसौ वात्या त्रय्यन्तार्यविपश्चितः।
वयस्येकोनविंशत्यां कृताविद्वन्मनोरमा ।।
शाङ्गर्पाणि कृपालब्ध विद्या वैशद्यशालिनः ।
वेदान्ताचार्यविदुषः कृतिरेषातिनिर्मला ।।
नृणामसूयावितमानसानां यैषाकृतिश्चित्तपदं न विन्देत् ।
तथाप्यदोषो विदुषां जनानां चित्तानि गृह्णन्ति कृतिं यदेनाम् ।।
अज्ञः क्वाहं क्वच ममबलं स्थापने सत्पथस्य
क्वासौ दर्शश्रुतिषु विहितस्संसृतिध्वंसहेतुः ।
सासूयानामपि न भविता श्रोतृभावो जनानां
वक्ता श्रोता निगमशिरसां देशिकः प्रीयतां मे ।।

Colophon:

इति श्रीवत्सकुल जलधिकौस्तुभवैदिकसार्वभौमवेदान्तदेशिकसम्प्रदायप्रवर्तक-परवस्तुवेंकटदेशिकसुकृतपरिपाकसर्वतन्त्रस्वतन्त्रमहावेदान्ताचार्यानुजश्रीमदादिवराहा-चार्यतनयस्य तच्चरणारविन्दचंचरीकस्य कोनेटयाम्बागर्भसम्भवस्य श्रीकुम्भघोणकृत-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

निवासस्य निजहृदयकमलविहरमाणवेदान्तदेशिकप्रेरितस्य तदेकदैवतस्य वेदान्ताचार्यस्य कृतौ सिद्धान्तचन्द्रिकायां द्वितीयःपरिच्छेदः । सिद्धान्तचन्द्रिका समाप्ता ।।

2215 - सिद्धान्तचिन्तामणिः

Beginning:

ध्येयं सतां सर्वपदाभिधेयं
मेयं श्रुतीनामपि भागधेयम् ।
संत्यक्तहेयं चिदचित्स्वकायं
ब्रह्माद्वितीयं प्रणमाम्यमेयम् ।।
यतिपतिमानमामि निगमान्तगुरुं प्रणमा-
म्यहरहराश्रये मम पितामहमण्णगुरुम् ।
पितरमभिप्रणौमि मम भाष्यगुरुन् कमला-
निलयमखीश्वरान् स करुणान् शरणं कलये ।।
अग्रजचरणानुग्रहजाग्रदशेषप्रशस्तशास्त्रगतिः ।
वेदान्तस्य रहस्यं विदुषां प्रीत्यै प्रकाशये किंचित् ।।
सिद्धान्तचिन्तामनुभूय भूयः
सैद्धान्तिकं वर्त्म न ये विदन्ति ।
सिद्धान्तचिन्तामणिमेनमादौ
आदाय ते तत्त्वपदं विदन्तु ।।

End:

श्रीशैलान्वयमौलिमण्डनमणिः श्रीतातयार्याग्रणी-
लक्ष्माम्बा च सहाण्णयार्यमखिना प्रासूत यं सादरम् ।
तेन श्रीनिधिनामकेन विदुषा सिद्धान्तचिन्तामणिः
क्लृप्तो लुप्तपरोक्तयुक्तिनिकरो भूयात् सतां प्रीतये ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

1719 B - सिद्धान्ततूलिका

Beginning:

वरवरमुनिचरणौ तरुणसरोजातजठरकमनीयौ ।
अपिममशिरस्य कस्मात् करुणा परिणामधापितौ कलये ।।

मुमुक्षोः मोक्षार्थं प्रमाणसारेण प्रमेयसारनिर्णयः कर्तव्यः । तत्र धर्मज्ञसमय एव सारभूतं प्रमाणम् । स्वतः प्रमाणस्य वेदस्यापि तत्सापेक्षत्वात् । तदुक्तमापस्तम्बेन- 'धर्मज्ञसमयः प्रमाणं वेदाश्च' इति न च धर्मज्ञ समयस्यापि साक्षात्परम्परया वा वेदसापेक्षत्वं शक्यम् । वेदयोगाद्यगोचरात्यन्तालौकिकार्थसाक्षात्कारक्षम भगवन्निर्हेतुककटाक्षलब्धदिव्यचक्षुषाणां पराङ्कुशादिधर्मज्ञानां समयस्ववेद-सापेक्षत्वाभावात् । तदुक्तं गीतायां -

नाहं वेदैर्नतपसा न दानेन न चेज्यया ।
शक्य एवं विधोद्रष्टुं दृष्टवानसि मां यथा ।। इति ।

नचैवमपि 'नो इतराणि' इति श्रुतिनिषिद्धापचरितानामपि प्रामाण्यवारणाय धर्मज्ञसमये वेदाविरुद्धांश एव प्रमाणमिति वक्तव्यतया तस्य वेदसापेक्षत्वमावश्यकमिति वाच्यम्।

End:

विरोधिस्वरूपान्यथाज्ञानं च विरोधिभूतस्य देहेन्द्रियादेः 'शरीरमाद्यं खलु धर्मसाधनम्' इत्युक्त साधनान्तरसाधनत्वादिज्ञानप्रयुक्तानुकूल्यज्ञानम् । अतस्तदपि विरोधिस्वरूपविरोधीति शिष्टं सर्वमन्यत्रविस्तरशो वर्णितं इत्यलं पल्लवितेन इति सर्वं समंजसम् ।।

Colophon:

इति श्रीमद्वाधूलकुलतिलकश्रीमन्महाचार्यचरणयुगलभावितेन श्रीनिवासदासेन विरचितायां सिद्धान्ततूलिकायां अपरपरिच्छेदे विरोधिस्वरूपनिरूपणोल्लासश्चरमः ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

114 – सिद्धान्तन्यायचन्द्रिका

Beginning:

श्रीमान्वेंकटनाथार्यः + सन्निधत्तां सदा हृदि ।।
विशुद्धविज्ञानघनस्वरूपं + देवं हयग्रीवमहं प्रपद्ये ।।
नमस्ते भव्यरूपाय कल्याणगुणसिन्धवे ।
मम सर्वस्वभूताय विनताभाग्यराशये ।।
कर्मब्रह्मात्मकं शास्त्रं येन संरक्षितं कलौ ।
तं देशिकवरं मूर्ध्ना प्रणमामि पुनःपुनः ।।
वरदार्यगुरोर्लब्धवेदान्तज्ञानसंपदा ।
रच्यते देवराजेन सिद्धान्तन्यायचन्द्रिका ।।
श्रुतिस्मृतीः सूत्रवचांसि चापि यत्त्वेककण्ठानि समाततान ।
अर्थद्वयं तद्विवृणोतु कामं स भाष्यकृन्मे परमार्थवेदी ।।

तत्र भगवद्भाष्यकारैः 'सदेव सोम्येदमग्र आसीत्' 'तत्त्वमसि' इत्यादौ श्रूयमाणं सामानाधिकरण्यमुपादानोपादेयभावेन शरीरात्मभावेन च निर्व्यूढम् । तदुभयमपि न संभवतीति मध्वभिक्षुभिः प्रतिपादितम् ।

End:

-----त्वदुक्तिविरोधापाताच्च महाकायेत्यविद्येति वचनं पूर्वैः अनुदाहृतत्वात् त्वत्कल्पितमेव, कल्पितत्वेपि एतद्वचनबलात् प्रकृतिशब्दस्य यत्रकुत्रचित् इच्छावाचकत्वाभ्युपगमेपि प्रकृते तद्वाचकत्वे प्रमाणाभावाच्च ।।

1719 C – सिद्धान्तपरिभाषा

Beginning:

श्रीवाधूलमहाचार्यचरणद्वय भावितः ।
तावेव शरणं यामि सर्वथात्र परत्र च ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सिद्धान्तपरिभाणार्थान् सदाचार्य प्रकाशितान् ।
चिन्तयामीह सुदृढं तत्वयाथात्म्य सिद्धये ।।
हितानुशासनपरेष्वागमेष्वखिलेष्वपि ।
व्यवसायात्मिका बुद्धिरेकैवाचार्यसम्मता ।।
अखिलाम्नाय भावानां गूढानामेकगोचरः ।
जीवात्मपरसम्बन्धः त्रयी सारे प्रदर्शितः ।।
सारं साधनतस्साध्यं तत्सत्ताधायकस्ततः ।
त्रयी सारतमत्वं तत्तारार्थस्यास्ययुज्यते ।।
तत्प्रकृत्या च सद्ब्रह्मा सर्वोपादानतोक्तितः ।
देहात्मभावरूपोयं सम्बन्ध इति निर्णयः ।।
अखिलोपनिषद्वाचा मन्त्रज्वरभिषग्वरः ।
प्राणभूतोयमप्यैकः सम्बन्धः शास्त्रचक्षुणाम् ।।

End:

सिद्धोपायदयासाध्या साध्यभक्तिर्हि केवलम् ।
न धर्मबलसाध्येति गीताभाष्यान्ततस्थितम् ।।
यो विवेकविमोकादिसाधनेषु परिश्रमः ।
दुर्धेनुलगुडन्यायात्तस्ययोगोपि दर्शितः ।।
प्रपन्नाभाष्यकारा श्रीभाष्यादौ शास्त्रसंग्रहे ।
भक्तिमेव फलत्वेन प्रार्थयामासुरादरात् ।।
किंच गद्येपि गीतायां भक्तिस्थानत्रयोदिता ।
फलत्वेन प्रपन्नानां स्वेषां सम्प्रार्थिता विभोः ।।
सहस्रनामभाष्ये च 'प्रियकृत्प्रीतिवर्धनः' ।
इत्यादौ सानुगीतोक्ता साध्यभक्तिरिति स्फुटा ।।
सर्वात्मनापरार्थानामित्थं सर्वात्मनामपि ।
स्वार्थतागन्धगन्धोऽपि विरो ---------।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

2584 – सिद्धान्तसिद्धांजनम्

Beginning:

श्रीयादवाद्रिनिलयं श्रितकल्पवृक्षं
नारायणं निखिललोकनिदानभूतम् ।
निस्सीमनिर्मलगुणं निरवद्यरूपं
नित्यं नमामि शिरसा सकलार्थसिद्ध्यै ।।
जयन्तु श्रीमन्तः श्रुतिशिखरसारस्यमधुराः
सुधासध्रीचीनाः कुटिलमतकोलाहलमुषः ।
स्फुरद्युक्त्यासक्त्या द्रुहिणरमणीश्लाघ्यविभवाः
यतिक्षोणीभर्तुर्निरुपमवचोगुम्भविसराः ।।
शेषार्यवंशाम्बुधिशीतरश्मिस्सुधीरनन्तार्य इति प्रतीतः ।
सिद्धान्तसिद्धांजननामधेयं प्रबन्धमेनं प्रकटीकरोति ।।
येऽर्था दुर्बोधतां प्राप्ता गम्भीराचार्यसूक्तिषु ।
तादृशार्थप्रकटनात्सफलोऽयं श्रमो मम ।।

चिदचिदीश्वरतत्त्वज्ञानसहकृतभगवदुपासनस्य मोक्षहेतुतया तादृशतत्त्वज्ञानार्थं प्रमेयं निरूप्यते । ज्ञेयत्वं प्रमेयसामान्यलक्षणम् । ज्ञेयत्वं च विषयतासम्बन्धेन ज्ञानमेव; तेन विषयत्वमात्रस्यैव लक्षणत्वसम्भवात्तत्र ज्ञाननिरूपितत्वं व्यर्थमिति शंकाऽनवकाशः ।

End:

अन्यथा धर्मभूतज्ञानेनैव सर्वकार्योत्पत्तावात्मकल्पनस्य व्यर्थतया तस्याप्यप्रसिद्धिप्रसंगात् ; आत्मनि व्यभिचारवारणाय प्रमाणजन्य ज्ञानत्वं यत्र तत्र स्वभिन्नार्थविषयत्वमित्यादिव्याप्तिस्वीकारेण नित्यविभूतौ व्यभिचाराप्रसक्त्या उक्तसूत्रविरोधविरहात्प्रमाणतदाभासान्यतरजन्यज्ञानत्वविशिष्टसाध्यव्यापकत्वस्य बाधितत्वरूपोपाधौ सत्त्वेन वैधर्म्याच्चेत्यस्यापि न विरोधः इत्याहुः ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

1034 A – सुन्दरबाहुस्तवव्याख्या

Beginning:

अथभगवद्भाष्यकारपरमकृपालब्धपरावरतत्त्वयाथात्म्यास्तदीयपादारविन्दद्वन्द्व-सेवैकधारकाः श्रीवत्सांकमिश्राः पाषण्डप्रभुविवासित तद्विश्लेषमसहमानतया विभवावतारस्तवानन्तरमर्चावतारस्तुतेः प्रस्तुतत्वाच्च समाश्रित-----सर्वाभीष्टप्रद वनगिरि-मन्दिरसुन्दरबाहुमहिमस्तव प्रवृत्त----प्रस्ताव एव भाष्यकारचरण नळिनविलोकनमेव फलत्वेन संकल्प्य सकलश्रुत्यन्ततत्त्वार्थराशिं प्रकाशयितुं प्रारभन्ते । 'श्रीरामावरजमुनीन्द्रलब्धबोधः श्रीरामानुजयोगीन्द्र----प्राप्त त्रय्यन्तज्ञानः---- एव श्रीमन्तौ हरिचरणौ समाश्रितः' ततोहेतोः निर्भीकः भयशून्यः अहं भाष्यकार-विशेषकाले तच्चरणविलोकनाभिलाषी सन् सुन्दरोरुबाहुं सुन्दरः - रचिरः -ऊरुः पीनश्च बाहुः यस्य तं स्तोष्ये रामानुजार्यचरणनळिनविलोकनकामः सुन्दरबाहुं स्तोष्यामि इत्ययमर्थः । 'विज्ञापनं वनगिरीश्वर सत्यरूपामंगीकुरुष्व-करुणार्णवमामकीनाम् । श्रीरंगधामनियथापुरमेषसोहं रामानुजार्यवशगः परिवर्तिषीय।।' इति उपसंहारे विस्तृतः ।

End:

विज्ञापयितुमिच्छामि दुष्टात्मादुष्टमनाः कलुषमतिः क्षुद्रबुद्धिः अहंकृतागा अस्मिन् कृतापराधोस्मीति हेतोः----पात्रं----नीर्योभवानि सकृद्विज्ञापनस्यैव पर्याप्तत्वेपि उन्मत्तचित्तवत् असकृद्विज्ञापनं अपराधम् । एवं ततः प्रियतरगुरुचरणविरहविषण्णोहं परदुःखासहिष्णुतारूपायाः पात्रमिति मत्वा विज्ञापितं निवर्त्तयेति भावः ।

Colophon:

इति श्रीमदात्रेयगोत्रभूषायमाण शेषाचार्यपौत्रेण श्रीरामानुजगुरुवरसूनुना श्रीवेंकटनिवासदासेन विरचिता सुन्दरबाहुस्तव सव्याख्या परिसमाप्ता ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

318 B – स्तोत्ररत्नम्

Beginning:

यत्पदांभोरुहध्यानविध्वस्ता शेषकल्मषः ।
वस्तुतामुपयातोहं यामुनेयं नमामितम् ।।
स्वादयन्निह सर्वेषां त्रय्यन्तार्थं सुदुर्ग्रहम् ।
स्तोत्रयामास योगीन्द्रस्तं वन्दे यामुनाह्वयम् ।।
नमो नमो यामुनाय यामुनाय नमो नमः ।
नमो नमो यामुनाम यामुनाय नमो नमः ।।
नमोचिन्त्याद्भुताक्लिष्टज्ञानवैराग्यराशये ।
नाथाय मुनयेऽगाध भगवद्भक्तिसिन्धवे ।।

End:

रघुवर यदभूस्त्वं तादृशो वायसस्य
प्रणत इति दयालुर्यच्च चैद्यस्य कृष्णः ।
प्रतिभवमपराद्धुर्मुग्ध सायुज्यदोभूः
वद किमपदमागस्तस्य तेऽस्ति क्षमायाः ।।
ननु प्रपन्नः सकृदेव नाथ तवाहमस्मीति च याचमानः ।
तवानुकम्प्यः स्मरतः प्रतिज्ञां मदेकवर्जं किमिदं व्रतं ते ।।
अकृत्रिमत्वच्चरणारविन्दप्रेमप्रकर्षावधिमात्मवन्तम् ।
पितामहं नाथमुनिं विलोक्य प्रसीद मद्वृत्तमचिन्तयित्वा ।।

112 B – स्तोत्रभाष्यम्

Beginning:

योनित्यमच्युत पदाम्बुज युग्मरुक्म व्यामोहतस्तदितराणि तृणायमेने ।
अस्मद्गुरोर्भगवतोस्य दयैकसिन्धोःरामानुजस्य चरणौ शरणं प्रपद्ये ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रीमान्वेंकटनाथार्यः + सन्निधत्तां सदा हृदि ।।
श्रीमद्यामुनमुनिना नाथसहायेन नाथवानस्मि ।
यद्वदनचन्द्रजनिता स्तोत्रसुधा भवति सुमनसां भोग्या ।।
प्राप्यप्रापकभूते भगवति यामुनमुनेरयं प्रसूतः ।
दुरितानि हरति जगतां द्वयानुसन्धानसिन्धुपरिवाहः ।।
विमलममृतोल्बणरसं विगाह्य निर्विशति वेंकटेशकविः ।
यदुपतिचरणार्हमिदं यमुनातीर्थमिव यामुनं स्तोत्रम् ।।
यद्यप्यत्र न सन्दृष्टं परार्थप्रतिपादनम् ।
तथापि तादृशरूपत्वं परसंकल्पतः स्थितम् ।।
स्तोत्ररत्नमिदं रत्नमाचार्यस्तुतिसम्पुटे ।
निधानमिव निस्सीमं निर्विशन्ति विपश्चितः ।।
मंगलाचरणत्वेन ख्याता गुरुनमस्तुतिः ।
स्मृत्याचारानुसारेण स्तोत्रारम्भे विधीयते ।।
नमस्कारोऽत्र विज्ञेयः प्रणिपातपुरस्सरः ।
आचार्यादन्यतो ज्ञेया या केवलनमस्क्रिया ।।
प्रमाणमिह विज्ञेयं मैत्रेयाचरणं सताम् ।
मैत्रेयः परिपप्रच्छ प्रणिपत्याभिवाद्य च ।। इति ।

End:

स्वकमिति हरिदत्तं यामुनस्तोत्रवृत्त्या व्यवृणुत निगमान्ताचार्यकं वेंकटेशः ।
अगणि सदसि सद्भिर्यः समस्यासहस्री कविकथकमृगेन्द्रः सर्वतन्त्रस्वतन्त्रः ।।

Colophon:

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेंकटनाथस्य वेदान्ताचार्यस्य कृतिषु स्तोत्रभाष्यं सम्पूर्णम् ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.